1

# INTRODUCTION.

By

( Shrimat Svāmi Bhairabānanda )

THE present volume called "*Shataratna Samgraha*" or the collection of a hundred gems is an authoritative collection of ancient Agama scriptures on Shaiva doctrine. This famous book was compiled with a commentary by Shrimat Umāpati Shivācharyya, a renowned teacher of Shaiva philosophy of his time. A very little account can be given of this great preceptor. He flourished in Southern India at the close of the Thirteenth Century and the early years of the Fourteenth Century. He was the founder of the famous Chidāmbar Math and the images of Chidāmbaresvara and Kāmesvari, the presiding deities of the great temple, were installed by him. He was the author of various works including eight books on Shaiva Siddhānta Shāstras written in Tamil.

The *Shataratna Samgraha* was hitherto unpublished. So its teachings were so long confined within a limited circle of devoted Shaivas. Its lofty and sublime ideals and its excellent exposition of the Shaiva doctrine attracted the attention of some of the members of the Agamanusandhana Samiti, which has therefore undertaken the publication of this valuable work. This volume deals in a masterly way with the Shaiva philosophy and its underlying ethics and religion. It also attempts to harmonise the different ideals of self realisation and to restrain their extravagance. Intellectual apprehension of the tattvas, strenuous self-sacrifice, unflinching devotion to Shāstras and their teachings, ceremonial observances, rituals and yoūgik practices, are all regarded as effective methods of approach to Shiva ( The Supreme Self ). The commentary in the book expounds them all and describes the exact value and grade of each of them. This treatise has very successfully attempted to bring the different grades of liberation into harmony with one another. It has been laid down that disinterested doings, combined with fervent devotion to religion, help, to purify the mind. Only a mind free from vice and virtue alike can only concentrate on the Absolute, through the grace of whose Anugraha Shakti ( gracious revelation ) the fivefold bondages of Māyā are completely disentangled and the true nature of self dawns of itself. The indication and introduction of different paths in the form of various processes of experience and knowledge ( Jñāna ) and Dikshā ( Initiation ) are thus conducive to a gradual growth and development of a Divine State and ultimate realisation of Shiva ( The Supreme Self ).

In this harmonious blending of different courses and processes each has an important function to perform, but the greatest importance has been attached to Jnāna ( Knowledge ) and Dikshā ( Initiation ). The very first verse of this

compilation starts with a proposal to explain the processes of knowledge and initiation :—

> Shivam pranamya paramam Nidhaneśamatah param ;
> Jñāna-dīkshe pravakshyāmi te Shrinudhvam samāhitah.

The book has been very appropriately named "*Shataratna Samgraha*" as the collection is sure to illumine the minds of the Sādhakas ( devotees) like so many brilliant gems, throwing a serene light on the path of liberation which is generally enveloped in the darkness of ignorance. There are also various directions in this book which, if correctly followed, are sure to help people to tide over earthly obstructions and to achieve their worldly happiness and success in life along with an advance in the path of spiritual progress and self-realisation.

In his exposition Umāpati generally follows the directions of his Guru Sampradāya ( the school of his own religious preceptors and the famous Shaiva preceptors like Sadyojyotihpāda, Rāmakantha, Nārāyanakantha who were masters of the inner meanings of the various revelations of Shiva made through his different āmnāyas ( faces ). According to the author the true knowledge was revealed and transmitted to this earth in the following order :—

Shiva to Sadāshiva, Sadāshiva to Nidhanesha, Nidhanesha to Svayambhū. From Svayambhū this knowledge was handed over to Sixty Thousand Bālakhilya Rishis who were really competent to receive it for transmission to the ordinary mortals of this earth according to their individual competency.

The three essential categories accepted in this treatise are—

(1) Pashupati ( The Lord of all beings )
(2) Pashus ( Beings in bondage )
(3) Pāsha ( Bonds of matter ).

The kinds of evidence upon which the conclusions in this book have been based have been clearly described in it. It will appear that three kinds of syllogistic inferences have generally been admitted. They are—

(1) Pūrvavat (2) Sheshavat (3) Sāmānyatodrishta

corresponding roughly to analogy, induction and deduction in European Logic. The authority of Shruti, Smriti and Āgamas is accepted as unquestionable and irrefutable.

The cause of this world, as indeed of every effect, is viewed under three heads, Nimitta Kārana ( efficient cause ), Upādāna Kārana ( material cause ) and Sahakāri Kārana ( formal cause ). Pashupati, the Supreme Lord, is the only efficient cause, Prakriti, His Divine Nature, who is inseparable from Him is the formal cause and Bindu or Matter is the material cause of this universe. These three ultimate factors and their relation with one another have been clearly defined with a special reference to actual visualisation and ultimate realisation ending in Tattvajñāna or the Knowledge of the True Self which alone leads to Moksha ( Liberation ).

## Pashupati or the Lord

Pashupati or Shiva, the Supreme Lord, is the only efficient cause of the universe with His inherent powers of Drik ( Supreme consciousness ) and Kriyā (Action) which are the two correlated aspects of His eternal transcendant power.

Dṛik kriyātmakamaishvaryam yasya tad dātrapūrvakam
Īshvarah sotra mantavya Śaktidvayayutah prabhuh.

Everything in this universe emanates from Him. He is the Lord over all while He Himself knows no Lord. He is in every object of this phenomenal world as the one supreme and omnipresent essential spirit while He Himself is above Māyā in all times and in all circumstances. He is infinite. He always transcends the universe. He becomes as Shakti the universe but does not cease to be what—He always is, was and will be. It is through the grace of His Anugraha Shakti that the devotees attain salvation of different grades according to their own individual deserts.

Though inexpressible in nature, He manifests Himself in two forms *viz.* Chala and Achala—Chala which is ever-changing and Achala which is ever-enduring. The universe with all its aspects taken as a whole may be regarded as His Chala form, while Drik Shakti and Kriyā Shakti, ( His Divine Nature ) represent his Achala or changeless aspect. The Supreme Nishkala or Nirguna Shiva assumes a creative or immanent aspect from which the universe is born or manifested. The five functions of Sristi, Sthiti, Laya, Anugraha and Tirodhāna are discharged through His Drik Shakti and Kriyā Shakti. He also assumes for this purpose five different forms *viz.* Ishāna, Tatpurusha, Aghora, Vāmadeva and Sadyojāta. The following is cited from Mrigendra Saṁhitā :—

Tadvapuh pañcabhirmantraih pañcakrityopayogibhih
Isha-Tatpurushāghora Vāmajairmastakadikaṁ.

Though formless in nature, He is all-powerful and is functioning in various ways and forms. Just as a magnet attracts things though devoid of any limb or just as Time, which has got no physical body, produces innumerable changes in the world phenomena, so does Shiva perform His multifarious functions in an utterly inexplicable manner.


His manifestations assume a threefold form in accordance with His Static, Potential and Kinetic states. The text runs as follows :—

Shaktodyuktapravṛttashcha kartā trividha ishyate
Śakteh pravṛittibhedena bhedastasyopachāratah.

When the Almighty Shiva remains in a static condition without any manifestation whatsoever He is regarded as Shānta or in Niṣkala ( transcendent ) attitude. When He is in a creative aspect but has not actually evolved, He is in a state of Sakalaniṣkala which is called Sadāshiva. When He actually begins to create, He assumes a grosser aspect. This immanent aspect of the Shiva is called Īshvara. He has been clearly described in the following verse —:

Proktah sa nishkalah sthūlastathā sakalanishkalah
Īshah Sadāshivah Shānta iti nāmnā Sthitistviha
Ichchhānugraha kartrtvāllayabhogādhikāravān
Trividhah krityabhedena Kathito nāmabhedatah.

According to this doctrine there is an Evolution of Jñāna ( Consciousness ) prior to Creation. The first stage of this emanation is called Avabodha, which is of two kinds *viz.* Samavāyavarti and Parigrahavarti. Samavāyavarti is also of two different grades *viz.* Bodharūpa and Kriyārūpa. The Kriyārūpa ( Active aspect ) has also two distinct divisions *viz.* Anugraharūpa and Tirodhānarūpa. The different sub-divisions are indicated in the following table :—




This supreme knowledge of the self ( Avabodha ) is revealed through five faces of Sadāshiva situated in five different directions *viz.* Urdha ( upward ), Pūrva ( forward ), Dakshina ( right ), Uttara ( left ) and Paśchima ( backward ).

Sriṣṭikāle Maheshānah purushārthaprasiddhaye
vidhatte vimalam jñānam pañchasrotobhilakshtam.

The Agama Shāstras were with Him ( Shiva ) as Nāda ( Cosmic Sound ). They were revealed to the created beings by Sadāshiva through His five faces and as such, consist of six different grades including the Nāda State.

The word Shāstra has been defined as follows :—

Shuddhātmanām hitam Shāstram trāyate yad bhavārnavāt
Tachchhāsanaparitrānāch chhāstramityabhidhiyate.

The Shāstras are all-pure in nature and sure to purify their followers by dispelling all fear, doubt, suspicion and want of restraint both physical and mental. They accordingly lay down certain practices and injunctions, which when followed with sincerity, earnestness and firm determination are sure to lead a devotee to his desired goal.

The Supreme Self ( Shiva ) is the efficient cause of this universe. He becomes as Shakti the universe. This emanation is like a shining forth without any change. He remains the Supreme as before and yet appears as different in effect. He always transcends the universe.

This efficiency is manifested through His five Divine functions :—(1) Janma ( Creation ), (2) Sthiti ( Sustenance ), (3) Dhvangsa ( Dissolution ), (4) Tirodhāna ( Playful Obscuration ), and (5) Anugraha ( Gracious Revelation ).

(1) **Janma ( Creation )** refers to the processes of evolution from the Shiva who is the direct efficient cause of the following factors :—

1. Unadulterated elements ;
2. The universe composed of these elements ;
3. The residents of this universe ;
4. Their combination with the material bodies ;
5. Their connotations and denotations in the forms of sound.

He is the indirect cause of the following, His Māyā Shakti being their direct cause :—1. Elements alloyed with one another in a fixed proportion ( Prapanchikrita Bhuta ) ;
2. The universe composed of those adulterated or mixed up elements ;
3. Created Beings who are subjected to birth, death, migrations to different forms and species by way of rebirths, divergent experiences through recurrence of birth, death, happiness, sorrow, success and failures, etc.

The direct creations of Shiva are all transcendental in nature and are meant for rendering necessary help and guidance to the beings created through His Māyā Shakti. They include Vidyā, Vidyeshvaras and others who are all pure and Divine, having their origin from the All-pure, the Supreme Shiva, the Absolute. They are also termed Shiva and Shakti according as they are masculine or feminine.

All manifestations from Shiva are called Janma ( Creation ).

(2) **Sthiti ( Sustenance )** means that function of the Almighty due to which the universe maintains an orderly method of existence, growth and development, and the created beings exist to serve their respective purposes according to the Divine dispensation.

(3) **Dhvangsa (Dissolution)** is principally divided into three kinds : Adhama ( Lowest ), Madhyama ( Medium ) and Uttama ( Highest ).

The form of dissolution, which takes place at the time of nocturnal repose of Brahma ( the God of Creation ) when the first three lokas ( regions ) of the universe *viz.* Bhuloka, Bhubarloka and Svarloka are dissolved, is called Adhama Laya ( Dhvangsa ).

When at night Shrikantha ( Another God representing a different aspect of the creative energy ) is at rest all the tattvas ( principles ) beginning from Prithvi tattva and ending in Guna tattva are dissolved. This process is termed Madhyamapralaya.

At the time of Mahāpralaya ( Final dissolution ) everything visible or invisible with the exception of Māyā Purusha and Shiva are dissolved. This dissolution is called the Uttama Pralaya.

Shiva the Supreme Lord is the efficient cause of all these forms of Pralaya ( Dhvangsa ).

(4) **Tirodhana (Playful Obscuration)** is the peculiar indescribable function through which the Omnipresent Almighty veils himself from the individualised and embodied self.

(5) **Vimukti or Anugraha (Gracious Revelation)** means the function through which the Jīvas or Pashus are liberated from the bonds of illusion and matter. The revelations, which are by nature pure and true, lead to the ultimate truth. The processes of liberation are various. Their main divisions are only two as shown below :—

VIMUKTI or MOKSHA
( Liberation )

| Para | Apara |
| --- | --- |
| (Nirishvara—Realisation of self independent of any concept of a godhead ) | (Seshvara—Identification of the individual self with the godheads known to be the direct creation of the Almighty Shiva) |

The above fivefold Divine functions of the Supreme Brahman ( Shiva ) are eternal and they continue even at the time of Mahāpralaya (final dissolution).

Pralayepyanugṛhnāti Sṛjatyavati hanti cha
Tirodadhāti Bhagavān na Kālāpēkshayā Sadā.

The true knowledge of Shiva, the Supreme Self with His functions, can alone lead a Pashu or Jīva to liberation. A Jīva ( embodied soul ) cannot achieve liberation by his own attempts only, as his powers are only limited and restricted through Mala ( Impurities ).

The All-Merciful Lord Shiva who is the only grantor of liberation reveals His true nature only to competent devotees and thus grant them the Kaivalya or Mukti ( absoluteness or liberation ).

This vindicates the usefulness of worship which leads to the knowledge of the Supreme Self.

## PRAKRITI.

Prakriti is the Divine nature of the Supreme Shiva. She is not distinct from Shiva, nor has She any separate entity from Him like the Prakriti and Purusha in the Shankhya Philosophy. She is inseparable from Her Lord Shiva in the transcendent state as well as in His aspect as the Lord of the Universe.

As the rays of the Sun cannot be separated from the existence of the Sun, the lunar rays cannot be separated from the Moon and heat cannot be separated from fire, so the Prakriti ( Shakti ) cannot be separated or severed from Shiva. She is the formal cause of the universe while Bindu ( Matter ) is the material cause. When Pashupati, who is the efficient cause of the universe assumes a creative mood, the formal and material causes become effective. All these various forms of causal shakti ( energy ) have their shares in the five functions of the Supreme Brahman ( Shiva ).

The author of this book is not in favour of the identification of the material cause with the efficient or the formal cause as done by the teachers of the Vedānta and other schools of Philosophy. According to the Vedānta Philosophy Supreme Brahman is both the efficient and the material cause of this universe just as a spider is held to be in respect of the cobweb. The author has attempted to establish his theory of causation in refutation of other schools of Philosophy by putting forth his arguments in the following way :—

"Nanu Urnanabhijantorlutatāntung prati nimittatvamupādānatvang cha drista miti cet. Na. Tatrāpi tadasyagata-lālāyā eva tatra upādanatvāt. Kiñca Ishvarasyopādānatye tasyaparināmitvamacidrūpatvañg cha prasājyeta. Tadupādeyasya Sarvasya Prapañchasyāpi Cidrūpatvāpattiścha. Ata eva tat sama-vayishakterapi nopādānatvam. Chidvivartlat vāngikāre Jagat-Satyatāpattih. Na-chestāpattih. Sarvapramāna-siddhasya jagatopahnotūnaśakyatvāt."

The identification of the material cause with the efficient cause cannot be established by the illustration of a spider and the cobweb. In this case, the spider is the efficient cause and the juicy liquid coming out of its body is the material cause of the cobweb. Besides, if the Lord is accepted as the material cause of this universe, then He must have undergone a transformation as the manifestation of the Lord in the form of the universe could not be effected without His being transformable and unconscious. Moreover in that case there could not be any unconscious object in this world everything being product of the universal Life, the Supreme Consciousness. From the above arguments it is also evident that Prakriti, His Divine nature too cannot be held to be the material cause of this universe. Hence the formal cause seems to be distinct from the material cause. If it be argued that this phenomenal world is an illusion and nothing but the result of cosmic ignorance, it is not acceptable, for the existence of this world is established by all sorts of evidence. The existence of this world cannot be denied on any account.

The author has also tried to refute the Naiyayik and Vaisheshik theory of causation by arguing in the following lines :—

The Naiyayik and Vaisheshik preceptors hold that the atoms are the material cause of all the created objects. The plurality of causes being combined in Samavāya Sambandha ( relation ) have produced this world with all its various objects. As innumerable threads combine to produce a piece of cloth, so also innumerable kindred atoms having combined together created the world as a whole and the innumerable varieties of objects contained therein. The author holds that the illustration of the cloth and its threads is not sufficiently analytical as a deeper analysis is sure to reveal that the threads in their turn owe their origin to the cotton. In the presence of the cotton as the primary cause, threads should not be regarded as the cause of the cloth. So also in the presence of the Lord as the efficient cause, His Prakriti ( Nature ) as formal cause, and Bindu (matter) as material cause innumerable atoms created out of them should not be regarded as the cause of this universe.

According to the exposition in this volume, Prakriti induces the Lord Shiva to follow His fivefold Divine functions through Her machination, and She, as the formal cause, draws a design of the universe which is manifested in forms with matter as their material. Thus the various forms and the different nomenclatures of the objects both animate and inanimate are Her designs. She is practically at the root of everything in this world.

The following verses are quoted from Sarvajñānottara :—

"Nishkalā paramā Shaktirachintya sarvatomukhi
Samsūkshmā nirmalā nityānandā nirvānadāyinī
Tayā dhritaṁ jagat sarvamekayanekarupaya
Ashyā ūrddhvam nirālamvang nirādhārang nirāmayam
Achintyam vyāpakang Shāntang ṣristisanghāravarjitam."

In support of this view, the text also runs as follows :—

Kāranm cha na Shaktyanyachchaktirnāchetanā chitā
Vishayāniyamādekang bodhe kritye cha tattathā.

The first movement of the immovable Absolute is due to none except His own Prakriti ( Divine Nature ) which cannot be Achetana ( unconscious ). This Prakriti again admits of two classification *viz.* Parā and Aparā. Parā is named Vāgisvari Mahāmāyā and Aparā is Māyā or Avidyā. Mahāmāyā acts jointly with Shiva as formal cause to bring forth effects conducive to the ultimate realisation of the Self ( Moksha ) while the inscrutable ways of Māyā encases the self in the body. Mahāmāyā in union with Shiva brings forth all that is pure and conducive to Moksha or ultimate liberation whereas Māyā in union with Shiva has produced all that veils knowledge of the self and thereby causes birth, death, infirmity, diseases, sorrows and miseries and other bondages of an individual.

## Pashu or the Jiva

Jīva has been defined in the text as below :—

Dehānyonashvaro vyāpi vibhinnaḥ samalo-jadah
Svakarmaphalabhuk Kartā kiñcijñaḥ Seshvaraḥ pashuḥ.

Pashu or Jīva is the embodied self. In him the soul has become individualised or circumscribed. He dwells in a material body but is neither matter nor the body. Unlike body he is ever-enduring. He is also pervasive though he lives distinct from other embodied and individualised souls.

## LIBERATION & THE STEPS LEADING TO IT.

Athātmā Vimalo baddhah punarmuktashcha dikshayā.
Vijñeyah sa tridhāvasthah Kevalah Sakalosmalah.

Jīvātmā, which is fettered with multiple limitations and in the end becomes free through dikshā is naturally pure. It has a threefold state, Kevala

appearing to be impure, though absolute in essence, Sakala ( fettered with Kalā etc. ) and Amala ( pure ). The last stage can only be achieved as a result of initiation and practical lessons received from the Guru ( Preceptor ). It ultimately leads a Jiva to Liberation when it becomes Shiva as it were. The knowledge of Jīva, who is essentially Shiva himself, had been blurred and shrouded with five Kañchukas ( sheaths ) through which Māyā was operating. Śuddha vidya, revealed through proper initiation from a competent Guru, removes those veils. All the impurities in the creature ( Pashu ) fall off and it becomes one with the Lord of Pashus ( Shiva, the Pashupati ). He thus attains the highest goal of life *i.e.* the knowledge of his own real nature. It is just like one regaining his consciousness.

The text goes on to say—

Vivekino viraktasya jijñāsā chopajāyate.
Jijñāsopeta chaitanyam Pashung sansārasāgarāt.
Jighrikṣayā yunaktena yuktam prerayati prabhuh.

This quest for the Real becomes keen when the phenomenal world of experience appears to a Jīva to be transient and full of unhappiness, miseries and incongruities.

The All-merciful Parama Shiva grants this dawning of discriminative knowledge to the embodied soul through His Anugraha Shakti and inspires an efficient and competent Sādhaka ( devotee ) to be gracious to this creature as a preceptor and to unfold to him the true nature of the self as well as the universe.

"Sa deshikamanuprāpya Dikshā vicchhinna bandhanah
Prayāti shivasayujyang nirmalo nirupaplavah."

The Jīva, into whom the Gracious Shiva instills the Shakti ( Shaktipāta ) to feel an urge to meet and surrender itself to the mercy of a powerful Guru, versed in the true and perfect knowledge of Self and skilled in the practices leading to its attainment, becomes free of all kinds of impurities ( Mala ) and shines in his pristine glory as Shiva himself.

"Gururjathāgratah Shiṣyam suptan dandena bodhayet,
Shivopi mohānidrayam suptangśchaktyā prabodhayet."

Shiva awakens the Jīva from the sleep of nescience by inspiring it, through His Anugraha Shakti, just as a preceptor rouses, by a stick, a disciple found asleep neglecting his daily duties.

"Aśarirang yadātmānam pashyati jñana chakshuṣā
Tadā bhavati shntātma sarvvato vigatasprihah."

Through the Divine eyes of knowledge, the Jīva realises its all pervading nature, beyond the physical limitations and the material body and casts away the sheaths of Māyā and desire which gradually helps it to be composed, tranquil and serene and to stick to its true nature.

"Anena kramayogena parām kevalatām gatah
Anādyasuddhi śūnyatvād prapnoti na bhavantaram."

By going through the various stages of yoga described in the text, the Sādhaka ( devotee ) discards all kinds of dualistic experiences and ultimately attains the state of the Absolute Self. The five sheaths of Niyati, Kāla, Kalā, Rāga and Avidyā lose their hold on it and can no further effect any illusion causing miseries and cycles of life and death. Such a Jiva will never be born again, being freed from all Sangskāras ( inborn tendencies ).

"Pashubhāvād yadātitya Patibhāvena tisthati
Tat tasya gamanam nāma sarvajñe gamanam kutaḥ."

The Jīva, who in its true nature, was nothing but Shiva, though not conscious of it, now discovers that truth revealed through the grace of the All-merciful Guru, who is also none but the Lord of the Universe.

"Bhagne ghate yathā dipah sarvvatah samprakāshate
Dehapāte tathā chātmā bhāti sarvvatra sarvvadā."

The material body of a Jivanmukta Purusha continues till its prārabdha karma is fully exhausted. When however it quits the body, the eternal Soul, so long encased in it, shines forth in its perfect radiance and glory and ultimately unites with the Eternal, All-good and All-blissful Supreme Self, the Shiva ( The Lord of the Universe ). This can be compared with a flame obstructed by the body of a vessel in which it was placed, shining in its natural brilliance after the vessel is broken to pieces.

The Moksha ( Liberation ) is the state in which there is an eternal rest from worldly sufferings which desire brings upon men. The individualised self ( Jīvātmā ) merges in the transcendent spirit, the Supreme Consciousness leading to a state of eternal bliss beyond the worlds of changing forms. This cannot be gained by mere philosophical speculation. All that will count is what we are, and how to realise the fundamental truths as embodied in the Mahāvākyas ( grand sayings ) of the Vedas—

Mahāvākyas :—

(1) **Prajnanamanandang Bramha.** ( Perfect knowledge and Bliss is the Brahman. )

(2) **Ahang Bramhasmi.** ( I am none but the Supreme Brahman )

(3) **Tattvamasi.** ( That thou art. )

(4) **Ayamatma Brahma.** ( This self is surely none but the Brahman itself ).

The Divinisation of the embodied Soul ( Jīva ) sets in with the above supreme knowledge ( Parājnānam ) as a result of proper initiation from a competent Guru according to the Agama Shāstras. This has been dealt with in this treatise in a masterly way. The readers are sure to derive much benefit in going through it.

**Om. Tat. Sat.**

Kālikāshram, Belur
May 19, 1943.

Shri Bhairabananda.

श्रीमद् आर्थार एभेलन् प्रवर्त्तित

तन्त्रप्रकाश-ग्रन्थमाला—२२

—सटीक—

# शतरत्न-संग्रहः

शैवतन्त्र-स्वतन्त्र-

श्रीमद् उमापति शिवाचार्य-

संगृहीतः

मेदिनीपुर-मण्डलान्तर्गत-

मालञ्च-ग्रामवास्तव्य-

पण्डितप्रवर-

श्रीमत् पञ्चानन शास्त्रि-

तर्क-सांख्य-वेदान्ततीर्थ-

सम्पादितः

श्रीमता विभुपद घोषेण

७ए, चालतावागान लेनस्थ-

आगमानुसन्धानसमितितः

प्रकाशितः

संस्कृत बुक डिपो

२८।१, कर्णवालिस ष्ट्रीट,

कलिकाता

संस्कृतपुस्तक भाण्डार

३८, कर्णवालिस ष्ट्रीट,

कलिकाता

प्राप्तिस्थानम् :—७ए, चालताबागान लेन,
संस्कृतपुस्तक भाण्डार,
संस्कृत बुक डिपो,
कलिकाता

Title page and Index
printed at
Bishwamitra Press. Calcutta.
1944.

प्रकाशक—
श्रीविभुपद घोष बि-ए
सम्पादक
आगमानुसन्धानसमिति

श्रीः

श्रीउमापतिशिवाचार्यकृत-

# शतरत्नसंग्रहम्

वन्दे कुन्देन्दुधवल-दन्तभिन्नान्तरायकम् ।
दानधारापतद्भृङ्ग-संगीतं कुञ्जराननम् ॥
श्रीमद्(१)भ्रसभामध्ये नित्यमानन्दताण्डवम् ।
कुर्वाणमुमया देव्या सेव्यमानं शिवं भजे ॥

कालादितत्त्व-परिणामधुरीणमाया-विक्षोभक-स्फुरदनन्तनियोगधुर्यः ।
शुद्धाध्वजन्मपटुबिन्दुविजृम्भकारि-पाशान् विमोचयतु नः परमेश्वरोऽयम् ॥

चिदम्बरे क्लृप्तमठः शिवश्रीरुमापतिर्नाम शिवागमज्ञः ।
स्व(२)यम्भुनिश्वासमतङ्गदेव्यामतं मृगेन्द्रं किरणं पराख्यम् ॥

श्रीदेवीकालोत्तरविश्वसारं
ज्ञानोत्तरं वीक्ष्य दशापि चैकम् ।
साराणि सूत्राणि शतं गृहीत्वा
चकार बन्धं शतरत्नरूपम् ॥

कर्णभूषणयोग्यानामागमज्ञानशालिनाम् ।
अमीषां शतरत्नानामुल्लेखः क्रियते मया ॥

एषां च सूत्राणां रत्नत्वं राजनाद्(३) भुक्ति-मुक्ति-रागोत्पादकत्वात्(४) इष्टविधानाच्च । यथा रत्नत्रये—

राजनात् सर्वतत्त्वेषु रागादेभ्योऽधिकारयोः ।
रत्नानीष्टविधानाच्च बिन्द्वाद्याः(५)शिवशासने ॥ इति ।

---

रत्नत्रये त्वेवमुक्तम्:—

राजनात् सर्वतत्त्वेषु रागादिभ्योऽधिकारयोः ।
ईश्वराणां शिवानाञ्च धारणीयतया धिया ॥ ४
पुंसामप्रतिघोदारमरीचिनिचयेन च ।
रत्नानीष्टविधानाच्च बिन्द्वाद्याः शिवशासने ॥—रत्नत्रयम् ॥ ५

---

Or (१) मद्दस० (२) स्वायम्भू० (३) राजसाद० (४) त्वादत्वात्० (५) बिन्द्वाद्यो:

इह जगति कलिकालावेशात् आगमार्थे लुप्ते पाषण्डमताभिवृद्धौ सत्यां गुरुशिष्यक्रमे च सङ्कीर्णे स्वशिष्यान् अनुग्रहीतुकामः परमकारुणिकोमापतिशिवाचार्यस्तावदखिलागम-ज्ञानकाण्डसारभूतं संसारपाशसन्दानितानां(१) पशूनां पशुत्वनिवृत्ति-शिवत्वाभिव्यक्ति-हेतु-ज्ञान-दीक्षास्वरूप-विवेचक-सिद्धान्तनिर्णयं सूत्र(२)रत्नशतं संजग्राह। तस्य संग्रहस्य सद्यो-ज्योतिःपाद-रामकण्ठ-नारायणकण्ठाघोरशिवादिव्याख्यानुसारेण अस्मद्गुरुसम्प्रदायानुसारेण च व्याख्या क्रियते। सा च व्याख्या का ?

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।
आक्षेपोक्तिसमाधानं व्याख्यानं पञ्चलक्षणम्॥ इति।

तत्र प्रथमं(३)ग्रन्थादावभीष्टदेवता-नमस्कारस्य वस्तु-निर्देशस्य च वक्तव्यतयाऽयं संग्रहकारस्तादर्थ्येन स्वायम्भुवसूत्रं प्रथमं गृह्णाति—

**शिवं प्रणम्य परमं निधनेशमतः परम्।**
**ज्ञान-दीक्षे प्रवक्ष्यामि ते शृणुध्वं समाहिताः॥ १**

अत्र शिवशब्देन सर्वार्थज्ञानकर्तृत्वलक्षणो विघ्नविनाशहेतुरशिवापहः पशूनां च शिवप्रदः अप्रमेयत्वादिरूपः शान्त्यतीतः परमेश्वरः प्रतिपाद्यते। यथा तत्रैव—

अप्रमेयमनिर्देश्यमनौपम्यमनामयम्।
सूक्ष्मं सर्वगतं नित्यं ध्रुवमव्ययमीश्वरम्॥
अप्रमेयमनन्तत्वाद(४)निर्देश्यमलक्ष्यतः।
अनौपम्यमसादृश्याद् विमलत्वादनामयम्॥
सूक्ष्मं चानुपलभ्यत्वाद् व्यापकत्वाच्च सर्वगम्।
नित्यं कारणशून्यत्वादचलत्वाच्च तद् ध्रुवम्॥
ॐकारात्मतया भाति शान्त्यतीतः परः शिवः। इति।

---

'रत्नानि यथा लोके राजन्ते महार्घतया प्रकाशन्ते। समीपवर्त्तिनाञ्च रागमुत्पादयन्ति। पुरुषैश्चावयवैर्धार्यन्ते। दीप्तिमन्तीष्टविधायीनि च भवन्ति। तथा बिन्द्वादयः पदार्थाः सर्वेषु शक्त्यादिषु तत्त्वेषु उपादानतयाऽधिष्ठातृत्वेन च प्रकाशन्ते ईश्वराणामनन्तादीनां शिवानां च सदाशिवादिपदस्थानामात्मनामेभ्यो हेतुभूतेभ्यो यथास्वमधिकारयोरनुग्राह्यानुग्राहकत्वरूपयोः सदा रागो भवति। पुरुषाणां चैते धिया ध्येयतया धार्यन्ते। अप्रतिहत-विलक्षणतेजसो भुक्तिमुक्त्याख्याभीष्टप्रदायिनश्च भवन्ति। तस्मादेतेऽपि शिवशास्त्रे रत्नानि प्रोच्यन्त इत्यध्याहारः। अप्रतिहतविलक्षणतेजस्त्वया चैषामतिशयं दर्शितम्''।—रत्नत्रयोल्लेखिनी पृ० ३

---

Or (१) न्तानितानां (२) सूत्ररः० (३) थसग्रन्था० (४) मलक्ष्य०

मुक्तात्मनामप्येतल्लक्षण-लक्षितत्वात् तेषामपि नमस्कार्यत्वं स्यात्, तन्मा भूदिति तस्य विशेषणतया परमपदमुक्तम्। परमः अनादिसिद्ध इत्यर्थः। मुक्तात्मनां तु तत्प्रसादलब्ध-शिवत्वयोगितया ततो वैषम्यम्। तदुक्तमाचार्यैः—

मुक्तात्मानोऽपि शिवाः किन्त्वेते तत्प्रसादतो मुक्ताः।
सोऽनादिमुक्त एको विज्ञेय······इति। [ तत्त्वप्रकाशः—६ ]

तादृशं शिवं नमस्कृत्य। अतः परं शिवप्रसाद-विधूत-बन्धनमाविर्भूतसर्वार्थज्ञानक्रियं सर्वानुग्राहकं स्वगुरुं निधनेश-नामानं तन्त्रा(१)वतारकं रुद्रं च प्रणम्येति सम्बन्धः। तदुक्तं कामिके—

निधनेशात्(२)स्वयंभूतं त्रिकोट्यर्धेन सम्मितम्।
निधनेशात् स्वयम्भूतं श्रुतवान् नलिनोद्भवः॥ इति। (१।५९)

अत्र स्वयम्भूतशब्देन स्वायम्भुव आगम उच्यते। ज्ञानदीक्षे प्रवक्ष्यामीति। ज्ञानं च दीक्षा च ज्ञानदीक्षे इति द्वन्द्वसमासः। प्रवक्ष्यामि प्रकर्षेण वक्ष्यामीति प्रतिज्ञा-वचनमिदम्। अनया ज्ञानप्रतिज्ञया पत्यादिपदार्थानामपि तज्ज्ञेयानामर्थात् प्रतिज्ञा-सिद्धिः। द्वन्द्वनिर्देशश्च द्वयोरपि प्राधान्यज्ञापनार्थः। कस्यचिज् ज्ञानं प्रधानं, कस्यचिद् दीक्षेति दीक्षाव्याख्या। तयोः कर्त्तुराचार्यस्य ज्ञानं प्रधानम्, मुमुक्षोस्तु दीक्षेति। ज्ञान-दीक्षयोः पतिपदार्थेऽन्तर्भावेण तन्त्रार्थसारतया प्रवक्ष्यामीति प्रतिज्ञा कृता। ततः स्वयं शिवशक्तिनिपाताच्छिवदीक्षया संस्कृतान् ज्ञानार्थिनोऽधिकारयोग्यान् बालखिल्यान् षष्टि-साहस्रसंख्याकान् ऋषीन् समाधायावस्थापयति—ते शृणुध्वं समाहिता इति। ते प्रकृते ज्ञानदीक्षे समाहितमनसो भूत्वा शृणुध्वमित्यर्थः। अनेन प्रथमसूत्रसंग्रहेण संग्रह-कारेणाऽप्यनेन देवगुरुनमस्क्रिया-प्रतिज्ञा-स्वशिष्यसावधानावस्थापनानि कृतानीति बोध्यम्। अध्यापकस्य बोध्यबोधकलक्षणः परा(३)दिकः पञ्चविधः सम्बन्धः। तत्र शिव-सदा-शिवयोः सम्बन्धः परः, सदाशिव-निधनेशयोर्महान्, निधनेश-स्वयम्भुवोर्दिव्यः, स्वयम्भु(४)-बालखिल्यानां दिव्यादिव्यः, बालखिल्य-मनुष्याणामदिव्य इति पञ्चविधः सम्बन्धः परादिको बोद्धव्यः। तथोक्तम्—

परो महांस्तथा दिव्यो दिव्यादिव्यस्तथैव च।
अदिव्यश्चेति पञ्चैते सम्बन्धाः(५) परिकीर्त्तिताः॥

अस्य संग्रहस्य तु ज्ञानादिर्वि(६)षयः। तज्ज्ञानं फलम्। ज्ञान-दीक्षयोरस्य च

Or (१) तवा० (२) निधनेशस्वयं भूतत्रिकोट्यर्धेन कीर्त्तितः (३) पाद्रा० (४) भुव० (५) स्वन्धः (६) द्विविषयः

प्रतिपाद्य-प्रतिपादकभावः सम्बन्धः। दीक्षितास्त्वधिकारिण इति विषय-प्रयोजन-सम्बन्धाधिकारिणो ज्ञेयाः ॥ १ ॥

अथात्म(१)प्रतिज्ञातयोर्ज्ञानदीक्षयोः प्रतिपाद्य-प्रतिपादकभाव-सम्बन्ध-प्रयोजन-निर्देशकतया रौरव(२) स्वायम्भुवस्यादिमं(३) सूत्रं संगृह्णाति—

अथाऽऽत्म—मलमायाख्य—कर्मबन्ध—विमुक्तये ।
व्यक्तये च शिवत्वस्य शिवाज् ज्ञानं प्रवर्तते ॥ २

अथ चिच्छक्तिसंनिरोध-कर्त्रधि(४)कारक्षयाभिमुखभावादनन्तरम्। आत्ममलमायाख्य-कर्मबन्धविमुक्तये—आत्मनामणूनां मल(५)रूपो मायारूपः कर्मरूपो यस्त्रिविधो* बन्धस्तद्विमोचनाय। शिवत्वस्य व्यक्तये च शिवभावप्रकाशनाय च। शिवात् परमशिवात् ज्ञानं प्रवर्त्तते उत्पद्यत इत्यर्थः। इदञ्च मूलसूत्रं,(६) तन्त्रार्थ-निरूपकत्वादथ-शब्दाद्यलङ्कृतत्वाच्च। तथा मृगेन्द्रे—

यत्र बीजमिवारूढो महातन्त्रार्थपादपः ।
आभाति मूलसूत्रं तदथ(७)शब्दाद्यलङ्कृतम् ॥ इति। †

अत्रात्मनो व्यापकस्य शिवत्वसन्नि(८)रोधको मलः। तेन प्रतिब(९)द्धशिवत्वोऽसौ नोपायं विना ज्ञेयं कृत्यं वा ज्ञातुं कर्त्तुं वा शक्नोति। तस्य(१०) हि भोगोपायापेक्षस्य मायाख्यो बन्धः कलादिकः प्रति(११)पाद्यते। माया जगद्योनिः। तदाख्यो बन्धो यः स तथाख्यायते। भोगसाधनोपेतस्य भोगाभिप्रेतस्य भोग्यं कर्म धर्माधर्मसमाख्यातमिति। अयमात्मनो मलादिकस्त्रिविधो बन्धः। यतो हि अनेन युक्तस्य न सर्वत्र युगपत् शिवत्वं प्रकाशते। तस्यात्मनो(१२)स्मात् त्रिविधाद् बन्धाद् विमुक्तये शिवत्वव्यक्तये च शिवाद(१३)नुजिघृक्षो (१४)र्ज्ञानं प्रवर्त्तते। पशुभ्यः पाशेभ्यश्च यज् ज्ञानं प्रवर्त्तते, तत्

* तत्त्वप्रकाशादिषु ग्रन्थेषु 'अर्थपञ्चकं पाश' इत्यादिना मल-कर्म-स्थूलसूक्ष्ममाया-पाशानुग्राहकशिवशक्तीनां पञ्चानामर्थानां बन्धत्वमभिहितम्, अत्र तु त्रैविध्यमिति कथं न विरोध इति नाशङ्कनीयम्। मलकर्ममायाख्यानां पाशानां जडानां स्वकार्यकरणासामर्थ्यात् तदनुग्राहकतया स्वीकृतायाः परमेश्वरशक्तेः गौणपाशत्वात् स्थूलसूक्ष्म-भेदभिन्नाया मायाया एकत्वविवक्षया च बन्धत्रैविध्योपपत्तेः।

† मुद्रितभागे मृगेन्द्रे श्लोकोऽयं नोपलभ्यते।

Or (१) थात्म (२) गौर॰ (३) दिकमं॰ (४) कर्तृधि (५) मत्॰ (६) सूत्र॰ (७) दर्थ॰ (८) संबि॰ (९) प्रतिबन्ध॰ (१०) तस्या॰ (११) तिपद्य॰ (१२) नो सावि॰ (१३) निवा॰ (१४) जिघ्नक्षाज्ञा॰

पशुरूपव्यञ्जकत्वात्(१) पाशरूपत्वाच्च प्रत्युत पाशानां द्रढिमानं जनयति। शिवस्तु पशुपाशविलक्षणः पाशप्रतिपक्षभूतः सकलसामर्थ्योप(२)चितः, तस्माद्(३)यज् ज्ञानं प्रवर्त्तते, तत् पाशानां निवृत्तये पर्याप्तं दृढं च। समानजातीयस्य प्रतिबद्धशक्तिकस्य समानजातीयमेवाप्रतिबद्धशक्तिकं शक्तिव्यञ्जकम्। शिवश्चात्मनः समानजातीयः। तस्य प्रतिबद्धशिवत्वस्याप्रतिबद्धशिवत्वोऽसौ शिवत्वव्यक्त्यै(४) सत् ज्ञानं प्रवर्त्तयतीति युक्तम्। अत्र च ज्ञानपदेन शिवशक्तिवाचकेन अवबोधरूपं दीक्षारूपं च द्विविधमपि संगृहीतम्।

ननु दीक्षायाः कथं ज्ञानरूपत्वमिति चेत्? उच्यते। यथा सवितु(५) र्गभस्तिरर्थप्रकाशको(६) दाहमपि कुर्वन्(७) प्रकाशरूपतां न जहाति उभयरूपोऽपि प्रकाश(८) इत्युच्यते। तत्रापि ज्ञानरूपतां(९) न जहाति। तेनोभयरूपं ज्ञानमित्युक्तम्।

मल-मायाख्य-कर्मबन्धयुक्तत्वम् अनुग्राह्यलक्षणम्। एतद् व्यस्तं समस्तं * च विवक्षितम्। केषाञ्चिन्मलयुक्तानामनुग्रहः। केषाञ्चिन्मलकर्मयुतानाम्। केषाञ्चिन्मलमायाख्ययुतानाम्। केषाञ्चिन्मलमायाकर्मयुतानामनुग्रहः। कुत एतद् व्यस्तं(१०) समस्तं च विवक्षितमिति। यतः(११)अकलानामपि शोध्यत्वं बोध्यत्वं च वक्ष्यति। ते च अकला द्विरूपा विज्ञानाकलाः प्रलयाकलाश्च। तेषामुभयेषामपि मायाख्यस्तावन्नास्ति। विज्ञानाकलाः क्षीणकर्माणः। तेषामपि ये निरधिकारेणानुग्रहेणानुगृहीतास्ते शिवतुल्या भवन्ति। ये साधिकारेणाऽनुगृहीतास्ते मायातीता विद्याविद्येश्वरा भवन्ति। मलमायाख्ययुक्तानामपि अनुग्रहः सम्भविष्यति। कुतश्चिदुपाया(१२)त् क्षीणे कर्मणि मायाख्यो बन्धः स्वकारणे प्रलयं याति(१३)। तस्य च प्रलयाभिमुख्यकाल एव कदाचित् परमेश्वरशक्तेरनुग्रहः(१४), प्रवृत्तिकालस्यानियतत्वात्; आत्मनोऽपि चिच्छक्तिसंनिरोधकत्र्यधिकारक्षयाभिमुख्यकालस्य नियतत्वात् तदनुग्रहो भवत्येव। अस्मदादीनां मायादिमण्ड(१५)लस्थानां च विद्याविद्येश्वराणां च मलमायाख्यकर्मबन्धप्रहाणम(१६)नुग्रहः, यतस्तेषा(१७)मपि मायादिमण्डलस्थानां विद्याविद्येश्वराणां कलादियुक्तानां भोगभुजां सतामनुग्रहः। इदं तर्हि शिवाज्(१८) ज्ञानं प्रवर्त्तत इति अनुग्रहोपायलक्षणमव्यापकं, इच्छामात्रेणापि केषांचिदनुग्रह इष्यते। सा चेच्छा ज्ञाने अव्याप्तेति चेत्? न। इच्छापि शिवशक्तिरेव। सा च दानक्षपणलक्षणत्वात् दीक्षान्तःपततीति बोधरूपत्वात्यागाच्च(१९) ज्ञानमित्यनेन व्याप्यत एवेति।

* व्यस्तं समस्तमिति। तथाचोक्तं तत्त्वप्रकाशे—

पशवस्त्रिविधा ज्ञेया विज्ञानप्रलयाकलाः सकलाः।
मलयुक्तस्तवाद्यो मलकर्मयुतो द्वितीयश्च ॥ १। ८
मलमायाकर्मयुतः सकल···। इति।

Or (१) व्यङ्गत्वा० (२) पश्चि० (३) स्माद्य० (४ येस् सज्ञा० (५) सविदु० (६) श्रिका० (७) वंति० (८) काशि० (९) रूपता० (१०) व्यस्तं चैव वि० (११) तकेवला० (१२) दुपाया० (१३) यादि (१४) नुग्रह प्र० (१५) मङ्गल० (१६) बन्धमनु (१७) स्तेका० (१८) वज्ञा० (१९) त्वादित्यागमा०

नन्वेवं ज्ञानस्यैव निवृत्ति-तत्त्वा(१)भिव्यक्तिहेतुतया क्रियादि-योगचर्याणामानर्थक्यं प्राप्तमिति चेद् । बाढम् । तथापि चर्या-क्रिया-योगानां विद्यातत्त्वादिक्रमेण शिव-सालोक्य-सामीप्य-सारूप्य-सम्पादनद्वारा शिवसायुज्यदायकज्ञानहेतुत्वेन वैयर्थ्याद्य(२)भावात् । यथा देवी-कालोत्तरे—

ज्ञानोत्पत्तिनिमित्तं तु क्रियाचर्याः प्रकीर्त्तिताः ।

तथाच सुप्रभेदे—योगाभ्यासं ततः कृत्वा ज्ञानं तत्र तदाभ्यसेत् ।

तदाऽज्ञानान्धकारं च ज्ञानदीपेन नाशयेत् ॥

शिवज्ञानबोधसंग्रहे—

अथ चर्या-क्रिया-पादं योगपादं तथैव च ।
ज्ञानपादं क्रमाच्चैव शिवेन परिभाषितम् ॥
एतच्चतुर्विधं मार्गं सालोक्यादि-फलप्रदम् ।

सुप्रभेदे— सालोक्यं चैव सामीप्यं सारूप्यं सायुज्यकं तथा ।

अत्र चर्यादि-चतुष्टयेऽपि दीक्षायाः अधिकारसम्पादकतया साम्येऽपि ज्ञानफल-सायुज्यरूपोर्ध्वगतिसम्पादकतया ज्ञानेन समप्राधान्यमुक्तम् । तथा वक्ष्यति संग्रहकारः—

यस्मात् प्रविततादू बन्धात् परसंस्थानिरोधकात् ।
दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपि ॥ इति ।

अत्र च दीक्षाभेदः क्रियाकरणमण्डने प्रदर्शितः—

निर्वी(वि)शेषकृता तूपाधिकरणाचार्यस्थितेनाऽमुना
साधारा तु चतुर्विधा सह विना बीजाधिकारक्रमात् ।
द्वेधाद्या शिवलोकधर्मभजनात् तत्रादिमा भौतिकी
नैष्ठिक्य(३)प्यपरा तु जातिचरिता त्यागात् कृता संस्क्रिया ॥
निर्बीजा द्विविधा नृणाममृतदा सद्यश्चिरेणापि या
नित्याद्याश्रयवजनात् तु सदधिकाराधिकारोज्झिता ।
साधारेति चतुर्विधा पुनरियं ज्ञानक्रियाभ्यां द्विधा
ज्ञानी(४) ज्ञानवतां क्रिया त्वविदुषां या चाक्षुषी(५)पूर्विका ॥ इति ॥ २

अथ ज्ञानपदोपात्तदीक्षारूपाद् व्यतिरिक्तज्ञानस्य द्वैविध्यं देव्यामतसूत्रेण संगृह्णाति—

**ज्ञानं द्विविधमाख्यातं परं(६) चैवापरं स्मृतम् ।**
**परं चैवावबोधाख्यमपरं शास्त्रमुत्तमम् ॥ ३ ॥**

Or (१) त्तिवत्वा० (२) र्थादि० (३) नैष्ठिका० (४) ज्ञानि (५) चाक्षुषि (६) पारं वाचारपं०

तत्र परापरभेदेन ज्ञानं द्विविधम्। परमवबोधरूपम्। अपरं कामिकादि-तन्त्ररूपमित्यर्थः। तथा सा(१)त्वतसंहितायाम्—

ज्ञानं शिवं परं बोधमपरं तन्त्र(२)संज्ञितम्। इति।

अव(३)बोधरूपं ज्ञानं च शिवस्य शक्तिरेव। सा च द्विविधा समवायवर्त्तिनी परिग्रहवर्त्तिनी चेति। तत्र समवायवर्त्तिन्यपि द्विविधा बोधरूपा(४) क्रियारूपा चेति। तत्र बोधरूपा सर्वार्थपरिच्छेत्त्री। क्रियारूपापि द्विविधा। अनुग्रहपरूपा तिरोभावरूपा चेति। तथा चोक्तम्—

अनुग्रह-तिरोभावौ द्वौ धर्मौ हि सदाशिवे। इति।

अत्र परावबोधरूपं ज्ञान(५)मपरज्ञानरूपशब्दारूढ़मेवार्थेषु प्रवर्त्तते। नन्विदं(६) ज्ञानं दीक्षायाः फलम्, अतः कथं ज्ञानदीक्षयोरनुग्रहोपायतासाम्यमुक्तम्? सत्यम्। किन्तु ज्ञानमाचार्यं(७) साध्यं साधनं च ज्ञापयति। स च तस्माद् विदितसाध्यसाधनोऽनुग्राह्याणां साध्यसिद्धये साधनं प्रयोक्तुं शक्नोति। सर्वत्र च मुक्तिवा(८)दिनो मुक्तिसिद्धये ज्ञानमेव प्रतिजानीते। न चानुष्ठानं विनासौ भवितुमर्हति। यत्रापि च ज्ञानादेवेति, तत्रापि च सा(९)धनानुष्ठानमवश्यम्भावीति। तस्माद् ज्ञानदीक्षयोरुभयोरपि समानतयाऽनुग्रहोपायत्वं पूर्वसूत्रोक्तमुपपन्नम्॥ ३॥

अथावबोधरूपस्य परज्ञानस्य दर्शनात्मताप्राप्तिक्रमं मृगेन्द्रसूत्रेण[२१]दर्शयति—

**सृष्टिकाले महेशानः पुरुषार्थ-प्रसिद्धये।**
**विधत्ते विमलं ज्ञानं पञ्चस्रोतोऽभिलक्षितम्॥ ४**

सृष्टिकाले सर्गारम्भे महेशानः परमेश्वरः पुरुषार्थप्रसिद्धये पुरुषार्थस्य परापरमुक्तिभुक्त्यात्मनः संप्राप्त्यर्थम्। विमलमिति। अवबोधात्मनो नादरूपत्वेन प्रथमं प्रसृतत्वादगृहीतोपाधि(१०)भेदम्। पञ्चस्रोतोभिलक्षितं पञ्च च तानि स्रोतांसि पञ्चस्रोतांसि ऊर्ध्व-पूर्व-दक्षिणोत्तर-पश्चिमाननानि(११) अभितः समन्ता(१२)त् लक्षितं प्रसृतत्वेन लक्षितम्। सदाशिवरूपेण कामिकादिभिन्नदर्शनात्मतां प्रा(१३)प्तमिति यावत्। तादृशं ज्ञानं शास्त्ररूपं विधत्ते निर्मिमीते। निष्कलाच्छिवात् अवबोधरूपं ज्ञानमेव प्रथमं नादरूपत्वेन प्रसृतम्। पश्चात् सदाशिवरूपात् तन्त्राकारतां प्राप्तमित्यर्थः। तदुक्तं पौष्करे—

अदृष्टविभवाच्छान्ताच्छिवात् परमकारणात्।
नादरूपं विनिष्क्रान्तं शास्त्रम्··· ॥ इति॥

Or (१) सांतन० (२) तत्त्वसम्मितमिति० (३) अपबो० (४) रूपः (५) म्। अपिर० (६) नन्वितं। (७) चार्यसा० (८) नादिनो० (९) ससा० (१०) तीवधि० (११) माननेः (१२) समंता अल० (१३) प्राप्ति०

तत्रैव—सदाशिवोऽपि भगवान् नादरूपतयागतम् ।
षट्पदार्थमयं(१) ज्ञानमनेकच्छन्द एव तत् ॥

ननु निष्कलशिवस्य वागिन्द्रियादिरहितस्य कथं नादोत्पादकत्वमिति चेत्? न। इन्द्रियादि-रहितस्यापि अयस्कान्तस्य लोहाकर्षणसामर्थ्यवच्छिवस्यापि तत्सामर्थ्योपपत्तेः। तदुक्तं पराख्ये—

सन्निधानेन यस्या(२)ऽस्मिन् सर्वकार्यस्य सम्भवः ।
अक्षहीनेऽपि सामर्थ्यं दृष्टं(३)तत्कर्षणात्मनि ॥
सामर्थ्यं तद्वदीशस्य सर्वकृत्ये निसर्गजम् । इति ।

पौष्करे च— वागीन्द्रियानपेक्षस्य शक्तिः सर्वत्र निःसृता ।
अत्यन्तविमलत्वेन तया वक्ति किमद्भुतम् ॥ इति ।

तथा किरणे—

निष्कलः किन्न कल्योऽसौ यद्वाकल्यः कथं जगत् ।
यथाऽत्र कुरुते शक्त्या तथा शास्त्रं न किं प्रभुः ॥ इति ।

अत्र शास्त्रशब्द(४)निर्वचनम्—

शुद्धात्मनां हितं शास्त्रं त्रायते यद् भवार्णवात् ।
तच्छासनपरि(५)त्राणाच्छास्त्रमित्यभिधीयते ॥

तत्र लौकिक-वैदिकाध्यात्मिकातिमार्गिक-मान्त्रिकभेदेन सदाशिवस्य प्रतिमुखं(६) पञ्चविधभिन्नानि पञ्चविंशतिस्रोतांसि भवन्ति। तेष्वेवान्तर्गतं सकलं वाङ्मयं शास्त्रजालम्। तथा कामिके—

लौकिकं वैदिकं चैव तथाध्यात्मिकमेव च ।
अतिमार्गं च मन्त्राख्यं तन्त्रभेदमनेकधा ॥
सद्योवाम-महाघोर-पुरुषेशानमूर्त्तयः ।
प्रत्येकं पञ्चवक्त्राः स्युस्तैरुक्तं लौकिकादिकम् ॥
पञ्चविंशतिभेदेन स्रोतोभेदः प्रकीर्त्तितः ।
एष्वेवान्तर्गतं वस्तु वाङ्मयं वस्तुवाचकम् ॥

तथा सोमसिद्धान्ते—

पञ्चधा लौकिकं तन्त्रं(७) तथा तन्त्रं च वैदिकम् ।

Or (१) मया० (२) यस्त० (३) दृष्ट० (४) स्वशीर्ष० (५) रिसवा० (६) ख० भिन्नानीति पञ्चविधानि (७) तन्वत०

तन्त्रमाध्यात्मिकं तद्वदतिमार्गं तथैव च ॥
तथैव मन्त्रतन्त्राख्यं तेषु यद् बहुधेरितम् । इति ।

एतल्लौकिकादिस्वरूपं सर्वात्मशम्भुकृत-सिद्धान्तदीपिकायां प्रपञ्चितमिह ग्रन्थ-गौरव-भयान्न लिखितम् । तत्रैवाऽवधार्यताम् । तत्र मान्त्रिकं पञ्चविधमपि क्रमेण ऊर्ध्व-पूर्व-कुबेर-वरुण-याम्य-सम्बन्धात् मुक्तिप्रदसिद्धान्त-सर्वविषहरणगारुड़(१)-सर्ववशीकरण-वाम-भूतग्रहनिवारकभूततन्त्र-शत्रुक्षयकरभैरव-संज्ञकम् । तथा कामिके—

तथैव मन्त्रतन्त्राख्यं सदाशिवमुखोद्भवम् ।
सिद्धान्तं गारुड़ं वामं भूततन्त्रञ्च भैरवम् ॥
ऊर्ध्व-पूर्व-कुबेरा-प्य-याम्य(२) वक्त्राद् यथाक्रमम् ।

एतानि सिद्धान्तादीनि कामिके(३) यथा—

सामान्यञ्च विशेषञ्च शैवं वैशिष्टिकं वचः ।

अत्र च शास्त्ररूपज्ञाने वेदादिज्ञानमपरम् । सिद्धान्तज्ञानं परम् । सिद्धान्तज्ञानेऽपि शिवज्ञानं परम् । रुद्रज्ञानमपरम् । शिवज्ञानमपि प्रवक्तृक्रमादा(४)द्यजनकक्रमाच्च परापरत्व(५)माद्ध्यात् । एवं रुद्रज्ञानमपि । तथा उपभेदानामपि परापरत्वमिति परापरभेदा बोध्याः । एवं शब्दरूपज्ञानवत् अवबोधरूपज्ञानस्यापि शुद्धमार्गाऽ (६) शुद्धमार्ग-शिव-सदाशिव-पशु-माया-प्रकाशकत्वादिभिः परापरभेदा मन्तव्याः । तथा दीक्षारूपज्ञानस्यापि नैष्ठिक-भौतिक-निर्बीज-सबीज-शिवधर्मि-लोकधर्म्यादिभिः परापरभेदा ऊहनीयाः । उक्तं स्वायम्भुवे—

तदेकमप्यनेकत्वं शिववक्त्राम्बुजोद्भवम् ।
परापरेण भेदेन गच्छत्यर्थप्रतिश्रयात् ॥

तथा कामिके—आदावभूद् द्विधा ज्ञानमधिकारिविभेदतः ।
परापरेण भेदेन पतिपश्वर्थदर्शकम् ॥
शिवप्रकाशकं ज्ञानं शिवज्ञानं परं स्मृतम् ।
वेदाद्यपरविज्ञानं पशुपाशार्थदर्शकम् ॥
यथा विलक्षणं चक्षुः क्षपायां श्व(७)-विड़ालयोः ।
तथा विलक्षणं ज्ञानमेवमेतत् परापरम् ॥ इति ।

सिद्धान्तज्ञानं कामिकादीनि प्रणवाद्यंशुपर्यन्तानि(८) प्रणीतानि यानि तानि शिव-भेदाभिधेयानि शिवाधिकरणज्ञानं(९) शिवभेद इत्युच्यते । विजयादीन्यष्टादशसंख्यातानि

Or (१) गारुण० (२) याम्यवक्त्राद्य० (३) मिकौ यः (४) क्रमाद्य० (५) परम। (६) मार्गाशुद्ध० (७) न्यवि० (८) नां प्र० (९) करणं शि०।

तन्त्राण्यनादिरुद्रादिरुद्राणां यान्यभिहितानि तानि रुद्रभेदाभिधेयानि रुद्राधिकरणज्ञानं रुद्रभेद इति। अत एव रुद्रात्मभिन्नमष्टादशसंख्यकमिति शिवरुद्रात्मकं तन्त्र(१)मष्टाविंशतिसंख्यकम्।

स्वायम्भुवे—चिन्तामणिरिवात्राऽसौ स्थितः सर्वस्य कारणम्।
एकमेव शिवज्ञानं विभिन्नं दशधा पुनः ॥
तथाऽष्टादशधाभिन्नं भेदान्तरविसर्पितम्।

श्रोतृ(२)भेदो मुकुटतन्त्रे वर्णितः—
श्रोतारः शिवभेदानां पारम्पर्यास्त्रयस्त्रयः।
द्वौ द्वौ तु रुद्रभेदानां षष्टिरुक्ता षडुत्तरा ॥

तद्भेदः किरणे प्रपञ्चितः—
सृष्ट्यनन्तरमेवेशः शिवान् सृष्ट्वा दशात्मजान्।
ज्ञानमेवं विभज्यै(३) कं तेषां तत्संख्यया ऽवदत्(४) ॥
कामिकं प्रणवाख्यस्य सुधाख्यस्य तु योगजम्।
दीप्ताख्यस्यापि चिन्त्यं तु कारणाख्यस्य कारणम् ॥
अजितं सुशिवाख्यस्य ईशस्यापि सुदीप्तकम्।
सूक्ष्मं तु सूक्ष्मसंज्ञस्य कालस्यापि सहस्रकम् ॥
सुप्रभेदं गणेशस्य ह्यंशुसंज्ञस्य चांशुमान्।
एवं प्राथमिकं प्रोक्तं पुनरन्यो गुरुक्रमः ॥
प्रणवात् त्रिकलः प्राप्तः कामिकं त्रिकलाद्धरः।
सुधाख्याद् योग(५)जं तन्त्रं भस्मसंज्ञस्ततः प्रभुः ॥
दीप्ताद्रुद्रात् तु चिन्त्यं च गोपतिश्च ततोऽम्बि(६)का।
कारणं कारणाच्छर्वस्ततः प्राप्तः प्र(७)जापतिः ॥
अजितं(८) सुशिवात् प्राप्त उमेशोऽप्यच्युतस्ततः।
ईशा(९)द् दीप्तं त्रिमूर्त्तिस्तु ततः प्राप्तो(१०) हुताशनः ॥
सूक्ष्मं(११) सूक्ष्माद् भवः(१२)प्राप्तस्तस्मात् प्राप्तः प्रभञ्जनः।
कालसंज्ञात् सहस्राख्यं भीमो धर्मस्ततः खगः(१३) ॥
गणेशात् सुप्र(१४)भेदाख्यं त्वविघ्नेशस्ततः शशी।
अंशुमच्चांशुसंज्ञात् तु प्राप्तो ह्युग्रस्ततो रविः ॥

---

Or (१) तवाम० (२) श्रोतभेदो (३) विधज्योक्त (४) यावत्० (५) योगं तं० (६) तोंपिका (७) प्रजातिः (८) अजितसु० (९) ईशादी० (१०) प्राप्ताहु० (११) सूक्ष्म सू० (१२) भवप्रा० (१३) खग (१४) सप्रभोख्यं।

एवमेते शिवाः ख्याताः शिवभेदा दशाद्यके ।
दशाष्टसंख्य(१)याऽप्यन्यो रुद्रभेदः परो मतः ॥
दशाष्टसंख्यया रुद्रान् पूर्वमुत्पाद्य बुद्धिमान् ।
शिवस्तत्संख्ययैवेह पुनस्तान् बोधयत् खगः (२) ॥
रुद्रस्याऽनादिसंज्ञस्य विजयं तन्त्रमुत्तमम् ।
पारमेशं महातन्त्रं श्रीरूपस्य प्रभाषितम् ॥
निश्वासं यद् दशार्णस्य प्रोद्गीतं नाम शूलिनः ।
मुखबिम्बं प्रशान्तस्य बिन्दोः सिद्धमतो मतम् ॥
शिवनिष्ठ(३)स्य सन्तानं सिंहं सौमस्य चोदितम् ।
चन्द्रहासमनन्तस्य भद्रं सर्वात्मतो मतम्(४) ॥
निधनस्य स्वयम्भूतं विरजं तेजसः स्मृतम् ।
कौ(५)रव्यं ब्रह्मणेशस्य शिवाख्यस्य च माकुटम् ॥
किरणं देवपितुः ख्यातं ललितं चालयस्य तु ।
आग्नेयं यच्च तद् व्योम्नः शिवस्यापि पुनः परम् ।
एते जाताः सहज्ञाने शिवदेहात् पुनः शृणु ॥
प्राप्तश्चानादिसंज्ञात्(६) तु विजयं परमेश्वरः ।
श्रीरूपात् पार(७)मेशं तु प्राप्तोऽस्मा(८)दुशना मुनिः ॥
दशाक्षराच्च निश्वासं सं(९)प्राप्ता शैलसम्भवा ।
प्रोद्गीतं रुद्रसंज्ञात् तु कचाख्यो मुनिसत्तमः ॥
प्रशान्तो(१०) मुखबिम्बन्तु दधीचिर्नाम यो मुनिः ।
बिन्दुसंज्ञाच्च यत् सिद्धं प्राप्तश्चण्डेश्वरो गणः ॥
शिवनिष्ठाच्च सन्तानं संप्राप्तो हंसवाहनः ।
नारसिंहं तु यत् सौम्यान् नृसिंहः प्राप्तवान् महान् ॥
अनन्ताच्चन्द्रहासं तु प्राप्तो देवपुरोहितः ।
भद्रं सर्वात्मदेवात् तु वीरभद्रो महागणः ॥
स्वायम्भुवं तु निधनात् संप्राप्तः पद्मसम्भवः ।
विरजं तेजसः प्राप्तः प्रजारक्षणतत्परः ॥
कौ(११)रव्यं ब्रह्मणेशा(१२)त् तु सम्प्राप्तो नन्दिकेश्वरः ।

Or (१) संख्यान्यप्य० (२) खग (३) निष्टस्य (४) नीनुत्मतं (५) कौरवं (६) संज्ञत्तु
) परामि० (८) प्राप्तौ स्याशना (९) स प्राप्ता० (१०) प्रशान्ता (११) कौरवं (१२) ब्रह्मणेशांतु ।

ईशानात् मुकुटं प्राप्तो महादेवो ध्वजाश्रयः ॥
किरणं देवपितृतः प्राप्तः संवर्तको मुनिः ।
आलयाल्ललितं प्राप्तो रुद्रो भैरवरूपवान् ॥
आग्नेयं व्योमसंज्ञात् तु सम्प्राप्तो हुतभुक् पुनः ।
तन्त्रभेदो मया प्रोक्तश्चात्र(१) संक्षिप्तलक्षणः ॥
येषु भेदेषु यो भेद उपभेदः स उच्यते ।
भेदोऽयमुपचारेण कल्पितः स यतस्ततः ॥
फलभेदो न कल्प्योऽत्र ज्ञानभेदः प्रकल्प्यते ।

इदं ज्ञानं क्रमेण सदाशिवा(२)नन्त-श्रीकण्ठ(३)मुनिगण-परम्परया भूमौ प्रवर्त्तते ।

तथा—अनुष्टुप् छन्दसा पूर्वं निबद्धं(४) बहुकोटिभिः ।
सदाशिवेन देवेन ततोऽनन्तेन धीमता ॥ *

पौष्करे—तेनोक्तं परमेशेन श्रीकण्ठाय महात्मने ।
श्रीकण्ठादृषयो लब्धास्तेभ्यो लब्धाः(५) सुमानवाः ॥

एतन्महातन्त्रं चतुष्पादात्मकं भवति । तथा मृगेन्द्रे ( २।२ )—
) त्रिपदार्थं † चतुष्पादं महातन्त्रं जगत्पतिः ॥ इति ॥ ४ ॥

अन्यशब्दरूपस्य ज्ञानस्योन्मु(६)खे विरसत्वेऽपि परिणामसुखतया भेषजवत् तस्य ग्राह्यत्वमिति प्रतिपादयितुं परा(७)ख्यसूत्रेण तस्य भेषजत्वनिरूपणं करोति—

**ज्ञानमेतच्छिववक्त्रोत्थं संगृहाणात्मभेषजम् ।**
**परिणामसुखं स्वादु विशेषगुणदर्शकम् ॥ ५ ॥**

आत्मभेषजमेतज् ज्ञानं संगृहाण गृह्यतामित्यर्थः । औषधस्य सर्वस्य भूम्युद्भवत्वात् अस्य ज्ञानरूपौषधस्यापि उत्पत्तिभूमिं दर्शयति—शिववक्त्रोत्थमिति । शिव

* मातङ्ग-पारमेश्वरे त्वेवमुक्तम्—
अनुष्टुप्छन्दसा पूर्वं निबद्धं कोटिसंख्यया ।
सदाशिवेन देवेन ततोऽनन्तेन धीमता ॥
—मातङ्गपारमेश्वरम् । १।३१

† त्रिपदार्थमिति । पति-पशु-पाशरूप-पदार्थत्रयप्रतिपादकम्, पदार्थान्तराणामत्रैवाऽन्तर्भावात् । चतुष्पादमिति । क्रिया-चर्या-योग-विद्यापादैर्विभक्तमित्यर्थः ।

Or (१) श्चाधं सं (२) वमनन्तरं० (३) श्रीकण्ठं (४) निवन्धं (५) लब्धासु (६) स्वोमुखे (७) पर्याख्य० ।

एव क्ष्मा भूमिः, तदुत्थं तदुत्पन्नमित्यर्थः। पुनः कीदृशम्? परिणामसुखम्। परिणामः उदर्कः * उत्तरकालसुखकरम्। स्वादु अमृतसमानत्वात्। विशेषगुणदर्शकं सर्वज्ञत्वादिगुणानामभिव्यञ्जकम्। औषधपक्षे विशेषगुणस्य स्वास्थ्यस्य(१)दर्शकम्। अनेन विशेषणत्रयेणाऽपि ज्ञानस्याऽस्य अग्राह्यताशङ्का निरस्ता। लोके उदर्कसुखकराणाममृतरूपाणां विशेषगुणसम्पादकानां पदार्थानां सर्वैरपि ग्राह्यत्वादिति। आत्मभेषजमित्यस्याऽभिप्रायः—यथा चक्षुषः प्रकाशनशक्तिः वर्तमाना पशुत्वमलरुद्धा गुरुरूपेण परमशिववैद्येन परमकृपालुना तद्भेषजज्ञानप्रयोगेण पशुत्वनिरसनद्वारा पुनरभिव्यज्यत इति। तदुक्तं शिवधर्मोत्तरे—

व्याधीनां भेषजं यद्वत् प्रतिपक्षः(२) स्वभावतः।
तद्वत् संसारदोषाणां प्रतिपक्षः शिवः स्मृतः॥
औषधस्य च सामर्थ्याद् यथा दोषं विसर्जयेत्।
तथात्मज्ञानभैषज्याद् दोषं च(३) विनिवर्तते॥
तस्मात् स पण्डितः शान्त(४)स्तपस्वी विजितेन्द्रियः।
शिवज्ञानस्य सम्बन्धाद् भावमालोच्य मुच्यते॥ ५॥

इयता प्रबन्धेन ज्ञानस्य वक्तव्यतां प्रतिज्ञाय तस्य प्रयोजनमुपवर्ण्य तद्द्वैविध्यमभिधाय तस्य बहुतन्त्रभेदाकारितां प्रसाध्य सर्वैरवश्यग्राह्यत्वं च समर्थितम्। इदानीमनेन शिवज्ञानेन प्रतिपाद्यानां पति-पशु-पाशरूपाणां त्रयाणामपि पदार्थानां सद्भावावेदकतया अनुमानं प्रमाणयितुं प्रथममनुमानस्वरूपचतुष्टयं मतङ्गसूत्रेण गृह्णाति—

**धर्मेण साध्यते धर्मी क्वचित् कार्येण कारणम्।**
**कारणेन क्वचित् कार्यं क्वचिदाम्नायदर्शनात्॥ ६॥**

अत्र प्रथमपादेन सामान्यमिति अनुभयात्मकमिति लब्धसंज्ञाद्वयमनुमानमुक्तम्। धर्मेण गन्धादिरूपेण अधिष्ठेयपदार्थेन धर्मी पृथिव्यादिरूपः आधाररूपः पदार्थः साध्यते ज्ञायते। कार्यकारणरूपव्यतिरेकेण धर्मधर्मिस्वभावमात्रप्रतिबन्धमूलत्वादिदमनुभयात्मकं सामान्यमित्युच्यते। तथा योगपादे—

शेषवत् पूर्ववच्चान्यत् सामान्यमपरं स्मृतम्।

---

* उदर्कः फलमुत्तरमित्यमरः।

---

Or (१) स्वास्थ्यद॰  (२) पक्षस्व॰  (३) ज्ञानदोषं च ज्ञानभेषा नि॰  (४) शस्तपस्वी।

एतेनाऽनुमानेन क्वचित् पतिपदार्थप्रकरणे शक्तिरूपधर्मेण शक्ति(१)पतिर्धर्मी(२) साध्यते। यथा वा पशुपदार्थप्रकरणादौ ज्ञानक्रियालक्षणेन धर्मेण पशुपदार्थलक्षणो धर्मी साध्यते। यथा गन्धादेः कस्तूरिकादिः। तथा द्वितीयपादेन कार्यलिङ्गमिति विशेषवदिति च लब्धसंज्ञाद्वयमनुमानमुक्तम्। क्वचित् कार्येण कारणं तद्वत् (३) पदार्थप्रकरणे पृथिव्यादिरूप-कार्येण तन्मात्रादि-मायान्तं कारणं साध्यते। यथा मद-गन्धादिभिर्मत्तगजानुमानम्। तथा—

योग(४)पादे—स्थूलावृत्तशकृत्पुञ्जभूपृष्ठं मदगन्धि च।

स्तम्भशय्यादिभिश्चिह्नैरत्रासीन्मत्तवारणः॥

अतीतो ह्यनुमानेन साध्यः शेषवता बुधैः। इति।

तृतीयपादेन कारणलिङ्गमिति पूर्ववदिति च(५) लब्धसंज्ञाद्वयमनुमानमुक्तम्। क्वचिद् भोगपदार्थप्रकरणे सुकृतदुष्कृतानुष्ठानेन आगमसिद्धकारणभावेन(६) कार्यम् आमुष्मिक-भोगपदार्थः सुखात्मको दुःखरूपो वाऽनुमीयते। उपेयपदार्थानुष्ठानेन सिद्धिमुक्तिलक्षणं च फलमनुमीयते। यथा विशिष्टघनादिभिः कारणैर्वृष्ट्यादिकार्यमनुमीयते। यथाऽत्रैव योगपादे—

कृष्णाञ्जननिभैरुच्चैः सागोपैर्निविडैर्घनैः।

निर्विघ्नै(७) र्विपुलैः स्निग्धै(८)स्तड़िन्निर्घोषसङ्कुलैः॥

प्रावृट्समयसम्प्राप्तै र्दृष्टै र्वृष्टिः(९) प्रमीयते।

एवं पूर्ववता साध्यमनुमानेन वृद् सदा॥ इति।

चतुर्थेन पादेन आगमानुमानमुक्तम्। क्वचित्=यत्र तु त्रिविधस्यापि कार्यकारण-धर्मस्वरूपप्रतिबन्धस्याऽपगमः, तत्र विषये। आम्नायस्य(१०) दर्शनात् आगमसिद्धेनानु-मानेन साध्यते। यथा मन्त्रमन्त्रेश्वरादीनां बैन्दवशरीरादिरि(११)त्यनुमीयते।

ननु धर्मः शौक्ल्यादिरनेकत्र वर्तमानो नियतधर्मिणं व्यभिचरतीति कथं ततो विशिष्ट-धर्मिसिद्धिः। तथा कार्यमपि वह्नेश्चक्रमू(१२)र्धादेर्धूमादि दृश्यते। कारणमपि घनादि कार्यं वृष्ट्यादिकं कदाचित् करोति कदाचिन्नेत्यनैकान्तिकत्वात् कथं ताभ्यां कारण-कार्ये साधयितुं शक्येते इति।

अत्रोच्यते। न धर्ममात्रस्याऽस्य हेतुत्वमिष्यते। अपितु अव्यभिचारविशिष्ट-धर्मिणः कस्यचिदेव विशिष्टधर्मस्य, तथास्वभावत्वेन निश्चयात्। न तु तस्य व्यभिचारः

Or (१) शक्तिः प० (२) वच्च धर्मि (३) तद्द पदा० (४) योपादे (५) पूर्ववच्च (६) कारणाभा० (७) न्नेविपु (८) स्थेस्तदिनि० (९) दृष्टे वृष्टिः (१०) क्वचित् त्मा यस्य० (११) रादित्यामिय० (१२) चक्रादिमूर्धादिधू०।

सम्भवति। यस्य व्यभिचारः पाण्डुत्वादेर्न तस्य हेतुत्वम्। तस्य चाभ्यासतो नियतधर्मिगत-विशेषग्रहणेन व्यभिचाराभावाद्धेतुत्वमेव। तदुक्तम्—

न सुष्ठु विवेचितो धर्मिणं व्यभिचरतीति।

तथा कारणमपि मेघादि। यदवश्यं कार्यजनकस्वभावं न तद् ब्रह्मणापि प्रतिबद्धुं शक्यम्। यत् तु अजनकस्वभावं न तदिन्द्रेणापि जनकं शक्यं कर्तुमिति न सुष्ठु विवेचितं कारणं कार्यं(१) व्यभिचरतीति। तदुक्तम्—

यदभावि न तद् भावि यद्भावि न तदन्यथा।
इति चिन्ताविषघ्नोऽयमगदः किन्न पीयते॥ इति।

एवं वक्ष्यमाण-पत्यादिपदार्थनिरूपणोपोद्घाततया षट्सूत्राणि गृहीतानि। यथा—

"चिन्तां प्रकृतिसिद्धयर्थामुपोद्घातं प्रचक्षते" ॥ ६ ॥

इति उपोद्घातप्रकरणम्।

---

एवं पदार्थसिद्धये अनुमानचतुष्टयं प्रमा(२)णतयोपन्यस्य प्रथमं तावत् पतिपदार्थो विशेषवताऽनुमानेन साधयितुं विश्वसारोत्तरं गृह्णाति—

## अचेतनस्य मायादेः प्रवर्त्तकतया पतिः।
## सिद्धः सर्वार्थवित् कर्त्ता व्यापकः सततोदितः॥ ७॥

सर्वार्थवित् सर्वज्ञः। कर्ता सर्वकर्ता। व्यापकः सर्वव्यापी। सततोदितः(३) नित्यमुक्तः पतिः अचेतनस्य जड़स्य। मायादेः माया-महामायाप्रमुखस्य जगतः प्रवृत्तिजनकतया सिद्धः परिज्ञातः। एतदुक्तं भवति—मायादेरचेतनस्य प्रवृत्तिः चेतनाधिष्ठानपूर्विका, अचेतन-प्रवृत्तित्वात्, रथादिप्रवृत्तिवदिति प्रवृत्तिरूप-कार्यलिङ्गानुमानेन तत्कारणतया पतिसिद्धि-रिति। एवं क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवदित्याद्यनुमानेन निरुद्धज्ञानक्रियाशक्तिक-पशुविलक्षणतया सर्वज्ञपतिसिद्धिरूहनीया। वायवीये—

अस्ति कश्चिदपर्यन्त-रमणीय(४) गुणाश्रयः।
पतिर्विश्वस्य निर्माता पशुपाशविलक्षणः॥ इति।

---

Or (१) कार्यं न (२) प्रमातयो० (३) सततेदितः (४) रमणि यगु०

पौष्करे—अचेतनं जगद् विप्राश्चेतनप्रेरणं विना।
प्रवृत्तौ वा निवृत्तौ वा न स्वतन्त्रं रथादिवत्॥
योऽत्र प्रवर्तकः शक्तः स पतिः(१) परिपठ्यते। (१५०)
विवादाध्यासितं(२) विश्वं विश्ववित्-कर्तृपूर्वकम्।
कार्यत्वादावयोः सिद्धं कार्यं कुम्भादिकं यथा॥ (१५०) इति।

मतङ्गे—एवं हि परतन्त्रत्वाज् जगतोऽस्याऽखिलस्य तु।
प्रवृत्तिर्दृश्यते यस्मात् तस्मात् कर्ता महेश्वरः॥ इति।

पतिः शिवभट्टारकः। कथमवसीयते? पातीति पतिरित्यनेन शब्देन कारणमात्रमेवाऽवगम्यते। स विशिष्ट एवेति॥ ७॥

एवं लक्षण-प्रमाणाभ्यां वस्तुसिद्धिरिति न्यायेन प्रमाणसिद्धस्य पतेरसाधारणधर्मरूपं लक्षणं पराख्यसूत्रेणाह—

**दृक्क्रियात्मकमैश्वर्यं यस्य तद् दात्रपूर्वकम्।**
**ईश्वरः सोऽत्र मन्तव्यः शक्तिद्वययुतः प्रभुः॥ ८॥**

यस्य दृक्क्रियात्मकं ज्ञानक्रियास्वरूपम् ऐश्वर्यम् ईश्वरत्वं दात्रपूर्वकं पूर्वं न विद्यते दाता यस्य तद् दात्रपूर्वकं, पूर्वं केनापि न दत्तं, स्वाभाविकमित्यर्थः। स शक्तिद्वययुतः ज्ञानक्रिया-शक्तियुक्तः। ज्ञानशक्तेः प्रयोजनं जगद्विषयज्ञानम्, क्रियाशक्तिस्तु जगत्-कारणम्। तदुक्तं रत्नत्रये—

ज्ञानशक्त्या विजानाति क्रियया कुरुते जगत्(३)।

इति। प्रभुः स्वतन्त्रः अनीश्वरः ईश्वरः अत्र अस्मिन् शास्त्रे मन्तव्यः ज्ञातव्यः।

अत्र स्वभावनिर्मलदृक्क्रियालक्षणशक्तिमत्त्वं पतिलक्षणमित्युक्तं भवति। तत्र शक्तिमत्त्वमित्युक्ते मले अतिव्याप्तिः, तदर्थं—दृक्क्रियालक्षणेति। एतावत्युक्ते बद्धात्मन्यतिव्याप्तिः, तदर्थं—निर्मलेति। तावत्युक्ते प्रसादमुक्तेऽतिव्याप्तिः, तदर्थं—स्वभावेति। तेषां शक्तिनैर्मल्यस्य शिवप्रसादाधीनतया स्वाभाविकत्वाभावात्। तदुक्तं पराख्ये—

चिद्रूपमात्मनो रूपं दृक्क्रियागुणलक्षितम्।
ज्ञानरूपस्थितस्यापि स्वरूपं दृक्क्रियात्मकम्॥ √

Or (१) स पशः पति परि० (२) विनादाद्या सितं (३) शक्त्या च विज्ञातं क्रियाशक्त्या कृतं।

वक्ष्यति(१) च—कर्तृशक्तिरणोर्नित्या विभ्वी(२)चेश्वरशक्तिवत्।

तमश्छन्नतयाऽर्थेषु नाभाति निरनुग्रहा ॥

पौष्करे—ज्ञान-क्रिये शिवे प्रोक्ते सर्वार्थे निर्मले परे। इति च ॥ ८ ॥

ननु लक्षण-प्रमाणाभ्यां सर्वज्ञत्वेन सर्वकर्तृत्वेन च पतिः साधितः। तत्र कर्तृत्वं मूर्त्तिमन्तरेणाऽनुपपन्नमित्याशङ्क्य तस्य मूर्त्तिरपि स्वशक्तिरेवेति प्रतिपादयितुं सार्धद्वयमतङ्ग-सूत्रं ( ३।१-३ ) गृह्णाति—

अथ पत्युरधिष्ठानं स्वशक्ति-किरणात्मकम्।

तस्यां दिवि सुदीप्तात्मा निष्कम्पोऽचलमूर्त्तिमान् ॥ ९ ॥

अथ-शब्दः पटलादौ मङ्गलार्थः। पत्युः परमेश्वरस्य पतिपदार्थत्वेन संगृहीतस्य अधिष्ठानम् आधिक्येन सर्वकार्य-व्याप्त्याऽधिष्ठीयते यत्(३)तदधिष्ठानं विशिष्टस्थानमेव, प्रोच्यत इत्यनुषङ्गः। तच्च तस्य(४) विद्याविद्येश्वरादीनामिव न व्यतिरिक्तम्, अपि तु स्वशक्ति-किरणात्मकं स्वशक्तिरेव ज्ञानक्रियात्मिका किरणास्तदा(५)त्मकं तत्स्वरूपम्। सवितृ-रुचिरिव दाहप्रकाशादिकर्तृत्वात् तदात्मिकाः शक्तय एव तत्राधि(६)ष्ठेयत्वेनोपचर्यन्ते इति। ये तावत्(७) तत्रापि विद्या(८)त्मकं वैन्दवं वा भुवनं 'बिन्दुरूपः शिवो ध्येय' इत्यादन्यार्थ-श्रुतिजनितभ्रान्त्या(९) कल्पयन्ति, अनेन ते प्रतिक्षिप्ताः। यथा चास्यां दिवि सविता(१०) दाहकप्रकाशकस्वभाव एव, तथा तस्यां शक्तिकिरणात्मिकायां परस्यां दिवि क्रीड़ास्थाने सुदीप्तात्मा सुष्ठु दीप्तः(११) सर्वविषयज्ञानैश्वर्यदीप्तिभिरात्मा स्वभावो यस्य सः तत्स्वरूप एव पतिरित्यर्थः। ननु मनःसंयोगान्नैयायिकादिसिद्धेश्वरस्येव बुद्धिसंयोगात् पातञ्जलसिद्धस्येव वा तस्य संज्ञानं दीप्तिः *। किञ्च निष्कम्पः निर्गतः कम्पः परिणामो यस्मात् स निष्कम्पः। बिन्दुसदाशिवात्मभेदेन(१२) वा मन्त्रमन्त्रेश्वरभेदेन वा मायादिपृथिव्यन्तभेदेन वा परिणामिनी प्रकृतिरुपादानम्, अन्यथा मृदादिवद(१३)चैतन्य-प्रसङ्गादित्यर्थः। ततश्च यैः कौलादिशास्त्रवासनावासितैः(१४)विवर्त-परिणामपक्षयोरन्यतराभ्युपगमे पत्युरद्वैतवादः समारोप्यते। अनेन ते प्रतिक्षेप्याः। अन्यैस्तु पाञ्चरात्रादिभिः—

अशरीरो ह्यधिष्ठाता नात्मा मुक्तात्मवद् भवेत्।

इत्येतद्दोषभयात् पतिः शरीरयुक्त एवाभ्युपगतः। तद्व्यावर्तना(१५)याह—अचल-

* प्रचलितन्यायादि-निबन्धेषु मतमिदं नैव समुपलभ्यते। तेषु सर्वत्र ईश्वरस्य नित्यज्ञानाभ्युपगमात्।

Or (१) च्यामि (२) विभ्वि (३) अधिस्थियते यदधि॰ (४) तस्य विद्ये॰ (५) दात्मिकं (६) धिष्ठेयत्वेनो॰ (७) यावत् तच्च (८) त्मकवै॰ (९) भ्रान्तयः (१०) द्विविधावितादा॰ (११) दीप्तं (१२) देन मन्त्र॰ (१३) दानस्...वदचै॰ (१४) काला...सनावि॰ (१५) व्यापनाय

मूर्तिमानिति। अचला मूर्तिर्यस्य स अचलमूर्तिमान्। द्विधा हि आत्मनां मूर्त्तिः चला अचला चेति। तत्र चला तु तत्त्वभौवनशरीरात्मिका, अचला तु ज्ञानक्रिया-स्वभावा। अयं च पतिरचलमूर्त्तिमान्। नतु भौवन-शरीरयुक्त इत्यर्थः।

काष्ठा सैव परा सूक्ष्मा सर्वदिक्काऽमृतात्मिका।
प्रध्वस्तावरणा शान्ता वस्तुमात्राऽतिलालसा॥ १०
आद्यन्तोपरता साध्वी मूर्त्तित्वेनोपचर्यते।

अस्यार्थः—सैवाऽचलमूर्त्तिलक्षणा शक्तिः परा प्रकृष्टा काष्ठा निष्ठा सर्वोत्कृष्टेत्यर्थः। एतेनाऽस्मदादिभ्यश्चलमूर्त्तिमद्भ्योऽतिशयितोऽचलमूर्तिमानधिष्ठातेति दर्शितम्। तथाच परमेश्वरादधिको मोक्ष इति ये वदन्ति ते निरस्ताः। नहि सर्वज्ञत्व-सर्वकर्तृत्व-प्राप्तेरन्यः प्रकर्षस्तस्यापि प्रकृष्टतरावस्थेत्यादि-तरतमादि-प्रत्यय-प्रतिपाद्य-मोक्ष(१)भेदावस्थितेरनवस्थैव मुक्तौ भवेत्। नतु परमेश्वरादाधिक्यमेव। कल्पित-व्यपदेशमात्रभेदस्य न कचिद्-व्यपसृतिः। सूक्ष्मा परमाण्वादेरप्यतिसूक्ष्मा। सर्वदिक्का सर्वदिग्गता। वक्ष्यमाण-तत्तत्कार्य(२)व्याप्तेरित्यर्थः। अत्र सूक्ष्मपदेन स्थूलमूर्त्तियुक्त-हिरण्यगर्भरूप-विकारेश्वर-वादिनो निरस्ताः। सर्वदिक्केति पदेन अव्यापकशरीर-प्रकृतिजन्य-प्रद्युम्नादीश्वरत्वस्थापक-पाञ्चरात्रवादोऽपि निरस्तः। अमृतात्मिका अमृतो मरणरहितः आत्मा स्वभावो यस्याः सा अमृतात्मिका। अनेन मीमांसकसिद्ध-पुरुषेश्वरवादोऽपि निरस्तः। तस्य पुरुषस्य मूर्ते(३) मृतिस्वभावत्वादिति। तस्य सुकृताद्य(४)र्जनमात्रसामर्थ्येऽपि तनुकिरण-भुवननिर्माणादौ सामर्थ्यादृष्टेरनीश्वरत्वमेवेति भावः। प्रध्वस्तावरणा—प्रध्वस्तं विनिवृत्तमावरणं समस्त-बन्धनं यस्याः सा प्रध्वस्तावरणा। एतेन सदाशिवस्याऽप्यनुग्रह-तिरोभावरूप-पाशसंसर्ग-प्रतिपादनेन पशुत्वं वदन्तः प्रक्षिप्ताः। सदाशिवस्य पाशसंबन्धे जगत्(५)कर्त्तृत्वानुपपत्तेः। न चानुग्रह-तिरोभावयोश्च पाशत्वम्। विमतौ(६) न पाशभूतौ(७)तत्कृत्यविशेषात्मकत्वात् सृष्ट्यादिवत् इत्यनुमानेन पाशत्वनिराकरणात्। अत एव न तस्य पशुत्वमिति। शान्ता रागद्वेषरहिता(८)। अनेन भगवतः सर्वेश्वरत्वेऽपि आराधन-तदभावाभ्यामिष्टानिष्टफल-प्रदत्वेन नृपत्यादेरिव(९)रागद्वेषाभ्युपगमवादो(१०) निरस्तः। तदाराधनस्य चोदितत्वे सति श्रेयःसाधनत्वेन ज्योतिष्टोमादेरिव विशिष्टेष्टफलप्रदत्वात् नृपत्यादिसाधर्म्याभावादिति। अत एवाऽतिलालसा(११)। लालसा तृष्णातिरेकः, साऽतीव विद्यते यस्याः साऽतिलालसा।

---

Or (१) मोचं (२) तत्त अकार्य० (३) मूर्त्तें मृत० (४) ताद्यार्जन० (५) जगतस्तत्कर्तृ० (६) विमतौ (७) पाशभूतातत्० (८) रहितं (९) त्यादिनाविराग (१०) गमनादो (११) तिलालसादणा०

राग-द्वेषा(१)भावेऽपि पितेव पुत्रादीन् योग्यतानुसारेण सर्वं जगत् पातीत्यर्थः। वस्तुमात्रा। पतिलक्षणवस्तुमात्रा, तस्यास्तु लयभोगादिको भेदो नात्र विवक्षितः। नन्वसौ विद्ये(२)श्वर-मुक्त-शिवसम्बन्धि-प्रवाहनित्येश्वरवादिवदङ्गीक्रियतामित्यत आह—आद्यन्तोपरतेति। आद्यन्तशून्येत्यर्थः। विद्येश्वराणां त्वाद्यन्तयुक्ता मूर्तिः। मुक्तशिवानां त्वादियुक्ता(३)। उभयत्राप्याद्यन्त-रहितत्वम(४)सिद्धमित्यर्थः। न च प्रवाहनित्येश्वरपक्षोऽपि सम्भवति। ईश्वरभावस्य स्वरूपव्यक्तिलाभात्मकत्वेन विनाशासम्भवात्। तत्सम्भवे हि भवेत् प्रवाहनित्येश्वरपक्षः।

यद्येवं मुक्तशिवानामपि पतिसमत्वेन ईश्वराणां बहुत्वाच्चातुल्य(५)मतित्वेन सर्वकार्यानिर्वाह इति चेत्। न। सर्वज्ञत्वाद् यथार्थदर्शनप्रवृत्तत्वेन तेषामतुल्यमतित्वासिद्धेः, रागद्वेषातुल्यज्ञानादियुक्तानामेव नृणां दोषदर्शनात्।

यद्येवं प्राप्तप्रापणी(६)यत्वेन प्रयोजनाभावादस्या मूर्त्तेर्न निसर्ग-निर्माणप्रवृत्तिरुपपद्यते। 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तत' इति न्यायादित्यत आह—साध्वीति। साध्वी करुणायुक्ता। स्वप्रयोजनाभावेऽपि करुणावन्तः परार्थं(७) प्रवर्तमाना दृश्यन्त इति नात्र प्रयोजनाभावदोषः।

ननु पत्युः सुदी(८)प्तात्म-स्वभावत्वेनोक्तत्वात् कथं सा तस्य मूर्तिः? व्यतिरिक्ता हि मूर्तिः सर्वत्र कथ्यत इत्यत आह—मूर्त्तित्वेनोपचर्यत इति। मूर्त्तित्वेन शरीरत्वेनोपचर्यते। नतु मुख्यतया पति-व्यतिरिक्ता(९) सा मूर्त्तिरित्यर्थः। प्रोक्तं च श्रीमत्पौष्करे—

ज्ञान-क्रिये शिवे प्रोक्ते सर्वार्थे निर्मले परे। इति।

सैवेत्यवधारणप्र(१०)धानादत्र च(११) मन्त्रमन्त्रेश्वराणां(१२)मुक्तात्मनां वा दीक्षया-बिन्दु-सदाशिवत्वयोजितानामपि मूर्त्तिरुपचर्यत इति व्यावर्तते। ततश्च तेषां मुख्यैव शुद्धमायोपादाना मूर्त्तिरित्युक्तं भवति। तदुक्तं रत्नत्रये—

बिन्दूपादानजत्वे(न्ये)न एषां बैन्दवमुच्यते।
विद्याश्च विद्याधीशाश्च नादाख्यमभिदेवताः॥
लयभोगाधिकारेण तनुभोगेन्द्रियाणि च। *। इति।

तथा किरणे—शुद्ध-योनिमयं तस्य वपुरुक्तमकल्मष(मंज)म्। इति।

अत्र विद्याविद्येश्वरादीनां वास्तवशरीरयोगत्वे असर्वज्ञत्वप्रसङ्ग इत्याद्यनुमाना-(१३) वस्कराणामनैकान्तिकत्वादिभिर्निरासः साधनीयः। तन्निरसनप्रकारस्तु रामकण्ठ-

---

* मुद्रिते रत्नत्रयेऽयमंशो न दृश्यते।

---

Or (१) गद्येष्टा० (२) वेद्येश्वरि मुक्तःशिव सम्बधिनि (३) युक्ताम् (४) तत्वं सि० (५) त्यमिति० (६) प्रापणिय्य० (७) पदार्थे (८) सुतप्तात्म० (९) रिक्तं (१०) प्रस्ताद० (११) न (१२) णां वापिदीक्षय (१३) नवस्करणा०

विरचितायां मतङ्गवृत्तौ विस्तारेण प्रतिपादितः। तत्रैव द्रष्टव्यः। इह तु ग्रन्थगौरवभयान्न लिख्यते। अत एव सदाशिवाद्याकार-कल्पनमप्यस्य ध्यानार्थमेव। पौष्करे—

साधकस्य तु लक्ष्यार्थं तस्य रूपमिदं स्मृतम्।

तत्त्वप्रकाशेऽपि—चिदचिदनुग्रहहेतो रूपाण्येतानि स प्रभुः कृत्वा।

कुरुते चितामनुग्रहमनादिमलरुद्धशक्तीनाम्॥ (२।१४) इति॥ १०॥

ननु ज्ञानक्रिया-लक्षणा शक्तिः पत्युरव्यतिरेकादौ(१)पचारिकी मूर्त्तिरस्तु। तथापि कृत्यानां करणे मुख्यमूर्त्तिव्यतिरेकेण कथं हेतुता? इत्याशङ्क्य तस्य तादृशं वपुरपि तत्तत्कृत्याधिकारि-शरीरमेव नतु पारमार्थिकमिति मृगेन्द्रसूत्रमुदाहरति—

वपुषोऽविद्यमानत्वाद् यद् यत् कृत्यं करोति सः।

तत्र तत्राऽस्य तत्कर्त्तृवपुषाऽनु(२) कृतं वपुः॥ ११॥

स पतिः वपुषो हस्त(३)पादादिशरीरस्य अविद्यमानत्वादसम्भवात् यद् यत्(४) कृत्यं सृष्ट्यादि करोति। तत्र तस्मिन् कृत्ये अस्य पत्युः वपुः शरीरं तत्कर्तृवपुषा तत्तत्कृत्याधिकारिशरीरेण अनु सदृशतया कृतं कल्पितम्। अधिकारि-शरीरमेव तत्तत्कृत्येषु मुख्यं शरीरमित्यर्थः। अथवा तत्कर्त्तृवपुषा तत्कर्तॄणां पञ्चकृत्योपयोगिनां वपुषा पञ्चब्रह्मरूपेण शाक्तेन शरीरेण कल्पितमित्यर्थः। तदुक्तं श्रीमन्मृगेन्द्रे एव—

तद्वपुः पञ्चभिर्मन्त्रैः पञ्चकृत्योपयोगिभिः।

ईशतत्पुरुषाघोर-वामा(५)जैर्मस्तकादिकम्॥ (वि० ३।८) इति। *

वस्तुतस्तु परमार्थ(६)स्वभावेन मूर्त्तित्वे भगवतः(७)स्वशक्तिमहिम्नैव घटते। तथापि अशरीरस्य च कार्यनिष्पत्त्यदर्शनात् यद् यत् किञ्चित् कार्यं विधत्ते, तत्र तत्र तत्कर्त्तृशरीरमस्य वपुः प्रसादादौ प्रसन्नरूपं क्रोधादौ सक्रोधमाप्यायनादावाप्यायितरूप-(८) मित्यर्थिभिश्चिन्तनीयमित्यर्थः। यथोक्तं सर्वस्रोतःसंग्रहसारे—

येन येन हि रूपेण साधकः संस्मरेत् सदा।

तस्य तन्मयतां याति चिन्तामणिरिवेश्वरः॥ इति।

वपुषा न कृतं वपुरिति पाठे अयमर्थः—स पतिर्यद् यत् कृत्यं करोति, तत्र स्थले तत्

* "यथाक्रमम् अनुग्रह-तिरोभावादान-रक्षणोत्पत्तिलक्षणे कृत्यपञ्चकेऽवश्यमुपयोगो येषां तैरीशानादिभिः पञ्चभिर्मन्त्रैस्तत् मूर्धादिवपुः 'दैवस्योच्यते' इत्यध्याहारः। भक्तानुग्रहाय तत्तदाकारग्रहणस्य आगमेषूपदिष्टत्वात्। तथाचोक्तं श्रीमत्पौष्करे—साधकस्य तु लक्ष्यार्थं तस्य रूपमिदं स्मृतम्।" इति (रामकण्ठवृत्तिः)

Or (१) कादौ श्रौप० (२) षा न (३) स्त व शरीरस्य० (४) वात् कृ०
(५) नामाजै (६) र्थत स्व० (७) वतस्व० (८) दावम्रतस्यतिथ्यधिभिः

कृत्यं(१) पत्युः कर्त्तृवपुषा भवतीति शेषः। करोतीति(२) कर्त्तृ, तद्रूपं वपुः क्रियाशक्तिस्वरूपं शरीरं, तेन सर्वमपि कृत्यं घटत इत्यर्थः। (३)कृतं वपुर्न, कर्त्तृरूप-क्रियाशक्ति(४) व्यतिरेकेण कृतमुत्पादितमन्यद् वपुर्नास्तीति भावः। अत्र हेतुः—'वपुषोऽविद्यमानत्वादि'ति। कारणत्रयाभावेन शक्तिव्यतिरिक्तस्य कार्यशरीरस्याऽस्मदादिवच्छिवस्याऽसम्भवादित्यर्थः।

अयमभिप्रायः—पत्युः शरीराभ्युपगमे तस्य शुद्धस्य भौतिक(५)देहायोगाद् बैन्दवदेहं(६) वक्तव्यम्। तस्य बिन्दुरुपादानं वक्तव्यम्। तच्चात्र न सम्भवति। तथाहि—सर्वत्र(७) क्षुब्धबिन्दोरेवोपादानत्वम्। तत्क्षोभः स्वतो वा? शिवतो वा? नाद्यः। आत्माश्रयदोषापत्तेः। द्वितीये शिवस्य तत्क्षोभक्रियायां वपुरस्ति तद्वपुषः(८)साधकबिन्दुक्षोभार्थं पुनर्वपुरन्तरकल्पनायामनवस्थापत्तेः। यदि तत्राऽचलमूर्त्तिमात्रेणैव बिन्दुक्षोभः, तर्हि तस्य सृष्ट्यादि-क्रियासु किं शरीरान्तरकल्पनया। एवमेव शरीराधीन-सहकारिणोरदृष्ट-निमित्तकारणयोर्निरासः। तस्माच्छिवस्य कारणत्रयाभावेन कृतशरीराभावेऽपि स्वदेहस्पन्दादावात्मनः कर्तृत्ववत् सृष्ट्यादि-क्रियाकर्त्तृत्वोपपत्तिरिति। तदुक्तं श्रीमत् पौष्करे—

अदेहस्यापि कर्त्तृत्वं स्वदेहप्रेरणे यथा। (१।३४) इति॥ ११॥

ननु जगत्-सृष्टि-स्थित्यादिरूपा पत्युः क्रिया नाऽकरणिका क्रियात्वात् छित्तिक्रियावत्, अतस्तस्यापि करणेन भवितव्यमित्याशङ्क्य तत्करणं(९) मृगेन्द्रसूत्रेण दर्शयति—

## करणं च न शक्त्य(१०)न्यच्छक्तिर्ना(११)चेतना चितः।
## विषयानियमादेकं बोधे कृत्ये च तत्तथा॥१२॥ (वि० ३।४) (१२)

शिवस्य शक्त्य(१३)न्यत् शक्तेरन्यत् इतरद् वस्तु करणं न भवति। अत्र निषेधमुखेन विधिरुच्यते। शक्तिरेव करणं, तयैव तत्तत्क्रियानिष्पादनादित्यर्थः। चितः(१४)-चिद्रूपस्य। सम्बन्धे षष्ठी। चित्सम्बन्धिनी सा शक्तिश्च अचेतनस्वरूपा न भवति, चित्स्वभावायाः शक्तेरचिद्रूपत्वायोगादित्यर्थः। यस्मात् ज्ञेयानां करणीयानां चानन्त्यं, तस्माच्चा(१५)स्य करणैरनन्तै(१६)र्भवितव्यम्। अपरिमितविषयं च परमेश्वरस्य ज्ञानं कृत्यं च। तदुक्तं तत्रैव—

तदेकं विषयानन्त्याद् भेदानन्त्यं प्रपद्यते।
कर्त्तृत्वं तदभिन्नत्वात् तद्वदेवोपचारतः॥ (५।१७) इति।

तस्माद् विषयस्य करणीयस्य च अनियतत्वात् अनवच्छिन्नत्वाद्धेतोरेकमपि तत्

Or (१) कृत्यपत्यु (२) शेषः। करोतीति। तव (३) र्थः। कृतं (४) शक्तिवपु (५) तिकं दे० (६) देहे (७) सर्वत्र (८) तद्वपुः (९) कारणं (१०) शक्त्यन्य (११) र्नाचेता चितिः (१२) तथा इति (१३) शक्त्यंन्य (१४) चित चिद्रूप० (१५) नां चास्य (१६) णैरप्यनन्तै

शक्तिरूपं करणं बोधे कृत्ये च ज्ञानविषये कार्यविषये च तथा अनियतम् अनवच्छिन्नम् अनन्तमेवेत्यर्थः। तथा सिद्धान्तसारावल्याम्—

शक्तिश्चित्तनुरीश्वरस्य करणं ज्ञेयेषु कार्येषु तद्
भेदैः सोपहिता प्रयाति गुणतो भेदं क्रियाज्ञानतः।
नित्यं तत् सकलान्यकर्तृनिहिता वर्त्मन्यशुद्धे सिते
कृत्यं सैव करोति पत्यनुगता वामादिशक्त्यात्मिका॥ इति॥ १२॥

अथ ज्ञानक्रियारूप-शक्तेः ईश्वरस्य मूर्त्तित्वेनोक्तत्वात् कथं तस्य करणत्वमित्याकाङ्क्षायामिच्छाशक्ते(१)रेव करणत्वम्, अमूर्त्तित्वेऽपि कर्त्तृत्वमविरुद्धमिति प्रतिपादयितुं किरणसूत्रं गृह्णाति—

## यथा कालो ह्यमूर्त्तोऽपि दृश्यते फलसाधकः।
## एवं शिवो ह्यमूर्त्तोऽपि कुरुते कार्यमिच्छया॥ १३॥ (२)

यथा लोके कालः क्षण-मुहूर्त्तादिकः षड्तुरूपः फलं कार्यं तस्य साधकः, अमूर्त्तोऽपि अशरीरोऽपि कालः स्वस्वोचितपुष्पफलादीनां प्रतिक्षणं द्रव्यपरिपाकस्य बाल्य(४)यौवनादेश्च साधकः कर्ता दृश्यते प्रख्यायते। एवममूर्त्तोऽपि शिवः कार्यं क्षित्यादिकं जगत् कुरुते हि। अनेन शिवस्य शरीराभावेऽपि कर्त्तृत्वाभावः परिहृतः। तस्य करणस्वरूपमाह— इच्छया। इच्छाशक्त्या कुरुत इत्यर्थः। तथाच योगिन इव शिवस्य सर्वासु क्रियासु इच्छैव करणमित्यभिप्रायः। तदुक्तमत्रैव—

इच्छैव करणं तस्य यथा तद् योगिनां मता। इति।

नचेन्द्रियादि-करणाभावे कर्त्तृत्वासिद्धिरित्यपि वाच्यम्। अक्षहीनस्याप्ययस्कान्तस्य लोहाकर्षण(५)कर्त्तृत्ववत् तदुपपत्तेः। यथा श्रीमत्किरणे—

शल्याकृष्टिकरो दृष्टो ह्यक्षहीनोऽपि कर्षकः। इति।

श्रीपौष्करे च—अनादिरूपो भगवानिच्छयाऽस्यावतारकः। इति॥ १३॥

इत्थं स्वशक्त्यात्मक-शरीरकरणस्य वास्तव-शरीरकरण-रहितस्य कर्तुः पतिपदार्थस्य त्रैविध्यं मृगेन्द्रसूत्रेणाह—

## शक्तोद्युक्तप्रवृत्तश्च कर्ता त्रिविध इष्यते।
## शक्तेः प्रवृत्तिभेदेन भेदस्तस्योपचारतः॥ १४॥ (६)

Or (१) शक्तिरेव (२) च्छया॥ इति (३) तावत्मन्य० (४) बाल (५) कर्षक० (६) रतः॥ इति

अत्र कर्ता पतिः शक्तोद्युक्तप्रवृत्तः शक्तश्च उद्युक्तश्च प्रवृत्तश्च शक्तोद्युक्तप्रवृत्तः। द्वन्द्वैकवद्भावः। नपुंसकलिङ्गाभावश्छान्दसः। समानाधिकरणस्तत्पुरुषो वा। शक्त इति उद्युक्त इति प्रवृत्त इति च त्रिविधस्त्रिप्रकार इष्यते। तस्य पत्युर्भेदः शक्तादिभेदः शक्तेः चिच्छक्तेः प्रवृत्तिभेदेन व्यापारभेदेन औदासिन्योद्योगप्रवृत्तिरूपव्यापारैरित्यर्थः। उपचारत(१) इति। भवतीति शेषः।

तथाचायमर्थः—अत्र यच्छक्तत्वं कार्यं(२)प्रति योग्यत्वम्, असौ निष्कलावस्था, तद्वान् शान्त इत्युच्यते। यद्(३) उद्युक्तत्वं सकलनिष्कलावस्था सदाशिव कथ्यते। प्रवृत्तक्रियत्वं तु स्थूलत्वात् ईश्वर इति। कृत्यविषयोऽयमवस्थाभेदः, तेनोपचारात् एतत् तत्त्वत्रयं भिन्नमित्युच्यते ; न परमार्थत्वादिति। तथा किरणे—

प्रोक्तः स निष्कलः स्थूलस्तथा सकलनिष्कलः।
ईशः सदाशिवः शान्त इति नाम्ना स्थितिस्त्विह ॥
इच्छानुग्रहकर्तृत्वाल्लयभोगाधिकारवान्।
त्रिविधः कृत्यभेदेन कथितो नामभेदतः ॥ इति।

मतङ्गे—शान्त्यतीतं परं तत्त्वमविनाश्यव्यया(शिवा)त्मकम्।
येनोन्मीलितसद्भावाः(सामर्थ्यात्) पशवः शिवतां गताः ॥
सदाशिवस्य देह(व)स्य लयस्तत्त्वेऽतिनिष्कले।
चतुर्मूर्त्तिमयं शुभ्रं यत्(४)तत् सकलनिष्कलम् ॥
तस्मिन् भोगः समुद्दिष्टः पत्युर्विश्वस्य सर्वदा। ( ३।३२।१ )
अथाऽधिकारिणः पत्युः क्रीडतः परमं पदम्।
स्वतन्त्रस्यापि वक्तव्यं स्वभावोऽस्य यतः पुरा ॥ ( ४।१ )
तथा शिवैकरूपं च स्यान्नटे बहुरूपवत् ॥ इति ॥

पौष्करे—लयभोगाधिकाराणां न भेदो वास्तवः शिवे।
किन्तु बिन्दोरणूनां च वास्तवा एव ते मताः ॥ इति ॥

तत्र कार्योपसंहार-कार्योद्योग-कार्यसम्पत्तिरूपाऽवस्था लय-भोगाधिकारात्मा। (५) बिन्दुरपि त्रिविधः। तद्यथा। वास्तवबिन्दुभेदा लयभोगाधिकार-तत्त्वाधिकरणवशेन। शिवस्यापि लयभोगाधिकारेण त्र्यैविध्यम्। निष्कलादिरूपेण त्र्यैविध्यम्। परमेश्वर-शिव-सदाशिवा(६)द्वयेन च त्र्यैविध्यम्। औपचारिकं(७) सर्वम्। शक्तोद्युक्तप्रवृत्त-श्चेत्यनेन चकारेण संगृहीतम्।

---

Or (१) चार इति (२) कार्यमप्र० (३) यद्युक्तत्वं (४) यतत् (५) रात्मनोऽपि (६) व द्व० (७) चारिक स०

ननु शिव-सदाशिवयोस्तर्हि भेदो यदि शिवान्नादाभिव्यक्तं सदाशिवेन चेत् पदादिनियमेन स्थापितम्। तदा अनयोस्तत्त्वयोर्भेदः स्याद्, भेदे शास्त्रविरोधः।

एकमेव हि तत् तत्त्वं परमं शुद्धमव्ययम्।
ईशः सदाशिवः शान्तः पर्यायास्तस्य संस्थिताः॥

इत्युच्यते। सत्यम्—एकमेव तत् तत्त्वं किन्तु कृत्यभेदाद् भेदव्यपदेशो मणिवदिति। यथा मणिद्रव्यमुपधानवशादनेकप्रत्ययभाग् भवति। एवं शिवतत्त्वं लयाधिकारभोगदातृत्वात् नानाव्यपदेशभाग् भवतीति सकल-निष्कलत्वादिभेदेन भेदश्चात्मवदिति। यथा आत्मा शरीर-योगात् सकलः, प्रलयावस्थायामकलः, मुक्त्यवस्थायां पर इत्युच्यते। शिवोऽप्येवं सकल-निष्कलभेदाद् भिन्न इत्युपचर्यते॥ १४॥

एवम्भूतस्य कर्त्तुरीश्वरस्य प्रपञ्चं प्रति निमित्तत्वमुपादानत्वं चास्ति। अभिन्न-निमित्तोपादानत्वाङ्गीकारादिति केचिद् वदन्ति। तान् निराकर्त्तुं सर्वस्याऽपि कार्यस्य पृथक्तया कारणत्रय-सद्भावं पराख्यसूत्रेण दर्शयति—

**निमित्तमीश्वराख्यं तद् यद् दृष्टं सहकारणम्।**
**उपादानं च यत् सूक्ष्मं सर्वकार्येषु सं(१)हितम्॥१५॥ (२)**

ईश्वराख्यं ज्ञान-क्रिया-शक्तिरूपै(३)श्वर्येण ईश्वर इत्याख्या यस्य तदीश्वराख्यं यन्निमित्तं निमित्तकारणम्, यच्च दृष्टं दण्ड-चक्रादि सहकारणं सहकारिकारणं, यच्च सूक्ष्मं मृदादि(४) उपादानकारणं, तत्(५) त्रितयमपि सर्वकार्येषु संहितं सम्बद्धम्(६)। तथाच कारणत्रयं 'सर्वकार्येषु संहितमि'त्येतदुत्तरवचनेन सर्वकार्यस्य पृथक्तया कारणत्रयव्याप्ति-प्रतिपादनेन प्रपञ्चस्याऽपि कार्यस्य पृथक् कारणत्रया(७)वश्यकतया अभिन्ननिमित्तोपादानत्वं निरस्तम्।

ननु ऊर्ण(८)नाभि-जन्तो(९)र्लूतातन्तुं प्रति निमित्तत्वमुपादानत्वं च दृष्टमिति चेत्। न। तत्रापि तदास्यगत-लालाया एव तत्र उपादानत्वात्। किञ्च ईश्वरस्योपादानत्वे तस्य परिणामित्वमचिद्रूपत्वं च प्रसज्येत। तदुपादेयस्य सर्वस्य प्रपञ्चस्याऽपि चिद्रूपत्वापत्तिश्च। अत एव तत्समवायिशक्तेरपि नोपादानत्वम्। चिद्विवर्त्तत्वाङ्गीकारे जगदसत्यतापत्तिः। न चेष्टापत्तिः। सर्वप्रमाण-सिद्धस्य जगतोऽपह्नोतुमशक्यत्वात्। तदुक्तं पौष्करे—

नास्ति शक्तिरुपादानं चिद्रूपत्वाद्(१०) यथा शिवः।
परिणामोऽचितः (११) प्रोक्तश्चेतनस्य न युज्यते॥

Or (१) संगितम् (२) ह्नितम्। इति (३) रूपैश्व० (४) चामृतादि (५) तत्रित्रय० (६) संबंधं (७) तयवश्यक० (८) ऊर्णानाभि० (९) लंता० (१०) पत्याद्म० (११) णामोचित:

चितो विवर्त्त एवोक्तस्तथात्वे कार्यशून्यता ।
सर्वप्रमाण-संसिद्धं चिद्विवर्त्तः कथं जगत् ॥ ( २।४-५ ) इति ।

अत्र च प्रपञ्चस्य ईश्वरो निमित्त-कारणम् । शक्तयः सहकारि-कारणम् । बिन्दुरुपादान-कारणम् । यथाऽत्रैव ( पौष्करे ८।१७ )—

निमित्तमीश्वरस्तेषामुपादानं स बिन्दुराट् ।

अन्यत्र—तपने दीधिति(१)श्चन्द्रे चन्द्रिकौष्ण्य(२)मिवाऽनले ।
समवेता शिवे शक्तिः कारणं सहकारणम् ॥
स्वशक्तिश्चेश्वरो माया मृच्चक्रक-कुलालवत् ।

तत्रापि शुद्धेऽध्वनि(३) शिवस्य निमित्तत्वं, बिन्दोरुपादानत्वम् । अशुद्धेऽध्वनि तु अनन्तेशस्य निमित्तत्वं मायाया उपादानत्वं वेदितव्यम् । (४) तथाच किरणे—

शुद्धेऽध्वनि शिवः कर्त्ता प्रोक्तोऽनन्तोऽसिते प्रभुः ।

शुद्धेऽध्वनीति शुद्धाशुद्धयोर्बिन्दु-माययोः(५)शुद्धाशुद्ध-कार्य-व्यत्यास-कारणत्वमुचितम् उक्तम् । श्रीपौष्करे ( २।६ )—

मायापि नात्रोपादानं मोहकत्वात् स्वतेजसा ।

अत्र(६) शुद्धेऽध्वनीत्यर्थः । नच—माया-काल(७)-कर्मादीनामेव जगन्निमित्तत्वं, नेश्वरस्येति वाच्यम् । तेषामचेतनानां चेतनप्रेरणं विना कार्यकारकत्वा(८)नुपपत्त्या तत्प्रेरक-चेतनावश्यम्भावे सति अस्मदादीनां निरुद्धदृक्(९)क्रियतया तत्प्रेरकत्वाभावेन सर्वज्ञस्य सर्वकर्त्तुरीश्वरस्यैव तत्सम्भवेन सकलप्रपञ्चं प्रति तस्यैव निमित्तकारणत्वौचित्यात् ।

निमित्तमीश्वराख्यं यद्(१०)दृष्टं सहकारणमिति पाठे—अदृष्टशब्दवाच्य-कर्मणः सहकारिकारणत्वमुक्तम् । यथाऽत्रैवारणेयपटले ( पौष्करे ८।१८ )—

निमित्तमीश्वरस्तेषामुपादानं स बिन्दुराट् ।
नृकर्म सहकारि स्यात् कार्यमेतत्(११) त्रिहेतुकम् ॥

तस्मात् प्रपञ्चकार्यस्य निमित्तादि-कारणत्रयरूपत्वमीश्वरादित्रयस्येति सर्वैरभ्युपेयमिति ॥१५

अथ 'न कदाचिदनीदृशं जगदि'ति न्यायेन प्रपञ्चनित्यत्ववादिनं निराकर्त्तुं प्रपञ्चस्य कार्यत्वं पराख्यसूत्रान्तरेण साधयति—

**मूर्त्ताः सावयवा येऽर्था नानारूप-परिच्छदाः ।**

---

Or (१) दिधिति० (२) कौष्ण्यं० (३) शुद्धध्वनि (४) तव्यम् । किरणे—शुद्धेऽध्वनीति शुद्धा० (५) माययो शुद्धं शुद्ध० (६) अत्र मायाशुद्धे० (७) नच काल० (८) कार्यकारत्वा० (९) दृक्क्रिय० (१०) यद्दृष्टं (११) मेतद्विहे० । क्वचित्—कार्यं तस्मात् सहेतु०

स्थूलावयव-शिष्टत्वाद् बुद्धिमद्धेतुपूर्वकाः(१) ॥
अतोऽस्ति बुद्धिमान् कश्चिदीश्वरः समवस्थितः(२) ॥ १६ ॥

मूर्त्ताः आकृतिमन्तः। सावयवाः अवयव-सहिताः। नानारूप-परिच्छदाः नाना बहुविधैः रूपैः संस्थान-विशेषैः परिच्छदः आवरणं येषां ते नानारूप-परिछदाः। एवम्भूता ये अर्थाः पृथिव्यादयः एते पक्षत्वेनोपात्ताः। मूर्त्तादीनि पञ्चविशेषणानि कार्यत्वसाधने प्रत्येकं हेतुत्वसूचकतया उपात्तानि। न तु बाधादि-निवारकाणि। तस्य प्रतिज्ञामाह —बुद्धिमद्धेतुपूर्वकाः। बुद्धिर्यस्यास्ति स बुद्धिमान्। स चासौ हेतुश्च सोऽयं बुद्धिमद्धेतुः पूर्वः(३)पूर्वावधिर्येषां ते(४) तथाविधाः। उपादानादि-गोचरापरोक्षज्ञानवत्-कर्त्तृका(५) इत्यर्थः। हेतुपूर्वकत्व-साधनमात्रेण कार्यत्वसिद्धावपि कर्त्तृविशेषसिद्धि-विवक्षया बुद्धिमत्पदं प्रयुक्तम्। तत्र हेतुमाह—स्थूलावयव-शिष्टत्वादिति। स्थूलैरस्मदादि-बाह्येन्द्रियग्राह्यैरवयवैः शिष्टत्वात् सम्बद्धत्वात्। अत्र चावयवानामप्रत्यक्षतया अवयवयुक्तत्व-हेतोरसिद्धि-परिहारसूचकतयैव स्थूलपदमुपात्तं, नतु व्यभिचारवारकतया। अत्र घटादिवदि-त्युदाहरणमध्याहर्त्तव्यम्। निगमनमाह—अतः सावयवत्वादेव बुद्धिमान् समवस्थितः प्रमाणसिद्धः कश्चिदीश्वरः कर्त्तास्ति। पृथिव्यादीनामिति शेषः। तथा वायवीये—

प्रधान-परमाण्वादि यावत् किञ्चिदचेतनम्।
न तत् कर्त्तृ स्वयं दृष्टं बुद्धिमत् कारणं विना ॥
जगच्च कर्त्तृसापेक्षं कार्यं सावयवं यतः।
तस्मात् कार्यस्य कर्त्तृत्वं पत्युर्न पशु-पाशयोः ॥

अनेन च सकर्त्तृकत्व-साधनेन पृथिव्यादीनां कार्यत्वं सिद्धम्, अतः कार्यत्वसाधनस्य सुलभत्वेऽपि सकर्त्तृकत्व-साधनद्वारेण तत्साधनमीश्वरसिद्धि-नान्तरीयकतया निरीश्वरवाद-निराकरणार्थमिति। इदञ्च पञ्चरूपोपपन्नत्वादन्वयव्यतिरेक्यनुमानम्। तदुक्तं श्रीमत्पौष्करे (७।४०)—

पक्षधर्मः सपक्षे सद् व्यावृत्तश्च विपक्षतः(६)।
अबाधोऽ(७)सत्प्रतिपक्षो व्यतिरेकान्वयात्मकः ॥ इति ॥ १६ ॥

इदानीमीश्वरकृत्यस्यैव इयत्तया परिच्छेदं साधन-प्रयोजनवत्त्वं च मृगेन्द्रसूत्रेणाह—

जगज्जन्म-स्थिति-ध्वंस-तिरोभाव-विमुक्तयः।
कृत्यं सकारक-फलं ज्ञेयमस्यैतदेव हि ॥ १७ ॥ (२।३)

जन्म च स्थितिश्च ध्वंसश्च तिरोभावश्च विमुक्तिश्चेति द्वन्द्वः। जगतो जन्मेत्यादि-

Or (१) पूर्विकाः (२) तः ॥ इति (३) पूर्वपूर्व० (४) त तथा (५) कर्त्तृक इ० (६) विवक्षतः (७) अबाद्धी

षष्ठीतत्पुरुषः। एते जगज्जन्मादयः पञ्च। एतत् पञ्चविधम् अस्यैव परमेश्वरस्यैव सम्बधि कृत्यम्। सकारकफलं कारकैः शक्त्यादिभिः फलेन भुक्तिमुक्त्यात्मना च सहितं ज्ञेयम् अवबोद्धव्यम्।

अत्र जगच्छब्देन जन्मवज्-जन्तुचक्रमुच्यते। तस्य जन्म शिवस्यैकं कृत्यम्। साक्षाच्छिवसृष्टिः(१)शुद्धाध्वविषये विन्द्वात्मकादुपादानात्(२) शुद्धतत्त्व-भुवनाद्युत्पादन-(३) पूर्वं तद्भुवन-वासिनां विद्याविद्येश्वराणां च बैन्दवशरीर-योजनान्नादादिक्रमेण शब्दोत्पादनम्। अनन्तादिद्वारकसृष्टिः(४)अशुद्धाध्वविषये मायाख्यादुपादानात् अशुद्ध-तत्त्वभुवनाद्युत्पादनपूर्वं भोगोपयोगि-परिकरसहितस्य पौनःपुन्येन तत्तद्विविधयोनिषु उद्-भावनं च जन्मशब्देन गृहीतम्। तत्रैवोक्तम्—

तत्रादौ केवलाणूनां योग्यानां कुरुतेऽष्टकम्।
वामादि-शक्तिभिर्युक्तं सप्तकोटिपरिच्छदम्॥
तेषामनन्तः सूक्ष्मश्च तथा चैव शिवोत्तमः।
एकनेत्रैकरुद्रौ च त्रिमूर्त्तिश्चामितद्युतिः॥
श्रीकण्ठश्च शिखण्डी(५)च राजराजेश्वरेश्वराः। —मृगेन्द्रे २।३-४

अत्र राजानो लोकेशा(६)इन्द्रादयस्तेषां राजानः शतरुद्राः, तदीश्वराणां मण्डलि-(७)प्रभृतीनामप्येते ईश्वराः प्रभवः, विद्यामहेश्वरा इति यावत्। एते च सर्वे शिवप्रेर्या न स्वतन्त्राः। तथा—

ईषदप्राप्तयोगित्वान्नियोज्याः परमेष्ठिनः॥
सर्वज्ञत्वादियोगेऽपि नियोज्यत्वं मलांशतः।
परस्परं विशिष्यन्ते(८) मन्त्राश्चैवमधः(९) स्थिताः॥
ते च मन्त्रेश्वरव्यक्त-(१०)शिवशक्तिप्रचोदिताः।
कुर्वन्त्यनुग्रहं पुंसां यदा येषां स युज्यते॥ —मृगेन्द्रे २।४-६

ते च मन्त्राः परापरमन्त्रेश्वरव्यक्तया शिवशक्त्या व्यापारिताः योग्यतानु(११)रूपेण कदाचित् केषाञ्चिदनुग्रहं कुर्वन्ति(१२)। नतु योग्यतानपेक्षम्।

प्रयोक्तृ-(१३)देहसापेक्षं तदर्धमखिलेऽध्वनि।
कृत्वाधिकारं स्थित्यन्ते शिवं विशति(१४) सेश्वरम्॥

---

Or (१) सृष्टिशुद्धा० (२) दुपादाना अशुद्ध० (३) द्युत्पादान० (४) सृष्टाशुद्धा०
(५) शिखण्डि (६) लोकेश (७) मण्डलप्र० (८) विशिष्टं ते (९) मथा (१०) श्वराव्यक्तः
(११) योग्यानपेक्षम्० (१२) कुर्वन्ती तु योग्यान० (१३) प्रयोक्त (१४) विशतीश्व०

विनाधिकरणेनान्यत् प्रधान(१)विकृतेरधः(२) ।
कृत्वाऽधिकारमीशेष्टमपैति साध्वसंहृतौ ॥
ततोऽनन्ताद्यभिव्यक्तः(३)पतीनां ग्रन्थितत्त्वतः ।
कलाद्यारब्धदेहानां(४) करोत्यष्टादशं शतम् ॥
तानप्याविश्य भगवान् साञ्जनान् भुवनाधिपान् ।
येभ्यः(५) सर्वमिदं येषां(६) शक्तिः कर्मनिबन्धना(७) ॥
प्रणेतॄन् पशुशास्त्राणां पशूंस्तदनुवर्तकान् ।
स्वसाध्य(८)कारकोपेतान् कालधामावधिस्थितान् ॥ इति । —मृ० ४।४-११

स्थितिः तदिच्छानिरुद्धस्य स्वदृष्टस्य सर्वलोकस्य पुरुषार्थसिद्धये व्यापारप्रसिद्धये नियोजनं स्थापनं द्वितीयं कृत्यम् । यथा तत्रैव—

स्थितौ सकारकानेतान् समाक्रम्य स्वतेजसा ।
युनक्ति स्वार्थसिद्ध्यर्थं(९)भूतैरनभिलक्षितः ॥ इति ॥ —मृ० ४-१२

ध्वंसः स्थित्यन्ते शुद्धाशुद्धाध्व-भोगसाधन-तनुकरण-भुवनादीनां बिन्दुमायात्मक-कारणे सशक्त्यात्मनां(१०) विलयनद्वाराऽन्तर्निहिताणुसंघकाधिष्ठानेन भवाध्वभ्रमणश्रान्तानां(११) संसारिणां विश्रमायाऽवस्थापनं तृतीयकृत्यम् । यथा तत्रैव—

भोगसाधनमाक्षिप्य कृत्वा कारणसंश्रयम् ।
तच्च सात्मकमा(श्रित्य)क्रम्य विश्रमायाऽवतिष्ठते ॥
भविनां भवखिन्नानां सर्वभूतहितो(१२) यतः । —मृ० ४।१३-१४

अयमेव च(१३) ध्वंसः प्रलय इत्युक्तः । स च त्रिविधः अधम-मध्यमोत्तमभेदेन । ब्रह्मणो दिनान्तस्वापे(१४)कालाग्निरुद्रोर्ध्वावलोकनवह्निना भूर्भुवःस्वर्लोकानां(१५) त्रयाणां लयोऽधमः(१६)प्रलयः । श्रीकण्ठस्य दिनान्तस्वापे भूततत्त्वादि-गुणतत्त्वान्त-लयो मध्यमः प्रलयः । कालाग्नि-भुवनादि-नादान्त-लयः(१७) उत्तमः प्रलयः । एतत् सर्वं मतङ्गे विस्तरेण प्रदर्शितम् । ग्रन्थविस्तरभयान्नेह प्रतन्यते । अस्मिन् महाप्रलये माया-पुरुष-(१८) शिव-व्यतिरेकेण सर्वेषामुपसंहार एव । तथाऽचिन्त्यविश्वे—

महार्थसंहारकाले मायाऽऽत्मानश्च सर्वशः ।
शिवश्चाऽशुद्धमायाभि(१९) स्तिष्ठन्त्यन्यश्च(२०) लीयते ॥
आत्मना(२१) मुपभोगार्थ(२२)मेते तिष्ठन्ति सर्वतः(२३) ॥ इति ।

Or (१) प्रधना (२) ते रधः (३) नद्यभिव्यक्त (४) देहाना (५) एभ्यः (६) एषां (७) बन्धनाः (८) ससाध्य० (९) सिद्धार्थं भू० (१०) यशशक्त्यात्म० (११) श्रान्तानां (१२) हिता (१३) मेवव (१४) स्वापेच (१५) स्वर्लोका० (१६) त्रयोमयप्र० (१७) लयोत्तमः (१८) पुरुषः शिव० (१९) मायानि (२०) न्त्यन्ये च (२१) अग्रनश्च (२२) पग्रभाष्यार्थि (२३) सर्वंतोति

तथाचाचार्यैः—"माया पुरुषः शिव इत्येतत् त्रितयं महार्थसंहारे ।

अवशिष्यते पुनस्तत् प्रवर्त्तते पूर्ववत् सृष्टौ ॥ इति । —तत्त्वप्र० ६९

तिरोभावः पाशानुग्रहेण पशूनां यथानुरूपाद् भोगादप्रच्युतिश्चतुर्थं कृत्यम् । अयमेव संरक्षणाख्यतया अन्यत्रोक्तः । यदाहुः श्रीवार्त्तिककारः—

स्वसंस्कारोचिताद् भोगादप्रच्यावः शरीरिणाम् ।

प्रोक्तं संरक्षणं नाम न्यायेन परिपालितम् ॥

विमुक्तिश्च(१) अनुध्यानमनुग्रहः पाश-तिरोधानेनाऽ(२)णूनां परापरमोक्षदानम् । तत्राऽपर-मोक्षः षड्विधः । परस्त्वेकविधः । तथा मतङ्गे—

मोक्षः सप्तप्रकारोऽयं विभागेनोपवर्णितः ।

एभ्यो ह्येकः परः सूक्ष्मः कार्यकारणगोचरः(३) ॥

अतीतः परिपूर्णश्च स्वतन्त्रः सर्वतोमुखः ।

एको निरीश्वरः(४)स्वस्थः षड्न्ये सेश्वरा मताः ॥

संरुद्धशक्तय(५)श्चान्ये स्थूलभेदाः प्रकीर्त्तिताः । इति ।

इदमनुग्रहरूपं कृत्यं शिवः सृष्टिकाले संहारकालेऽपि करोति । तदुक्तमत्रैव—

यान् विमोचयति स्वापे शिवाः सद्यो भवन्ति ते ।

संहृतौ वा समुद्भूतावणवः पतयोऽथवा(६) ॥

रुद्रमन्त्रपतीशानपदभाजो भवन्ति ते ।

स्थितौ याननुगृह्णाति गुरुमास्थाय चिद्वतः ॥ —मृगेन्द्रे वि० ५।२-३

स्वायम्भुवे कृत्यस्य प्रयोजनमुक्तम्—

एवमाख्यमिदं कृत्यं किंकारणमुदाहृतम् ।

पशूनां देहसंयोगो भोगमोक्षाय कथ्यते ॥

तथापि सह चेत्याहुरनादिमलमोचकः । इति ।

अत्र एवकारेण शिवस्यैव एतत् पञ्चकृत्यं विद्याविद्येश्वरादीनां(७) तत्प्रेरणयेति दर्शयति । तथा श्रीमद्रौरवे—

अधिकारं प्रकुर्वन्ति शिवेच्छा-विधिचोदिताः । इति ।

एतच्च कृत्यं न मायादिभिः कर्मभिर्वा निर्वर्त्तयितुं शक्यम्, अचेतनत्वात् । नापि पुरुषेण, तस्य मलनिरुद्ध-शक्तिकत्वात् । सकारकमित्यनेन साधनापेक्षा च शिवस्य

---

Or (१) सा मुक्तिः । अनुध्यान० (२) तिरोधान्न नाणूनां (३) कारणगोचराः

(४) निरीश्वरस्वस्थः (५) शक्तश्चान्ये (६) पतयोथवाः (७) कृत्यं विद्येश्वरादिना

दर्शिताः । अन्यथा निर्हेतुको मोक्षः स्यात् । अन्यानपेक्षणात् सर्वस्यैव स्यात्, कस्यापि वा न स्यात् । यथाहुः—

नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणात् ।
अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः ॥ इति ॥ १६ ॥

परमेश्वरस्य स्वापे विक्रियादिशक्तयस्तत्तत्कार्यनिष्पादनोद्युक्तं(१) भवन्तीति मृगेन्द्र( ४।१५ )सूत्रान्तरेणाह—

**स्वापेऽप्यास्ते बोधयन् बोधयोग्यान् रोध्यान् रुन्धन् पाचयन् कर्मिकर्म ।**
**मायाशक्तीर्व्यक्तियोग्याः प्रकुर्वन् पश्यन् सर्वं यद् यथावस्तुजातम् ॥**

स्वापे जाग्रदवस्थायामिव स्वापावस्थायामपि बोधयोग्यान् मलपरिपाकतारतम्याद्यपेक्षया प्रबोधनार्हान् बोधयन् तेषां बोधनं कुर्वन् रोध्यान् रोधनार्हान् रोधशक्त्या निरुन्धन् । कर्मिणां कर्मवतां कर्म शरीरेन्द्रियजात्यायुर्भोगकारणमिति । सूक्ष्मरूपं कर्म पाचयन् (२) फलदानोन्मुखमापादयन् । तथा वक्ष्यति—

तथा बीजं शरीरादेः पाचयत्यानिवेशनात् । —मृगेन्द्रे वि० ५।११

इति भावः । उक्तमत्रैव—

न योग्यताङ्गमभजत् सद्यः(३)स्यादौषधादिवत् । इति । —मृगेन्द्रे वि० ५।११

पाकयोग्यमपि तत् स्वयमात्मनात्मानं न पाचयितुमीशम् । सर्वस्य हि परिणामिनो वस्तुनः क्षीरादेरयं साधारणो धर्मः यत् किमप्यपेक्ष्य परिणामित्वं (४) नान्यथेति । तस्मात् परिणामित्वात् कर्मणोऽपि अन्यापेक्षः पाक इति । तथा—

पाकार्हमपि तत् पक्तुं नेशत्यात्मानमात्मना ।
धर्म-सामान्य एवायं सर्वस्य परिणामिनः ॥ —मृगेन्द्रे वि० ५।१२

इति (५)। मायाशक्तीः शुद्धाशुद्धमाययोः शक्तीः(६) तत्तत्कार्यजनकशक्तीः(७) व्यक्तियोग्याः प्रसवाभिमुखीः(८) प्रकुर्वन् प्रकर्षेण कुर्वन्(९)। अत्रापि परिणामि-कर्मि-कर्मवन्मायाशक्तीनामपि स्वत एव प्रसवाभिमुख्यापादनं न घटत इति भावः । सर्वं चिद(१०)चित्-तत्त्वभावभूत-भुवनात्मकं वस्तुजातं वस्तुसमूहं यत् यथास्थितं तत् तथा पश्यन् अवलोकयन् भूत्वा आस्ते । शिव इति शेषः । यथावत् पश्यन् इत्यनेन शिवस्यास्मदादिवदयथावत्-स्थितवस्तुभासो(११)निरस्तः । बोधयन् रुन्धन् पाचयन् प्रकुर्वन्नित्यनेन

Or (१) दनोत्पुक्तं भ० (२) कर्म चयन् (३) सद्यस्या० (४) णामित्वान्नान्य (५) इति पाचयन् माया (६) शक्तिः (७) शक्तिः (८) मुखिः (९) प्रकुर्वन् (१०) चितचित्त (११) वस्तुभावो

शिवस्य सर्वकर्त्तृत्वं, पश्यन्नित्यनेन सर्वज्ञत्वं च दर्शितम्। सर्वविषयज्ञानं विना सर्वकर्त्तृत्वानुपपत्तेः। यो हि यद्-यत्(१)-क्रियासिद्धिं तदङ्गानि तत्फलानि च जानाति (२) तस्यैव विचित्र-तत्तत्कारकोपयोगाभिसन्धानवतस्तत्तत्-कर्त्तृत्वं घटते, कुविन्दादेरिव पटादिकृतौ। अतो यस्तु तत्राऽज्ञः, स तत्कार्यकरणाय नालम्। बालिश इव न्याय(३)विद्याद्युपन्यासे इति। तदुक्तमत्रैव ( मृगेन्द्रे ५।१३ )—

सर्वज्ञः सर्वकर्त्तृत्वात् साधनाङ्गफलैः सह।
यो यज् जानाति (४) कुरुते स त (५) देवेति सुस्थितम्॥ इति।

अस्त इत्यनेन महाप्रलये शिवस्य सद्भावश्च बोधयोग्यानित्यादिना च पुरुषसद्भावश्च मायाशक्तीरित्यनेन बिन्दुमायात्मनोः सद्भावश्च प्रदर्शितः। प्रलयकालेऽपि शिवस्य पञ्चकृत्यानि दर्शितानि। तद् यथा पौष्करे—

प्रलयेऽप्यनुगृह्णाति सृजत्यवति हन्ति च।
तिरोदधाति भगवान् न कालापेक्षया सदा॥ इति।

एवमचेतन इत्यादि-त्रयोदशश्लोकैः पतिलक्षण-प्रमाणा(६)धिष्ठानमूर्त्ति-कारणदेहाद्यनपेक्षकर्तृत्वौपाधिक-सहकार्य्युपादानापेक्ष-(७)सर्वज्ञत्व-पञ्चकृत्यानि प्रतिपादितानि। एवंप्रकारेण पतिस्वरूपवेदनयैव संसारमुक्ता भवन्ति। नतु पाशरूपतया ईश्वरवेदिनाम् (८)। तदुक्तं मृगेन्द्रे ( ५।१८ )—

सत्ता-स्वरूप-करणार्थ-विधेय-दृग्भिर्लेशोदिताभिरिति ये विदुरीशतत्त्वम्।
ते मोचयन्ति भविनो(९)भवपङ्कमग्नान् (१०)नो विस्तरेण पुरुषाः पशुपाशरूपम्॥ * इति॥

अत्रा"ऽप्यचेतनस्य मायादेरि"त्यनेन ईश्वरस्य सत्ता साधिता। "अथ पत्युरधिष्ठानमि"त्यनेन तत्स्वरूपं वर्णितम्। "करणं चे"त्यनेन करणं कथितम्। "स्वापेऽप्यास्त" इत्यनेन तस्यार्थः प्रयोजनं भुक्तिमुक्तिरूपं वर्णितम्। "जगज्जन्मस्थितिध्वंसे"त्यनेन पञ्चकृत्यरूप-विधेयमुक्तम्। "पश्यन् सर्वं यद् यथा वस्तुजातमि"त्यनेन दृक्पदवाच्य-तत्त्वज्ञानस्वरूपमुक्तं(११) वेदितव्यम्। ब्रह्मणो जीवैक्यं सार्वात्म्यं च वदन्तो वेदान्तिनः

* "अचेतनस्य मायादे"रित्यादिना "पश्यन् सर्वं यद् यथावस्तुजात" मित्यन्तेन ग्रन्थेनोक्ताभिः सत्ता-स्वरूप-करणार्थ-विधेयदृग्भिरीश्वरतत्त्वं ये विदुस्ते एव संसारमुक्ताः पुरुषाः संसारपङ्कमग्नान् संसारिणः पुरुषान् मोचयन्ति। ये तु "आत्मैवेदं सर्वं" "पुरुष एवेदं सर्वमि"ति पशुपाशरूपमीश्वरं मन्यन्ते, न ते संसारमुक्ता भवन्तीत्यर्थः।

Or (१) यत्तत् (२) करोति (३) वालिशवन्या० (४) यज्ज्ञाना० (५) तत् (६) प्रमाणधिष्ठान० (७) पेक्षणस० (८) ईश्वरावे० (९) भवो नो (१०) मग्नानो (११) मुक्तं। तज्ज्ञानस्वरूपमुक्तं वेदितव्यम्।

पशुपाशरूपेश्वर(१)वादिनः। कालकर्मेश्वरवादिनः पाशरूपतामीश्वरस्य ब्रुवते ॥ १७

इत्थं पतिलक्षणमुक्त्वाऽन्ते चिद्विलक्षणतया पशुस्वरूपं पराख्यसूत्रेण प्रतिपादयति—

देहान्योऽनश्वरो व्यापी(२)विभिन्नः समलो(३)ऽजड़ः।
स्वकर्मफल-भुक् कर्त्ता किञ्चिज्ज्ञः सेश्वरः पशुः ॥ १८ ॥

आत्मा देहान्यः शरीर-व्यतिरिक्तः। अनेन चार्वाकस्य निरासः। इत्थं हि(४) चार्वाका वदन्ति—कृशोऽहं स्थूलोऽहमिति शरीर एवाऽहंप्रत्ययस्य दृष्टेर्न तद्व्यतिरिक्त आत्मा उपलक्ष्यते। अथ—परार्थाश्चक्षुरादयः, संघातत्वात् (५) शयनाद्यङ्गवदित्यादिना करणानां कर्त्तृप्रयोज्यत्वादित्यनेन वा(६)नुमानेनात्मा प्रसाध्यते। नैतद् युक्तम्। तस्यात्मापलापिनश्चार्वाकान् प्रत्यसिद्धेः। न ह्येषां प्रत्यक्षादन्यत् किञ्चित् प्रमाणम्। सिद्धावपि अनुमेयस्यात्मनो देवदत्तादिवत् परत्वं प्रसज्येत(७)। यत् किल स्वयं प्रकाशते, स एवात्मा। तत्प्रकाश्यस्तु पर इति विविक्ततया(८)त्मपरभावस्य प्रकाशमानस्यैव सङ्करोऽनवस्था च स्यात्। तदुक्तम्—

"आत्मा यदि भवेन्मेयस्तस्य माता भवेत् परः।
पर आत्मा तदानीं स्यात् स परो यस्तु मीयते ॥"

तथा—"प्रकाशते संविदेका(९) तदन्यत् तु प्रकाश्यते(१०)।
प्रकाश्यं च भवेत् कर्म तच्च कर्त्रा(११)विना कथम् ॥ इति।

तस्मान्नाऽनुमानेन (१२) देहव्यतिरिक्त आत्मा उपलक्ष्यते। नच देहस्य चैतन्याभावेन कथमात्मत्वमिति वाच्यम्। किण्वादि(१३)-द्रव्यविकारे मदशक्त्यु(१४)त्पत्तिवत् चतुर्भूतविकारे देहेऽपि सम्विदुद्भवात्।

अपिच यस्मिन्नुपचिते यस्योपचयः, यदपचये वा अपचयः, तत् तदात्मकम्। यथा वह्न्युपचयापचयावनुगच्छदौष्ण्यम्। तथा यौवन-स्थाविर-भोजन-तदभावहेतुकौ च देहसम्बन्धिनावुपचयापचयावनुकुर्वद् (१५) विज्ञानं देहात्मकमेव। अतो देह एव चेतन आत्मेति। तदयुक्तम्। तथाहि—देहश्चेतनः कदाचिन्न भवति, भोग्यत्वात् विकारित्वाच्च। ये ये केचन विकारिणः परिणामिणो भोग्याश्च, ते ते ह्यचेतना दृष्टाः। यथा पटादयः। स देहोऽप्येवंविधस्तस्मान्न चेतनः।

ननु अङ्गनादिभिर्भोग्यत्वमनैकान्तिकम्। भोग्यत्वेऽपि तत्राऽचैतन्याभावात्। नाऽनै-

---

Or (१) श्वरःवादिनः (२) व्यापि (३) मलो जड़ः (४) हि चात्मा (५) त्वाच्च (६) त्वादित्यनेनानु० (७) प्रसज्यते (८) विवक्षतया (९) संविकान्या (१०) प्रकाशते (११) कर्तृस्यान्नानु० (१२) स्यान्नानुमा० (१३) कण्वादि (१४) शक्तित्युत्पान्ति० (१५) कुर्वन्। विज्ञानं।

कान्तिकम्। तदीयस्य (१) देहस्यैव भोग्यत्वात्। यद्येवं निर्जीवस्य (२) देहस्य कथं नो(३)-पभोगः ? भवत्येव तदवस्थोचित (४) उपभोगः क्रव्यादादेः, न पुनः कान्तादेः। कामिन्याद्यवस्थाया अन्यावस्थान्तरापत्तेर्विकारित्वेन वीभत्सरस(५)हेतुत्वात्। तदुक्तिरत्रैव

"क्वैतत् तद् वक्त्र(६)मत्र क (७) तदधरमधु काऽऽयताक्ष्याः कटाक्षाः।" * इत्यादि।

एवं गजाश्वादावपि ज्ञेयम्। तस्मात् स्थितमेतद् विकारित्वाद् भोग्यत्वाच्च देहस्याऽचैतन्यम्, अचेतनत्वाच्च (८) पारार्थ्यं(९)मिति। न चात्मनो देहान्यत्वे "कृशोऽहमि"त्यादिप्रत्ययबाधः। 'तस्य देह' इति भेदग्राहि-प्रत्ययेन बाधात्। न चात्मनोऽनुमेयत्वे परत्वं स्यादिति वाच्यम्। तस्य स्वसंवेदन-सिद्धस्याऽऽत्मनः विप्रतिपन्नं प्रति प्रतिपादनार्थमेवाऽनुमानप्रयोगात्। न चानुमान-प्रामाण्य-निरासस्तेन शक्यः (१०) कर्त्तुम्। तदनुमान-(११) प्रामाण्य-निरासक-युक्तेरेवाऽनुमानतया (१२) स्वव्याघातापत्तेः। नच चैतन्यस्य देहानुविधायित्वं, (१३) शवशरीरे व्यभिचारात्। (१४) तस्मादनुभव-स्मरणयोरेकाधिकरण्यात् (१५) चेतनो देहान्य एवात्मेति।

अत्र च देहान्यत्व-वचनेन (१६) तत्सम्बन्धिनामिन्द्रियादीनाम् आत्मत्वं निरस्तम्। तथाहि—बहि (१७) गृहीतार्थ-धारक-मनः-प्रेरित-वागिन्द्रियजन्य-शब्दप्रपञ्चस्य व्यवहर्त्तृ-पुरुषाशय-प्रकटकतया दर्पण-स्थानीयत्वेन अचेतनानामिन्द्रियाणां करणत्वमेव समुचितम्।

तथाच मतङ्गे—वागिन्द्रियेण स्पष्टेन मनसान्त[ पू ]रितेन तु।
यः प्रपञ्चोऽनुमानाख्यः सामान्यो व्यवहर्त्तृषु॥
तेनाऽनुमीयते ह्यात्मा दृक्-दर्पण-निदर्शनात्। —६-१६।१७

अपिच—यो यः संहतः, स भोक्त्रर्थः, यथा शयनादि। संहतश्चायं चक्षुरादीन्द्रियवर्गः अतस्तस्यापि भोक्त्रा भवितव्यमिति इन्द्रिय-व्यतिरिक्त-भोक्तृसिद्धिः।

अनश्वरः नित्यः। तस्य हि सौगतादिवत् क्षणिकत्वे विनाशित्वे वाऽभ्युपगम्यमाने कर्मानुष्ठान-फलभोगादिकं पूर्वानुभूत-स्मरणादिकं च नोपपद्यते। तथाऽत्रैव—

क्षणभङ्गे स्थिते ज्ञाने नच कर्मार्जनं भवेत्।
न तत्कर्मफलं भोग्यं ज्ञाननाशे निरन्वये॥

* शिह्लनकृते शान्तिशतके चैवं दृश्यते—"क्वतद्-वक्त्रारविन्दं क्व तदधरमधु क्वाऽऽयतास्ते कटाक्षाः, क्वालापाः कोमलास्ते क्वच मदनधनुर्भङ्गुरो भ्रूविलासः"।—शा० २७।

Or (१) तदियस्य (२) वन्निजवस्य (३) कथनो (४) वस्थोपचित (५) वीभत्सहेतु० (६) तद्वक्त्रम० (७) क्वचिदधर (८) अचेतनस्यास्य (९) परार्थं० (१०) शक्ये कर्त्तुं (११) अनुमान्यप्रा० (१२) तया तद् स्व० (१३) विधायत्वं (१४) चारा तस्मा० (१५) करणं। चेतनो (१६) नेन सम्बन्धिना० (१७) बहिर्गृ०

स्थिरत्वं तद्गतिगम्यं(१) स्मृतिर्नाऽनुभवादृते ।
स्मर्त्ता(२)ऽनुभविता स्थैर्यात्(३)तेन ज्ञाता स्थिरो भुवि ॥ (४) इति ॥

व्यापी(५)व्यापकः । क्षपणकवत् तस्याऽव्यापकत्वे काश्मीरकस्य(६)दक्षिणापथे परिदृश्यमानभोग इव देशान्तरफलभोगो नोप(७)पद्येत, तस्या मूर्त्ते (८)राकाशस्येवाचेतनेन कर्मणा वा देशान्तर-नयनासम्भवात् ; शरीर-परिमितत्वे संकोच-विकाश-धर्मित्वे वा परिणामित्वाचेतनत्वादि-दोषप्रसङ्गाच्च । तथा तत्रैव—

देशान्तरफलायत् स्यात् अविमुक्तोऽपि योगतिः ( ? ) ।
मूर्त्तत्वे न फलं भोग्यं यतो मूर्त्तिर्विनश्वरा ॥
अमूर्त्ता नियते व्यापे केनचित् कर्मणाऽथवा ( ? ) ।
अतैनं यत् तत् कथं नयते पट्ठ ( ? ) ।
तत् फलं भिन्नदेशस्थं विभुत्वात् तनुयोगजम् । इति ।

विभिन्नः अनेकः । नतु वेदान्तवादिनामिव एकः, तस्य परमार्थत एकत्वे बन्ध-मोक्ष-साधक-विद्याऽविद्या(९)विभागेन द्वैतापत्तेः, एकमुक्तौ सर्वभवोच्छेद-प्रसङ्गात् (१०) भोगसाम्यादिदोषप्रसङ्गाच्च । तथा तत्रैव—

चिद्रूपत्वात् तदेकत्वं तद्भेदो भिन्नभोगतः ।
स च(११) तस्य स्वकर्मोत्थः(१२) साऽविद्या बन्धलक्षणा ॥
तच्छेदिका(१३) भवेद् विद्या(१४)द्वयमस्ति यदा(१५)तव ।
विद्याविद्या-विभागेनागतो(१६) द्वैतपरिग्रहः ॥
स्थितायां(१७) सर्वतो मुक्तौ भवोच्छेदः प्रसज्यते ।
नचाऽस्ति(१८)स भवोच्छेदस्तेन ते बहवो मताः ॥

श्रीमत्पौष्करे—यद्यभिन्नं तु सर्वेषां भोक्तुमिच्छैकदा भवेत् ।
भोक्तुमिच्छा(१९)यदैकस्य गन्तुमिच्छा परस्य च ॥
तदैव(२०)तस्माच्चैतन्यं भिन्नरूपमिति स्मृतम् ।

समलः मलेन सहितः । मलशब्देन ज्ञानावारकं कर्मभिन्नं रागकारणमज्ञानमुच्यते । तथा तत्रैव—

तेन तत्कर्मणो भिन्न(२१)मज्ञानं रागकारणम् ।

---

Or (१) तद्गतिर्गम्य० (२) स्मर्त्ता (३) थैर्यात् (४) भुविति (५) व्यापि (६) काश्मीरस्येव (७) नीपद्येत (८) मूर्त्तेस्याका० (९) विद्याविभा (१०) प्रसङ्गाच्च (११) नच (१२) कर्मोथः (१३) तच्छेतिका (१४) भवेदित्याद्दय० (१५) तदा (१६) न गतो (१७) स्थितायाः (१८) नचास्तसं भवो० (१९) मिच्छां (२०) तदैवमस्मा (२१) भिन्नं ज्ञानं

प्रावृणोति(१) तदज्ञानममूर्त्तं(२) विषशक्तिवत् ॥
तेनाऽशुद्धः(३) पशुरसावनुपाति(४)गुणाश्रयः ।

अजड़ः जड़ो न भवतीत्यजड़ः, ज्ञानक्रिया-स्वभाव इत्यर्थः। चैतन्याभावे कर्त्तुः प्रवृत्त्ययोगात्। तथा पौष्करे (६।१८६)—

प्रवर्त्तमानो देहादि(५)श्चेतनाधिष्ठितः सदा ।
स्वतः प्रवृत्तिशून्यत्वाज् जड़त्वेन प(घ)टादिवत् ॥
यस्तु प्रवर्त्तकः सोऽयमात्मेति परिपठ्यते ।

तथा तत्रैव—सर्वकार्ये(६) यतः कर्त्तुर्भावमालोच्य वस्तुगम् ।
प्रवृत्ति(७)र्दृश्यते यस्मात् स भावः(८)सत्त्ववाचकः ॥
तेन तत्प्राक् चिते(९)र्भावः कर्मवत् किं न मन्यसे । इति ।

स्वकर्मफलभुक्। स्वस्य कर्म स्वकर्म धर्माधर्मात्मकं, तस्य फलं भुङ्क्त इति स्वकर्मफलभुक्। युगपत् सेवा-(१०)कृष्यादि-प्रवृत्तयोर्द्वयोः पुरुषयोरेकस्य फलसिद्धेरितरस्यादर्शनाच्च ।

तथा—सेवाप्रवृत्तयोर्द्वयोः(११) समानगुणशीलयोः ।
एकस्य फलसम्पत्तिस्तेन तत्-कारणपदम् ॥
अदृष्टं सूक्ष्महेतुत्वाद् गम्यते कार्ययोगतः ।
कारणं कर्मसंज्ञं तद् धर्माधर्मात्मकं स्थितम् ॥

पौष्करे (३।४०)—उभयोः कृषिसाम्येऽपि कश्चिद् धान्यानि गच्छति ।
न किञ्चिदपरस्तस्य कर्म कारणकं द्विजाः ॥ इति

कर्त्ता पूर्वोक्तस्य कर्मणः सम्पादयिता, (१२) अचेतनस्य शरीरादेः कर्त्तृत्वायोगात् कर्मणः करणसापेक्षत्वेऽपि कुठारादिवदप्रशस्यतया पुरुषस्यैव प्राधान्याच्च । तथा तत्रैव—

तत्कर्त्ता पुरुषः प्रोक्तो न शरीरस्य कर्त्तृता ।
अचेतनं यतस्तस्मात् कर्त्तृत्वममृते ततः ॥
कर्त्तृत्वं करणे सद्भि तथाप्यस्य प्रधानता ।
वृक्षच्छेदे यथा लोको(१३) न कुठारं प्रशंसति ॥
स कर्त्ता कारणैस्तेन प्राधान्यात् पुरुषः स्मृतः । इति ।

किञ्चिज्ज्ञः किञ्चिदल्पं जानातीति किञ्चिज्ज्ञः(१४)। एतत् किञ्चिज्ज्ञत्वं "विभुः सन्" इत्यादिना उत्तरत्र ग्रन्थकार एव वक्ष्यति। सेश्वरः ईश्वरेण प्रेरकेण

---

Or (१) प्रावर्णोति (२) तदाज्ञानं सू० (३) शुद्धं (४) वनुपादि (५) देहादिचे० (६) सर्वकार्यों यतः (७) प्रवृत्ति दृ० (८) भावसत्तवा० (९) चेतेर्भा (१०) सेहक्र० (११) प्यद्वे (१२) सम्पादिता (१३) लोका (१४) किञ्चिज्ञं

सहितः। न सांख्यानामिव स्वतन्त्र इत्यर्थः। "कर्मणा देहे"त्यादिना उत्तरत्र वक्ष्यति। पशुः पशुत्वमलयुक्तः, मुक्तस्य पशुत्वासम्भवात्। तथा पौष्करे (४।१)—

पशुः पशुत्व(१)संयोगान्न मुक्तः पशुरुच्यते।

अयं च पशुः विज्ञान(२)कल-प्रलयाकल-सकल-भेदेन त्रिविधः। ते च क्रमेणैक-द्वि-त्रि-मला भवन्ति।

यस्मात् स्वदृक्(३)क्रियाशालि-कलाहीनो(४)प्यनीश्वरः।
व्यापकश्चिन्मयः सूक्ष्मः शिववत् संव्यवस्थितः॥ इति। ( —पौष्करे ४।२ )

किञ्चिज्ज्ञत्वं च उत्तरत्र सूत्रकारेण(५) प्रदर्शितम्॥ १८॥

इत्थं पशुलक्षणमुक्त्वा तद्-विलक्षणेषु पञ्चसु पाशेषु पृथग्भूतमाणवं मलं स्वायम्भुव-सूत्रेण निरूपयति—

**अथाऽनादिमलः पुंसां पशुत्वं परिकीर्त्तितम्।**
**तुष-कम्बुकवद् ज्ञेयं मायावापाङ्कुरस्य तत्॥ १९॥**

अथ पशु-लक्षणानन्तरं मलादयो व्याक्रियन्त इति शेषः। अनादिश्चासौ मलश्चानादि-मलः, मलिनीकरोति दृक्क्रियात्मकं तेजः प्रच्छादयतीति मलः। मलशब्द आच्छादक-पर्यायः कृत्-प्रत्ययान्तः। न विद्यते आदिर्यस्य सः अनादिः। अत्र पाचक-विशेषणीभूत-शोभनपदवद् आछादकाज्ञान(६)विशेषणानादिपदेन आच्छादनक्रियासम्बन्धस्याऽनादित्व-प्रतिपादन-द्वारा तत्सम्बन्धिनो मलस्याप्यनादित्वमुक्तम्। अयं मलः पुंसां पुरुषाणां पशुत्वमिति कीर्त्तितम्। तत्र मलस्वरूपे दृष्टान्तमाह—तुषकम्बुकवदित्यादि। तत् मलरूपं पङ्कम् (७)। मायावापाङ्कुरस्य आवाप(८)श्चाङ्कुरश्च आवापाङ्कुरः, द्वन्द्वैकवद्भावः। मायाया आवापाङ्कुरं मायावापाङ्कुरं तस्य, तुष-कम्बुकवत् तुष-कम्बुकमिव ज्ञेयम्। यथा हि तुष-कम्बुकः शालितण्डुलानामावापस्य उच्छूनतायाः प्रसवाभिमुखभावस्य अङ्कुरोपत्ते-र्निमित्तम्। एवं मायाया शिवेच्छा(९)वशादावापस्य प्रसवाभिमुखभावस्य कलादि-कार्यादेश्च तन्निमित्तमिति। एतदुक्तं भवति—यस्येदमस्ति, (१०)तं प्रति माया प्रसवाभि-मुखी भवति कलादीं(११)श्चोत्पादयतीति।

ननु आत्मनि तुषकम्बुकस्थानीयो मलो वर्त्तते। मायायां च कलाद्यङ्कुर(१२)जन्मेति भिन्नाधिकरणत्वात् कथमेकाधिकरणो दृष्टान्त इति चेत्। सत्यम्। नायं सर्वथा

---

Or (१) पशुत्वासं (२) पशुं विज्ञानं (३) स्वद्रक्रिया (४) हीनोप्यसीश्वरः (५) उत्तरसूत्रकारेण (६) च्छादनज्ञम-विशेषणमना० (७) पङ्कं (८) वापाश्चा० (९) याच्छिवे (१०) यस्येदस्ति (११) कलादिश्चो (१२) कलाद्यगुरजन्मे०

दृष्टान्तः, किन्तु निमित्तनिमित्तीभावमात्र इत्यदोषः। अत्र तुष-कम्बुकदृष्टान्तेन शास्त्रान्तरोक्त-ताम्र(१)कालिकादृष्टान्तोऽप्युपलक्षणीय(२)इति। तदुक्तं श्रीमन्मतङ्गे (पुंप्रधानेश्वरसाधनपटले ८० )—

ताम्र(३)कालिकवद् योगात् सहजः परिकीर्त्तितः। इति।

अत्रापि यथा ताम्रस्य कालिका रसशक्त्या निवर्त्तते। तथा मलः शिवशक्त्या निवर्त्तत इत्येतावति दृष्टान्तत्वम्। नतु सर्वथा साधर्म्यादिति(४)बोध्यम्। अस्य च पर्याय-नामानि मृगेन्द्रे दर्शितानि। यथा—

पशुत्व-पशुनीहार-मृत्यु-मूर्च्छा-(५) मलाञ्जनैः।
अविद्यावृतिरुग्ग्लानि (६) पापमूलक्षयादिभिः॥ —मृ०१।७।७

सुप्रभेदे च—मलोऽज्ञानं तमोऽज्ञत्वं(७)तिरस्कारकरस्तथा।
पतिः पशुरविद्येति मलपर्यायवाचकः॥ इति॥ १९॥

अत्र पुंसामिति बहुवचन-निर्देशाद् मल इत्येकवचननिर्देशाच्च मलस्यैकस्यैव बहुपुरुष-क्रियावारक-शक्तिवैचित्र्यमस्तीति ध्वनितमर्थं मृगेन्द्रसूत्रेण (१।७।८) मुखतो दर्शयति—

**तदेकं सर्वभूतानामनादि निविड़ं महत्।**
**प्रत्यात्मस्थ-स्वकालान्ता-पायि(८)शक्तिसमूहवत्॥ २०॥**

तद् आवरणं सर्वभूतानां चतुर्दशविधानामपि प्राणिनामेकमेव। कस्मादित्यत्र विशेषणद्वारेण हेतुमाह—अनादीति(९)। अनादि न मायीय(१०)बन्धनवदागन्तुकम्। अत एवैकम्। अनेकत्वे हि तस्यांऽचेतनत्वात् कारणान्तर-पूर्वकत्वेनाऽनादित्वानुपपत्तिः। नच कारणान्तर-पूर्वकत्वेऽपि कलादिना (११) पारम्पर्येण बन्धकत्वात् अनादित्वं भवतीति वाच्यम्। तस्य प्रवाहानादित्वानङ्गीकारात्। तदङ्गीकारे तु पुंसां मलाभावा(१२)वस्था-वश्यकतया तदानीं शिवस्येव पुनर्बन्धाभावप्रसङ्गात्। तस्मान्न कर्मवत् (१३)प्रवाहानादित्वं मलस्य। किन्तु कारणाभावादेवाऽनादित्वं मायावत्।

निविडं घनम्, अभेद्यमित्यर्थः। व्यापकानामात्मनामावारकत्वात् महत्। ननु मलस्यैकत्वे एकमुक्तौ सर्वमुक्तिप्रसङ्ग इत्यत आह—प्रत्यात्मस्थ-स्वकालान्तापायि-(१४) शक्तिसमूहवदिति। प्रत्यात्मस्थाः प्रति पुरुषं वर्त्तमानाः स्वकालान्ता

---

Or (१) ताटका (२) लक्षणमिति (३) ताम्रका (४) साधर्म्यंतेति (५) मृत्युमानूच्छा (६) वृतिरुग्वानि (७) ऽज्ञत्वति० (८) पाय (९) अनादिति (१०) माधिय० (११) लादिनात्पारं (१२) भावीवस्था० (१३) कर्मत्ववत् (१४) पायश०

पायिन्यः(१) स्वस्वपरिणाम-कालापसारिण्यः या शक्तयस्तासां समूहः सोऽस्यास्तीति तद्वत्। तथोक्तं तत्त्वत्रय (२) निर्णये (११)—

मलशक्तयो विभिन्नाः(३)प्रत्यात्मं(४)चैव तद्गुणावरिकाः। इति।

एवञ्च सति मलस्यैकत्वेऽपि तदीयावारक-शक्तीनामानन्त्यात् तदावार्याणामपि(५) भेदाद् नैकमुक्तौ सर्वमुक्तिप्रसङ्गः।

अनेन सूत्रेण मलस्यैकत्वादि-प्रतिपादकेन तत्स्वरूप-लक्षणमुक्तम्। तत्र प्रमाणं तु मोहादिलक्षण-कार्यलिङ्गं शेषवदनुमानं द्रष्टव्यम्। तद् यथा—मोहादिकं कार्यं सकारणकं कार्यत्वाद् घटवत्। अत्र च मायादीनां प्रकाशकतया मोहकारणत्वासिद्धेः परिशेषात् मोहकारणतया मलस्य सिद्धिः। तथा किरणे—

प्रकाशो व्यक्तिशब्देन मलशब्देन(६)चावृतिः।
व्यक्तिर्याऽणोमलः प्रोक्तः स्फुटं दीपान्ध(७)कारवत्॥ इति

मतङ्गे च—तस्माद् द्वयं (८) मलो माया सदा दीपान्ध(९)कारवत्।
द्वयोः(१०) स्वभावभेदश्च त्वयाऽऽख्यातमिदं मुने॥ इति।

मोहादीनि मलकार्याणि सप्तविधानि भवन्ति। तद् यथा तत्रैव (मातङ्ग-पारमेश्वरे (६।१०३)—

मोहो मदश्च रागश्च विषादः शोष एव च।
वैचित्त्यं चैव हर्षाख्यः(११)सप्तैते सहजा मलाः॥

एतेषां स्वरूपं मतङ्गादौ द्रष्टव्यम्॥ २०॥

नचैता मलस्य शक्तयः स्वातन्त्र्येण रुन्धन्ति(१२)अपसरन्ति वा, किन्तु परमेश्वर-रोध-शक्त्यधीनाः(१३)। साऽपि रोधशक्तिरुपचारात् पाश इति [मृगेन्द्र]सूत्रद्वयेन [७।११] प्रतिपादयति—

**तासां माहेश्वरी शक्तिः सर्वानुग्राहिका शिवा।**
**धर्मानुवर्त्तनादेव पाश इत्युपचर्यते॥ २१॥**

माहेश्वरी शैवी(१४)शक्तिः तासां मलशक्तीनां धर्मानुवर्त्तनात् धर्मस्य दृक्क्रिया(१५)-सन्निरोधकत्व-लक्षणस्य अनुवर्तनात् अनुसरणादेव। हेतुपञ्चमीयम्। पाशतया

Or (१) पाथिन्यः (२) तत्त्वनि० (३) क्तयो भिन्नं (४) प्रत्यात्मानं च (५) तदाचार्याणामपि (६) शब्दे चा० (७) दीपाकार० (८) तस्मादियं (९) दिपांधका० (१०) द्वया स्व० (११) वैचित्यहर्षाख्यश्च (१२) रुन्धस्वप० (१३) शक्त्याधी (१४) शैवि (१५) द्रक्रिया

पाशत्वेन उपचर्यते। नचात्र मुख्यं पाशत्वम्। तत्र हेतुतया रोधशक्तिं विशिनष्टि— सर्वानुग्राहिका शिवेति। सा सर्वानुग्राहिका सकल-जगदनुग्रह-स्वभावा शिवा तच्छ्रेयः-प्रसाधिका यतः, ततो न मुख्यत्वमित्यर्थः ॥ २१ ॥

नन्वस्या रोधशक्तेः(१) रोधनैकस्वभावायाः कथमनुग्रहकारित्वमित्याशङ्क्याह—

परिणामयत्येताश्च(२)रोधान्तं कार्क(३)चित्त्विषा।
यदोन्मीलनमाधत्ते तदानुग्राहिकोच्यते ॥२२॥ (मृ० ७।१२)

एताश्च(४) सर्वभूतगताः मलसम्बन्धिनी आवरणशक्तिः (५) रोधान्तं तदधिकार-कालं यावत् तावत् परिणामयति (६) परिणामेन योजयति (७)। परिणामशब्दात् "प्रातिपदिकाद्धात्वर्थे" इति णिचि(८) कृते परिणामयतीति रूपम्। अत्र णौह्रस्वाभाव(९) श्छान्दसः। सा पतिशक्तिः कार्क(१०)चित्त्विषा। क(११) एवार्क कार्कः तस्य चित्त्विषा चिद्रूप-त्विषा(१२) तया कार्कचित्त्विषा। क(१३)शब्देन मूर्धा(१४) सदानुग्रहैकव्यापार ईशान उक्तः, "ईशानो मूर्द्धे"ति मन्त्रलिङ्गात्। स एव(१५)सकलजगदनुग्रहे नित्योद्युक्तत्वात् अर्केणादित्येनोपमितः। ततः प्रवृत्तया परश्रेयः-प्रकाशिकया चित्त्विषा ज्ञानभासा हेतुभूतया यदा यस्मिन् काले उन्मीलनम् अनुन्मीलित-स्वरूपाणामणुवर्गाणाम्(१६) आशयविकाशनमाधत्ते करोति, तदा तस्मिन् काले अनुग्राहिका अनुग्रहकरी उच्यते भण्यते(१७)। यद्यपि रोधशक्तेर्मल-परिपाकान्तमेव तिरोधानैकस्वभावत्वं, तथापि तदनन्तरमणुवर्गाणामाशयविकासनहेतुत्वादनुग्राहकत्वमित्यर्थः। तथाच इयमेव पतिशक्तिर्यावन्मलपरिपाकमचिद्रूपाणि मल-कर्म-मायातत्कार्याण्यनुगृह्णाति, चिद्रूपतामा(१८) त्मनस्तिरोदधाति। पाकानन्तरमात्मनोऽनुगृह्णाति। पाशं तिरोदधातीति चिदचितां सर्वेषामनुग्रहकारित्वात् सर्वानुग्रह-कारिकेत्यपि सिद्धम्। तद् यथा—

शिवस्य शक्तिः सर्वेषां सदाऽनुग्रहकारिणी।
पाशधर्म-निरोधेन पाशानां पाशहेतुना ॥
निवृत्तियोग्यतां तेषां करोतीति यतस्ततः।
पाशधर्मनिरोधाच्च विधत्ते पश्वनुग्रहम् ॥
तादात्मिकेन रोधेन रोधिके(१९) त्युपचर्यते इति ॥ २२ ॥

---

Or (१) रोधशक्तिः (२) णामयति ताश्च (३) काकश्चिचित्विषा (४) ताश्च (५) शक्ति रोधा (६) णामधिति (७) योजयन्ति (८) प्रातिपदाद्धात्वर्थे णिनिचिक्रते (९) अवानुभाव (१०) काकचि० (११) एक एवा० (१२) पत्वितया (१३) कः श० (१४) मूर्धा (१५) एवं स० (१६) वर्गाणि (१७) गण्यते (१८) चिद्रूपानात्मन (१९) रोधितके०

एवं मल-तिरोधानशक्तिरूप-पाशद्वयमभिधाय अवशिष्ट-पाशेषु "मायोपरि महामाये"-त्युक्तत्वात्(१) मायादेरभ्यर्हितं(२) महामायारूपं विश्वसारोत्तरसूत्रेण दर्शयति -

## वागीश्वरी च शुद्धाध्व-(३)मूलोपादानकारणम् ।
## नोपादानं विना कार्यं कदाचिदुपलभ्यते ॥ २३ ॥

शुद्धस्याऽध्वनो मूलभूतमुपादानकारणम् । चशब्दो(४)वधारणार्थः । सैव वागीश्वरी महामाया । तदुक्तं श्रीमत्पौष्करे—

परा वागीश्वरी विद्या मायाऽविद्याऽपरा स्मृता । इति ।

महामायाया नादादीनि बहूनि पर्यायनामानि । तथा नादकारिकायाम्—

सिद्धो नादः परसुमङ्गला ( ? ) मालिनी महामाया ।
समनानाहत बिन्दुरघोषा वाग् ब्रह्मकुण्डलिनीतत्त्वम् ( ? ) ॥
विद्याख्यं चेत्युक्तस्तैस्तैः शब्दैस्तदागमेष्वित्थ(५)मिति ।

अनेन महामायाया शुद्धाध्वोपादानत्वरूपं लक्षणं प्रदर्शितम् । तेन च कार्यलिङ्गकमनुमानं तत्सद्भाव-साधकं प्रमाणमाक्षिप्तम् । तथाहि—शुद्धाध्वाऽयं(६) सोपादानः(७) कार्यत्वात् घटवत् । नचात्र समवेतशक्तेरेवोपादानत्वेन (८)सिद्धिरस्त्विति वाच्यम् । तस्या उपादानकारणत्वे(९)ऽचेतनत्वापत्त्या चेतनशिव-समवायायोगात् । यथा श्रूयते पौष्करे (२।११)—

शिवे कर्त्तरि तादात्म्यान् नेयं(१०) कुण्डलिनी स्थिता ।
उपादानत्वतो हेतोः कुलाले मृत्तिका(११) यथा ॥ इति ।

अत्र मायाप्रकृत्यो(१२)र्मोहकत्वेन प्रबुद्धपुरुष-कायकरणरूप-शुद्धाध्व-कारणत्वायोगेन परिशेषात् (१३)तदनुकारि-कारणतया महामायासिद्धिः । तथा पौष्करे (२।६—७।१०)—

मायापि नात्रोपादानं मोहकत्वात् स्वतेजसा ।
यतः प्रबुद्धपुंस्कायकरणानां न कारणम् ॥
शुद्धाध्ववर्त्तिनः सर्वे प्रबुद्धाः शिवतेजसा(१४) ।
तस्माच्छुद्धाध्वनश्चा(स्त)स्य स्वानुकार्येव कारणम् ॥
इष्यतां कुण्डलिन्याख्यं शुद्धमेतद् द्विजोत्तमाः । इति

---

Or (१) मायेत्यक्तत्वां (२) रभ्यभिहितं (३) शुद्धाध्वामू० (४) यच्छब्दो (५) गमेष्विधमि० (६) शुद्ध अध्वायं (७) पादानका० (८) पादानत्वे सिद्धिरस्त्विति (९) कारणत्वाद० (१०) त्स्यात् कैयं (११) त्ति वत्तिका (१२) क्रत्यययो र्मो० (१३) परिशेषान्त० (१४) तेजसः

ननु कार्यस्य सोपादानत्वमसिद्धम्। प्रध्वंसे व्यभिचारादित्याशङ्क्याह—उपादानमित्यादि। उपादानं उपादानकारणं विना अन्तरेण कार्यं कदाचिदपि नोपलभ्यते न दृश्यते। कार्यत्वहेतोर्भावत्व-विशेषणदानेन व्यभिचारः परिहरणीय इति भावः। अस्मादपि शुद्धाध्ववासिनां परमोक्षं प्रति बन्धकत्वात् पाशत्वमेव। यथा श्रीमत्पौष्करे (२।२-३)—

किञ्च रुद्राणवो येन बध्यन्ते यत्र वा स्थिताः(१)।
विमुच्यन्ते यतो वाऽयं स बिन्दुरिति गम्यताम्॥ इति॥ २३॥

अथ [स्वतन्त्रतन्त्रीय-] सूत्रान्तरेण तस्य सकलजगदुत्पत्तिहेतुभूतं शुद्धाध्वकार्यं दर्शयति—

**याऽथ(२) कुण्डलिनी शक्तिर्मायाकर्मानुसारिणी।**
**नादबिन्द्वादिकं कार्यं तस्या इति जगत् स्थितिः॥२४॥**

अत्राऽथ(३)-शब्दः शिवसमवाय-शक्त्यपेक्षः, समवायिशक्तेः शिवस्य च मायोर्ध्वत्व-(४) प्रतिपादनात्। तथा (५) सर्वज्ञानोत्तरे श्रूयते—

निष्कला परमा शक्तिरचिन्त्या सर्वतोमुखी।
संसूक्ष्मा(६)निर्मला नित्यानन्दा निर्वाणदायिनी॥
या विजृम्भति तत्त्वेषु(७) ··· चैव हि (?)।
तया धृतं जगत् सर्वमेकयाऽनेकरूपया॥
अस्या(८) ऊर्ध्वं निरालम्बं निराधारं निरामयम्।
अचिन्त्यं(९) व्यापकं शान्तं सृष्टि-संहार-वर्जितम्॥ इति।

एवं समवायिशक्तेरधो(१०) वर्त्तमाना मायाकर्मानुसारिणी माया च कर्म च मायाकर्मणी, मायाकर्मणोऽनुसारः मायाकर्मानुसारः, सोऽस्याऽस्तीति मायाकर्मानुसारिणी। निवृत्त्यादि-कलारूपेण मायाकार्य-पृथिव्यादि-तत्त्वाधारभूता (११) तद्वर्त्तिनां कर्मानुगुणवाक्शक्तिरूपा चेत्यर्थः। यद्वा मायाक्षोभकानन्तदेव-शरीरोत्पादकत्वेन तस्या (१२) मायानुकूलत्वम्। कर्मजन्य-भावप्रत्ययानुवेधशब्दोत्पादकत्वात् कर्मानुकूलत्वम्। कुण्डलिनी कुण्डलिन्याख्या या शक्तिः शिवस्य परिग्रहशक्तिः। तदुक्तं रत्नत्रये (१६६)—

मन्त्रयोनिर्महामाया या परिग्रहवर्त्तिनी। इति।

यथा सर्वज्ञानोत्तरवृत्तौ—अत्र कुण्डलिनी-शब्दवाच्या तु भुजङ्गकुटिलाकारेण नादात्मना स्वकार्येण प्रतिपुरुषं भेदेनाऽवस्थिता, नतु स्वरूपेण प्रति-

---

Or (१) स्थिताः (२) याथः (३) अवाथः (४) मायाध्वं॰ (५) तदा (६) सूक्ष्मनि॰ (७) तत्त्वेषु चैव हि (८) आस्या (९) चिन्त्यव्यापकं (१०) रधी (११) भूताः (१२) तस्य मा॰

पुरुष(१)मवस्थितेत्यर्थ इति । श्रीमत्त्रयोदशशक्तिकायाम्—भुजङ्गकुटिलाकारेति । तस्याः महामायायाः कार्यभूतं नादबिन्द्वादिकं नादश्च बिन्दुश्च नादबिन्दू (२), तौ आदिर्यस्य तन्नादबिन्द्वादिकं जगत्प्रपञ्चः (३) शुद्धाध्वा, इति इत्थं स्थितिः सिद्धान्तः । अत्र चादिशब्देन नादाख्येश्वर-विद्यान्त-तत्त्वानां नादादिपञ्चतत्त्ववर्त्ति-भुवनतनुकरणादीनां(४) कामिकादीनां तन्त्राणां च ग्रहणम् । अथवादिशब्देन शुद्धेतराण्यपि तत्त्वानि गृह्यन्ते, कुण्डलिन्याः साक्षात् परम्परया (५)च सकलप्रपञ्चकारणत्वात् । यथा चाहुः कालोत्तरे—

पञ्चत्रिंशतितत्त्वं हि (६) शिवतत्त्वाद् विनिर्गतम् (७) ।
तत्र स्थितिश्च (८) वृद्धिश्च तत्रैव च लयो(९) भवेत् ॥

अत्र शिवेन समवायिशक्त्या क्षुब्धाया(१०) महामायायाः(११) सकाशान्नादाभिधानं तत्त्वं प्रथममुत्पद्यते । इदमेव शिवाधारकतया शिवतत्त्वमित्यपि वदन्ति । ततः सकाशाद् बिन्दुसंज्ञकं(१२)तत्त्वमुत्पद्यते । इदञ्च तत्त्वं शक्त्याधारकतया शक्तितत्त्वम् । ततः शक्तितत्त्वात् सदाख्यं तत्त्वम् । ततः सदाख्या(१३)दीशाख्यं तत्त्वम् । ईशाख्याद् विद्याख्यं तत्त्वमिति क्रमेण शुद्धानि पञ्चतत्त्वानि जायन्ते । तत्र विद्यातत्त्वे विद्यातत्त्वाधिपतिश्च, भृगुण्यादयः सप्त विद्याराज्ञयश्च, तदधीनाः सप्तकोटिमहामन्त्राश्च, वाचकशब्दा व्योमव्याप्यक्षरादयश्च, (१४) वैखर्यादयश्च (१५) कामिकाद्यष्टाविंशति-तन्त्राणि च वर्त्तन्ते । यथा मृगेन्द्रे ( १३।१५६ )—

भृगुणी(१६) ब्रह्मवेताली(१७)स्थाणुमत्यम्बिका परा(१८) ।
रूपिणी नन्दिनी ज्वाला सप्त सप्तार्बुदेश्वराः (१९) ।

श्रीमतङ्गे—प्राधान्येन(२०)स्थिता ह्येता विद्या मन्त्राश्च सुव्रत ! (२१) ।
एकाशीतिपदा देवी(२२) या सा शक्तिः (२३) शिवात्मिका ॥
शा[न्तौ]न्ताद् विनिर्गता पूर्वं स्थानं तस्या(२४)स्तदात्मकम् ।
लये च शिवतत्त्वाख्यं व्यक्तौ बिन्द्वा[त्मकं]द्वयं परम् ॥
भो[गः]गे सदाशिवस्था[नं]नं ईश्वरा[ख्ये]ख्यं च शास[नं]ने ।
विद्यातत्त्वेऽधिकारः(२५) स्याद् योनिर्ज्ञेया सदैव हि ॥
त[त्र]स्यामेव स्थिता मन्त्रा विद्याश्च विविधा मुने ! ।
इयं तावन्महाशक्तिः शिवस्य परमात्मनः ॥ इति ॥ ( मा० ७।३०—३४ )

---

Or (१) पुरुषं वस्थि० (२) बिन्दु (३) प्रपञ्चग्र० (४) नुकारणा० (५) परायाश्च (६) तत्त्वा शिव० (७) गंता० (८) स्थितिवुद्धि० (९) लयं (१०) क्षुब्धायां (११) मायायः (१२) कं त्वमु (१३) सादाख्या० (१४) व्याप्यादय० (१५) चैखरीरजप० (१६) भृगुणि (१७) वेतालि (१८) पूरा (१९) सप्तापदेश्वरः (२०) प्रायोन्वितस्थि० (२१) सुव्रता (२२) देवि (२३) शक्ति (२४) तस्या त० (२५) कारं

अत्र लयभोगाधिकारप्रदस्य शिवस्य आत्मनां भौवनशरीरप्रदस्यापि(१) व्योमव्याप्यक्षर-समूहस्याऽभिव्यक्तिस्थान-शरीरतया लयभोगाधिकार-सम्बन्ध उक्तः। ननु स्वाभाविकः, साधिकरण(२)नाशाकारकोरकोशावशानायानामक्षराणामिवाऽचेतनत्वेन तद्योगात् (?)। तस्मादस्या विद्यातत्त्वे एवाऽक्षरयोनौ मुख्यः(३)सम्बन्ध इति। ईश्वरतत्त्वेऽनन्तादयोऽष्टौ विद्येशाः, तदधिष्ठात्र्यस्त्वष्टौ(४) वामादिशक्तयः, तद्विलासिन्यः शक्तयोऽष्टौ भानुमत्यादयः, उच्छुष्मादयश्च(५) पञ्च रुद्राः,(६) सिद्धान्तशास्त्रैः प्रपूजिताः नन्द्याद्यष्टौ गणेश्वराः, इन्द्रादयो लोकपालास्तेषामायुधानि च शिवासनभूता धर्मादयोऽष्टौ च स्थिताः। तदाह मृगेन्द्रे ( १३।१५८ )—

उच्छुष्माः(७) शाम्बराश्चण्डा(८)महावीर्याः पदद्रुहः(९)।
रुद्रा गणाः सदिक्पालाः शास्त्राणि(१०) पतयस्ततः ॥ इति।

श्रीमतङ्गे—विद्या भानुमती नाम(११) भासुरप्रतिमा तु सा।
ततोऽन्यापि महाभागा रौद्री रौद्रेण कर्मणा ॥
विश्वा च काली कापाली(१२) विद्याऽन्यापि महोदया।
सुखोदयाऽन्या विख्याता तथा वज्रीति कीर्त्तिता ॥
अष्टावेता(१३)यशस्विन्यो विद्येशानां महात्मनाम्।
क्रीडनार्थं विलासिन्यः(१४)पशूनां पाशमोचिकाः ॥ इति (मा०७।१९-२२)

सदाशिवतत्त्वे तु तदधिकारावस्थः सदाशिवः, प्रणवाद्या दश अणवः,(१५) सदाशिवश्च, पञ्च ब्रह्म, षड्ङ्गानि च, अक्षरबिन्दुस्थूलध्वनिरूपो(१६) नादश्च वर्त्तते। तदुक्तं स्वच्छन्दे—

ॐकारेशः शिवो दीप्तः कारणेशो दशेशकाः।
सुशिवश्चैव कालश्च सूक्ष्मरूपोंऽशुतेजसः ॥ इति।

श्रीमतङ्गे ( विद्यातत्त्वपटले २५ )—

ब्रह्माण्यङ्गानि(१७) यानि स्युस्तानि(१८)सादाख्य(१९)गोचरे।
नादो बिन्दुः सकलः सादाख्यं तत्त्वमाश्रितौ(२०) कथितौ।

एतत् सदाशिव-तत्त्वं प्राप्ताः (२१) सर्वेऽपि तत्समा भवन्ति। यथा मतङ्गे (४।५५)—

मेरुपृष्ठं यथा(२२) प्राप्तास्तृणलोष्टादयो भृशम्।
प्राप्नुवन्ति सुवर्णत्वं तद्वत्(२३) सादाशिवे पदे ॥ इति।

---

Or (१) रपदस्यापि (२) साधिकरण (३) मुख (४) ष्ठावमल० (५) उच्छुदय (६) रुद्रा दयः (७) उच्छिष्टाः (८) शावराश्चण्डम (९) द्रुकाः (१०) च्छास्त्राणि (११) तीनां भासु (१२) कालि कापालि (१३) अषावेता (१४) विलासिन्य (१५) अणु (१६) रूपा (१७) ब्रह्मण्यङ्गानि (१८) सुस्थानि (१९) पादाख्या (२०) तत्त्वमाश्रती (२१) शिवं तत्त्वप्राप्तः (२२) यदा (२३) तत्त्वे

बिन्दुतत्त्वे तु भुवनरूपो(१)निवृत्तिमदादिसंज्ञः सद्योजातादि-(२)संज्ञः सकल-निष्कलाख्यः शिवश्चाक्षरबिन्दुहेतुस्वरूप-सूक्ष्मनादश्च वर्त्तते। मृगेन्द्रे ( १३।१६१ )—

बिन्दौ(३) निवृत्त्यादिकलेश्वराः। इति।

तत्त्वप्रकाशवृत्तौ—"सूक्ष्मनादस्य शक्तितत्त्वान्तर्भावत्वेन(४) चोक्तत्वादि"ति वाक्येन सूक्ष्मनादस्य बिन्दुतत्त्वावस्थानं प्रकटितम्। सर्वात्म(५)शम्भुकृतसिद्धान्तदीपिकायामयमर्थः।

नादतत्त्वे तु ध्वनिपतिरिन्धिका वा(६)दीपिका वा रेचिका(७)वा निवृत्त्यादि(८)भुवनपति-संज्ञः शिवो वर्त्तते। चिच्छक्तौ शक्तिमद्-वरिष्ठः परमेश्वरः सकलजगत्परमकारणं कुण्ड-लिनी च वागीशां पतयश्च। तदूर्ध्वं केवलः परः शिव इति। तदुक्तं मृगेन्द्रे (१३।१६२)—

नादे ध्वनिपतिः(९)शक्तौ सर्वशक्तिमतां वरः।
योनिर्विश्वस्य वागीशाः पतयः परतः शिवः॥ इति।

श्रीमत्स्वतन्त्रे—तत्र कुण्डलिनी शक्तिर्माया(१०)कर्मानुसारिणी।
भुवनाधिपतीनां च हेतुस्तद्वासिनां प्रिये !॥
तदतीतं(११) वरारोहे परं तत्त्वं(१२) निरामयम्। इति।

सुप्रभेदे च—तदूर्ध्वं(१३) बिन्दुतत्त्वं तु तदूर्ध्वे(१४) नाद एव तु।
तदूर्ध्वं(१५)शक्तितत्त्वं हि तत्त्वं तत्त्वे तदूर्ध्वतः ( ? )।
अतोर्ध्वे शिवतत्त्वं स्यात् सर्वतत्त्वोपरिस्थितम्॥
शिवाद्यवनिपर्यन्तं व्यापकं तेन तेजसा।

इदं नादतत्त्वमेव परमकारणं(१६)नित्यम्। तदेव महामायेति केचिदाचार्या वदन्ति। तेषां पक्षे चत्वार्येव कार्याणि शुद्धतत्त्वानि। यथा—

शुद्धानि पञ्चतत्त्वान्याद्यन्तेषु स्मरन्ति शिवतत्त्वम्।
शक्ति-सदाशिवतत्त्वे ईश्वर-विद्याख्यतत्त्वे च॥

अस्य व्याख्या—तेषु मध्याच्छिवतत्त्वं बिन्द्वात्मकमाद्यं प्रधानमुपादानं स्मरन्ति पूर्वाचार्याः, परमोपादानत्वेनैव चास्य मायावन्नित्यत्वं सिद्धम्। अतश्चान्यानि चत्वारि तत्त्वानि तत्कार्याणीति भाव इति। श्रीमत्पौष्करे तु—नादाभिधानं शिवतत्त्वमपि कार्यमेव, किन्तु तत्र शक्तितत्त्वान्तर्भावेण चत्वार्येव कार्याणि शुद्धानी(१७)त्युक्तम्। तद् यथा—

वृत्तिस्तत्त्वात्मिका(१८) चास्य चतुर्थी(१९) संव्यवस्थिता।

---

Or (१) नरूपान्नि० (२) जातादिः (३) बन्धो (४) न्तर्भवत्वेन (५) सर्वांश० (६) वां (७) का सीचिका (८) नित्यादि (९) ध्वनिपत्ति (१०) क्तिमाया (११) तदतीतु (१२) तत्वनि० (१३) तदूर्ध्वं (१४) नादमेव (१५) तदूर्ध्वं (१६) कारणनि० (१७) शुद्धानि० (१८) सत्त्वात्मिकं (१९) चतुर्था

शिवतत्त्वं सदेशाख्यमीशं विद्याह्वयं तथा ॥
शुद्धान्येतानि तत्त्वानि रुद्राणूनां महात्मनाम् । इति ।

सर्वज्ञानोत्तरे तु—शक्त्यभिधानं बिन्दुतत्त्वमेव परमकारणमित्युक्तम् ।

तद्यथा – अतोर्ध्वं बैन्दवं तत्त्वं विमलं सर्वतोमुखम् ।
परमं सर्वतत्त्वानामनन्तज्योतिरूपकम् ॥ २४ ॥

अथ सूत्रान्तरेण चतस्रोऽपि वाग्वृत्तयो महामायाकार्याणीति शब्दसृष्टिमुद्दिशति—

**तस्याश्चतस्रो वाग्रूपा वृत्तयो वैखर्यादयः ।**
**वैखरी मध्यमा चान्या पश्यन्ती सूक्ष्मसंज्ञिता ॥ २५ ॥**

वाग्रूपा वैखर्यादयश्चतस्रः तस्या महामायाया वृत्तयः कार्याणि । चतसृणामपि क्रमेण नामान्याह—वैखरीत्यादि । एका वृत्ति(१) र्नाम्ना वैखरीत्युच्यते । अन्या वृत्तिर्नाम्ना मध्यमा । अपरा नाम्ना पश्यन्ती । अपरा सूक्ष्मसंज्ञिता(२) । एतासां स्वरूपमुत्तरत्र संग्रहकारः स्वयमेव वक्ष्यति । अनेन शब्दसृष्टिरपि बिन्दूपादानेत्युक्ता भवति । अत्राऽयं सृष्टिक्रमः—शिवेच्छया प्रथमं क्षुब्धाया महामायायाः सकाशान्नाद उत्पद्यते । नादाद् बिन्दुः । बिन्दोरक्षरम् । अक्षरान्मातृकेति (३) । तथा पराख्ये—

बिन्दुः (४)क्षुब्धस्तदिच्छातः शब्दराशिरभूत् तदा । इति ।

मृगेन्द्रे—शक्तेर्नादो भवेद् बिन्दुरक्षरं मातृका ततः । इति ।

आकाशवायुप्रभवः शरीरात् समुच्चरन् वक्त्रमुपैति नादः ।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः ॥ इति ।

स्वायम्भुवे—नवपर्वशतार्थात्म-योनिर्बीजात्मकः(५) परः ।
अकारादि-विसर्गान्तं बीजं तत् षोड़शाक्षरम् ॥
शेषा योनिश्चतुस्त्रिंशदव्यया ह्यक्षरात्मिका ।
सा शक्तिर्देवदेवस्य तया व्याप्तमिदं जगत् ॥ इति ।

आसां चतसृणामपि वृत्तीनामाश्रयभूता निवृत्त्यादयः, कलाः पञ्च च बिन्दोरेव कार्याणि । तथोक्तं रत्नत्रये (८५)—

सैषा चतुर्विधा वृत्तिर्निवृत्त्यादि(६)कलाश्रयात्(७) ।
पञ्चधा भिद्यते भूयः कलास्ता बिन्दुवृत्तयः ॥ इति ।

Or (१) कवृत्ति० (२) सूचासं० (३) मावकेति (४) बिन्दुचुब्ध (५) निबीजा० (६) वृत्तिनि० (७) लाश्रयाः

मूलतन्त्रेऽपि—पूर्वोक्तबिन्दुमध्यस्थाः (१)कलाः पञ्च समुद्भवाः । इति ।

इयं महामाया शब्द-वस्तूभयात्मिका भवति ; सूक्ष्मादीनां शब्दानां वर्णपदमन्त्रात्मकानाञ्च वस्तूनां चोत्पादनात् । तथा पौष्करे—

शब्दवस्तूभयात्मानौ बिन्दुर्नान्यतरात्मकः । इति ।

मन्त्राध्वा च पदाध्वा च वर्णाध्वा चेति शब्दतः ।

भुवनाध्वा च तत्त्वाध्वा कलाध्वा चार्थतः क्रमात् । इति ॥

अत्र शब्दब्रह्मवादिनः आत्मन एव नादादिक्रमेणाऽवस्थानमिति वदन्ति (२) । तदयुक्तम् । अविकारिणस्तस्य नादाद्याकारेण परिणामानुपपत्तेः । नापि तच्छक्तेः, तस्या अपि परिणामायोगात् । द्वयोरपि विकारित्वा(३)भ्युपगमे अचेतनत्वप्रसङ्गात् । तस्मात्(४) शब्दोपादानत्वं बिन्दोरेवा(५)भ्युपगन्तव्यमिति । तथा नादकारिकासु(१६)—

अविकार्यत्रात्मोक्तस्तच्छक्ति(६)श्चाप्यतो न योग्यौ तौ ।

बहुधा स्थातुं यद्वा चैतन्यविनाकृतौ विकारित्वात् । इति ॥ २५ ॥

एवं शुद्ध-मायालक्षणं पाशं निरूप्य स्वायम्भुवसूत्रेणाऽशुद्धमायालक्षणं निरूपयति—

**मायातत्त्वं जगद्बीजमविनाश्यशिवात्मकम् ।**

**विश्वेक(७)मकलं सूक्ष्ममनाद्यव्ययमीश्वरम् ॥**

मात्यस्यां प्रलये सर्वजगत्, मयति अस्मात् जगदिति वा माया । तथा पौष्करे—

मयत्यस्माद् जगत् सर्वं तेन माया समीरिता । इति ।

मायारूपं तत्त्वं मायातत्त्वम् । इदमेव तत्त्वं ग्रन्थ्यादि(८)नामभिर्बहुभिर्गीयते । जगद्बीजम् जगतः सर्वस्य कलादेर्बीजमुपादानकारणम् । अनेन विशेषणेन—जगदिदं सोपादानम् उत्पत्तिधर्मकत्वात् यथा पटादिरिति मायासिद्धिरुक्ता । यथा मृगेन्द्रे (९।३)—

कर्त्ताऽनुमीयते येन जगद्धर्मेण हेतुना ।

तेनो(९) पादानमप्यस्ति न पटस्तन्तुभिर्विना ॥ इति ॥

अविनाशि नित्यम् । जगत्-संहारे यद्युपादान-कारणस्य मायाख्यस्यापि विनाशः स्यात्, तत् पुनः सर्गादौ(१०) कस्मादुपादानाज् जगदुत्पद्येत । अतो नास्या अनित्यत्वम् ।

अथोच्येत—सर्गादौ उपादानमपि देवः(११) स्रक्ष्यतीति । नैतद् युक्तम् । एवं सति तत्कार्यस्येव (१२) अस्याप्युपादानं विनाऽनुत्पत्तेरुपादानान्तरं कल्प्यम् । तस्याप्यन्यदित्य-

Or (१) ध्यस्थाक० (२) वदन्तीत० (३) कारत्वा० (४) अस्मच्छ० (५) रेषाभ्यु० (६) त्माक्तः शक्ति (७) विश्वे क (८) ग्रन्थ्यादि (९) कार्योपा० (१०) सर्वादौ (११) देव स्र० (१२) कार्यस्येव तस्या

नवस्था स्यात्। व्यक्त्युप(१)संहारेण शक्तिरूपतयाऽवस्थाने न कश्चिद् दोषः। तदिदमुक्तं—

यद्यनित्यमिदं कार्यं कस्मादुत्पद्यते पुनः। इति।—( मृगेन्द्रे ९।५ )

अशिवात्मकम् अशुद्धं, शिवात्मकं चेतनं न भवतीत्यशिवात्मकम्। अचेतनमिति यावत्। अचेतनस्यैव तत्कार्यस्य कलादेरुपलम्भात्। अचेतन-तत्कार्योपलम्भेऽपि(२) तत्कारणस्य चेतनत्वाभ्युपगमे कारणानियमलक्षणः सकलानुमानोच्छेदः सर्वव्यवहार-लोपोऽपि दोषः स्यात्। तदुक्तं ( मृगेन्द्रे ९।४ )—

तदचेतनमेव स्यात् कार्यस्याऽचित्त्वदर्शनात्।
प्राप्तः सर्वहरो(३) दोषः कारणानियमोऽन्यथा॥ इति।

विभु व्यापि। पुरुषस्य भोगाय तिर्यगूर्ध्वाधो(४)मध्यस्थित-स्रोतोभिः सर्वतोमुखतया सर्वकार्योत्पादकत्वात्। तदुक्तम्—

अव्यापि चेत् कुतस्तत् स्यात्(५) सर्वेषां सर्वतोमुखम्। इति।—( मृगेन्द्रे ९।५ )

एवं पत्तुण्डादिभेदानामपि भोगाधि(६)ष्ठानत्ववत् कलादि-कार्यभेदानामपि भोगाधिष्ठानतया भेदरहितम्। भिन्नत्वे(७) अनेकत्वे सत्यचेतनस्य घटपटादिवदुत्पत्ति-मत्त्वप्रसङ्गात्। इदं तु नोत्पत्तिमत् न कारणजन्यम्, परमकारणत्वात्। नहि परम-कारणानि बहूनि भवन्ति। यथा मृगेन्द्रे ( ९।७— )

यदनेकमचित् तत् तु दृष्टमुत्पत्तिधर्मकम्।
न तदुत्पत्तिमत् तस्मादेकमभ्युपगम्यताम्॥ इति।

ननु जगदुत्पत्तौ परपरिकल्पित-परमाण्वादिवदुपादानकारणबहुलत्वमस्तु; बहुभ्योऽपि-तन्तुभ्यः पटस्यैकस्योत्पत्तिदृष्टेः, तद्वद् जगत् सर्वमनेकस्मात् कारणादुत्पद्यताम्(८)। किं ग्रन्थ्यात्मक(९)परमकारण-कल्पनयेति चेत्। न। यदनेकतन्त्वात्मकं(१०) कारणं पटस्योक्तं, तदनेकमपि एकस्माद् दुकूल-कार्पासादि-द्रव्यादुत्पन्नत्वादेकम्। यथा च एकस्माद् दुकूल-कार्पासादि-द्रव्याद् अनेकाकार-पटाद्युत्पत्तिः; एवं परमकारणात् सर्ग-स्थिति-लयाधारात् सर्गादौ मायातत्त्वाज् जगदुत्पत्तिरिति न कश्चिद् दोषः। तदूक्तम्—

पटस्तन्तुगणाद् दृष्टः(११) सर्वमेकमनेकतः।
तदप्यनेकमेकस्मादेव बीजात् प्रजायते॥ इति।—मृगेन्द्रे (९।७)।

एवमनेकत्वे(१२) सत्यचेतनानामनित्यत्वप्रसङ्गेन परमकारणत्वभङ्गमजानानां परमाणु-

Or (१) व्युत्पत्तिसं० (२) चेतनकार्योपलम्भेऽपि (३) सर्वसारो (४) गूर्ध्वाधी (५) कुतस्तस्याः (६) भागाधिष्ठानवत् (७) हीनत्वे (८) उत्पाद्य० (९) ग्रन्थ्या० (१०) नेकात्मकं (११) दृष्टस० (१२) मनिकत्वे

गणकारणत्ववादिनां वैशेषिकादीनां द्रव्यादिषट्पदार्थ-षोड़शपदार्थान्यतरज्ञानस्य निःश्रेयस(१) हेतुतावर्णनेन प्रकटितप्रबोधतैक्ष्ण्यानामपि(२) उपेक्षणीय[त्व]म्। तदुक्तम् ( मृगेन्द्रे )—

भूतावधि(३) जगद् येषां कारणं परमाणवः (४)।
तेषां पूर्वोदिताद्धेतोर्ज्ञातैव(५) ज्ञानसूक्ष्मता ॥ इति।

अकलं कलारहितम्। कला नाम(६) ह्यावृतवाद्युक्ताः(?) पुरादिसन्निवेशानेकरुद्रभोग्यत्वादयो विशेषाः, तद्रहितम्। नात्र कचित् पुराणि नित्यानि दृश्यन्ते(७)। नापि तत् सन्निवेशाः। नापि भोग्यत्वम्।

ननु तत्र विशेषाभावे मण्डलेशानामवस्थानप्रतिपादिकायां "मायायां मण्डलेशानाः क्रमतोऽष्टौ व्यवस्थिता" इति श्रुतेरनुपपत्ति(८)रिति चेत्। न। मायायाः शक्तिरूपत्वेन भुवनासम्भवेन तत्र स्थित्यनुपपत्तेः तत्समानदेशकलामस्तकस्थितानामुपचारेण तत्रावस्थानश्रुत्युपपत्तेः। तदुक्तं श्रीमन्मृगेन्द्रे ( १३।३ )—

मायायामपि पठ्यन्ते गहनेशादयोऽधिपाः।
तत्त्वशुद्धिश्च दीक्षायां सर्वं तत्कृतिमस्तके ॥ इति।

मायागर्भाधिकार्ये तदीश्वरत्वं, (९) न तु पञ्चाष्टकादिवन्नियतभुवनेश्वरत्वमित्येतद् ज्ञापयितुमत्रोपचाराभिधानमिति भावः।

सूक्ष्मम्। न स्थूलम्। अव्यक्त(१०)बुद्ध्यादिवत् स्थूलं न भवतीत्यर्थः। सूक्ष्मतारतम्यविश्रान्तभूमित्वादपि इदमेव सूक्ष्मम्। तथा पौष्करे—

तन्मात्राणि पृथिव्यादेः सूक्ष्माण्येभ्यस्त्वहङ्कृतिः।
तस्याः सूक्ष्मतरा बुद्धिस्तस्याः(११) प्रकृतिरेव च ॥
तस्याः कलादिवर्गश्च माया सूक्ष्मतरा ततः।
यत्र सौक्ष्म्य(१२)पराकाष्ठा सा मायेत्यभिधीयते ॥ इति।

अस्याः सूक्ष्मत्वमन्तर्गूढ़पटस्य कटादेरिवाभिप्रेतम्। नतु सर्वथा विकारराहित्यम्। यथा मृगेन्द्रे ( ९।२१ )—

यथा कटादिगूढस्य पटादेस्तद्व्युदासतः (१३)
नासतः क्रियते व्यक्तिः कलादेर्ग्रन्थितस्तथा(१४) ॥ इति।

अनादि परमकारणत्वात्। यच्चानादि, न तत् सर्वात्मना परिणमते। किन्तु शक्त्यात्मनावस्थितायास्तस्या(१५) एकदेशतो मायात्मकादु(१६)पद्यते व्यक्तिमासादयति(१७)।

---

Or (१) विश्रेयस० (२) धतैक्षिण्या० (३) स्रुतावधि (४) परमकारण (५) ज्ञातेव (६) कलानां मह्वाव्रतवा० (७) दृश्यते (८) रनुपपत्तेरि० (९) तदीश्वर्षं न० (१०) व्यक्तं बुद्धिववत् (११) तस्या प्र० (१२) सौक्ष्मे (१३) स्तद्युदा० (१४) ग्रन्थितत्वता (१५) त्मनावस्थता स्तस्या एक० (१६) मायात्मादुत्० (१७) दयन्ति

येषां सर्वात्मना जगद्बीजं परिणमते, तेषां तदनित्यमिति अनादि-(१)पदेन एकदेश-परिणाम-सिद्धिः। एवं सति अस्मिन् सिद्धान्ते (२) कार्यत्वं न पटकुटीवत् वृत्तितया, पट-दशायां कुटीकृत्यस्याऽनुपपत्तेः। नापि सांख्यवद् दधि-(३)क्षीरन्यायेन परिणामतया, तथात्वे क्षीरनाशवत् सर्वात्मना उपादान-नाशप्रसङ्गात्। अत एव न बौद्धवद् बीजान्तराङ्कुरन्यायः, तत्रापि सर्वात्मना बीजनाशात् (४)। नापि मायावादिवत् शुक्तिरजत-न्यायेन विवर्त्ततया, कार्यस्याऽसत्यत्वप्रसङ्गात्। तस्मादस्मिन् मते (५) घृतकीट-न्यायेन एकदेश-परिणामतयैव कार्यत्वं सिद्धम्। तदुक्तम्—

बिन्दु-माया-प्रधानानां विकृतिर्घृत(६)कीटवत्। इति।

सिद्धान्तदीपिकायाम्—शिवेच्छाप्रेरिता (७)नन्दनाथ-विक्षोभिता पुनः।
घृतकीटनयादेकदेशेन परिणामता॥
शक्त्यात्मक-कलादीनि(८) प्रयान्ति स्थूलरूपताम्।
नाऽसतो विद्यते भावो नाऽभावो विद्यते सतः॥ इति।

अत्र तनुकरणादीनि कार्याणि संहृतौ बिन्द्वाद्युपादानेषु शक्त्यात्मनाऽवस्थाय सृष्टौ बन्धात्मक-प्रयोजनाय पुनर्व्यक्तात्मकानि भवन्ति। तथा मृगेन्द्रे (९।१३)—

तदाधाराणि कार्याणि शक्तिरूपाणि संहृतौ।
विकृतौ व्यक्तिरूपाणि व्याप्रियन्तेऽर्थसिद्धये॥ इति।

अव्ययं न तस्याः विकारशक्त्यो व्ययं विनाशं गच्छन्ती(९)ति अव्ययम्, शक्तिव्यय-रहितमित्यर्थः। अव्ययपदेन असत्कार्यवादिभ्योऽस्यात्र विशेषः सूचितः। तेषां हि विशिष्ट-कार्योत्पादन-सम्भवादित्युक्तं मोक्षकारिकासु। इत्थं सर्वविकाराणामुपादानतयाऽऽपूरकत्वेन ईश्वरवत् पुरुषार्थसाधकत्वादीश्वरत्वमिति॥ २६॥

अस्य मायातत्त्वस्य एकत्वे(१०)ऽपि अनेकाकार-कार्योत्पादकत्वं सहकारिसापेक्षत्वं च मृगेन्द्रसूत्रेण (९।२) प्रतिपादयति—

**तदेकमशिवं बीजं जगतश्चित्रशक्तिमत्।**
**सहकार्यधिकारान्त-संरोधि व्याप्यनश्वरम्॥ २७॥**

तत् मायातत्त्वम् एकम्। अशिवम् अशुद्धं मोहकत्वात्। जगतो बीजम्। चित्रशक्तिमत् चित्रा विचित्राः शक्त्यो यस्य तत्(११) तथोक्तम्। तथाचाऽस्य एकत्वेऽपि

Or (१) तदा नित्यादिमादिप० (२) अस्मिन्नते (३) वंदक्षीचि० (४) बीजानाशात् (५) अस्मिं सते (६) विकृतिघृत० (७) च्छाप्रेतान० (८) कलादिनो (९) गच्छति (१०) मायातस्यैक० (११) यस्य तथोक्तं

तच्छक्तीनामनेकत्वाद् विचित्रकार्य-जनकत्वमविरुद्धमित्यर्थः। किंच सहकार्यधिकारान्त-संरोधि *। ताच्छील्ये णिनिप्रत्ययः। अनेन कर्म सहकारीत्युक्तम्, कर्माभावे ग्रन्थि-तत्त्वस्याऽप्रवृत्तेः(१)। व्यापि अनश्वरम्। पदद्वय(२)मेतत् पूर्वमेव व्याख्यातम्। अत्र एकत्वादि-विशेषणानां पुनरुपादानं प्रतिपादयितुं(?) विचित्रशक्तिमत्-(३)सहकार्यधिकारान्त-संरोधि-रूप-विशेषणद्वय-सहवर्त्तितयैवेति न पौनरुक्त्यम्। अस्य मायातत्त्वस्य रूप-माचार्यैरप्युक्तम्—

मायाख्यं चित्रशक्त्या परिगतमकलं कृष्णवर्त्मैकबीजं (४)
नित्यं कर्मान्तरोधि स्वकृतिनिवसनं तत्कृतिव्यापकं च (५)।
कार्याचित्त्वप्रकाश्य ··· दशिवकरं (?) मोहकं स्वापकाले
सत्त्वात्मा च स एवं परमपि च सितं कारणं बोधकं तत्॥ इति॥ २७॥

अथ किरणसूत्रार्थेन(६) शुद्धाशुद्धयोरुपादानयोर्माययोरधिष्ठातु(७)र्निमित्तकारणस्य भेदं दर्शयति—

## शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः॥ २८॥

शिवः शुद्धः परमेश्वरः शुद्धे अशुद्धिरहिते अध्वनि विद्यातत्त्वभुवनाद्यात्मके मन्त्रे मन्त्रेशाद्यात्मके च कर्ता निमित्तं प्रोक्तः उदितः। तत्कृतं (८) तत्त्वभुवनादिकं च समस्त मित्यर्थः। अनन्तः अनन्तादिको वर्गः असिते अशुद्धमायात्मके प्रभुः सृष्ट्यादिकर्ता प्रोक्त इत्यनुषङ्गः। अत्राऽनन्तादीनामीश्वरप्रेरणयैव कर्तृत्वमभिमतम्। तदुक्तमत्रैव—

ईश्वरोऽधस्त- (९) विद्यानां पतीन् स प्रेरयत्यणून् (१०)।
तेन (११) प्रेरितमात्रास्ते कुर्वन्त्यधस्तनं (१२) जगत्॥ इति॥

तथा कैलाससंहितायां—

माया-विक्षोभकोऽनन्तो महेश्वर-समन्वयात्। इति।

यद्येवं शिवस्य सर्वकर्तृत्वं(१३) न घटत इति चेत्। न। अन्तरङ्गामात्य-(१४) पुरोहितादिप्रकृतिवर्गं स्वयमेव कुर्वतो नृपतेर्बहिरात्मकल्पा(१५)ऽमात्यादि-प्रेरणेन (१६) सर्वकर्तृत्ववत् अनन्तादीन् स्वयमेव कुर्वतस्तत्-प्रेरणया च बहिः कर्त्तुः शिवस्य सर्व-कर्तृत्वाविरोधात्। तदुक्तमत्रैव—

* सहकारिणां कर्मणामधिकारान्तं यावत् संरुणद्धि अणून् बध्नाति तच्छीलमिति सहकार्यधिकारान्तसंरोधि, कर्मणामभावे मायातत्त्वस्याप्रवृत्तेरित्यर्थः।

Or (१) ग्रन्थितस्याप्र० (२) पदायुथ० (३) शक्तिनुत् (४) कष्टवर्त्मैक वी० (५) व्यापकत्वम् (६) सूत्रार्थेन (७) तुन्निमित्त (८) तत्कृतिं (९) रो यस्तु वि० (१०) संप्रेरयत्यसौ (११) ते प्रे० (१२) न्त्यथास्तनं (१३) कर्त्तृत्वं (१४) रंगोमात्य० (१५) रात्मकल्पामा० (१६) न कर्त्तृ सर्व

यथा भूमण्डलेशेन नियुक्तः सर्वतः प्रभुः ।
तथाऽसौ कुरुते सर्वं तच्छक्ति-प्रतिबोधितः ॥ इति ।

अत्र शिवप्रेरितस्याऽनन्तस्य कलादि-प्रधानपर्यन्त-तत्त्वानामेव कर्तृत्वम् । अनन्त-प्रेरितस्य श्रीकण्ठस्यैव गुणादि-क्षित्यन्त-तत्त्वानां कर्तृत्वम् । भौतिकसृष्टेस्तु श्रीकण्ठ-प्रेरितस्य ब्रह्मणः कर्तृत्वमिति विवेकः । तद् यथा पौष्करे—

क्षोभकोऽत्र महातेजाः(१) श्रीकण्ठोऽनन्तविक्रमः ॥ ( पौ० ६।३० )
प्रवृद्धः(२) परमेशान ! शक्तिसम्पर्क-मात्रतः ॥ ( पौ० ६।३१ )
गुणादि-क्षितिपर्यन्त-तत्त्वजातं यतो भवेत् (३) ॥ इति । ( पौ० ६।१८ )

श्रीमतङ्गे—स्थितये सर्वभूतानां शरीराण्यसृजत् पुरा ।
स्थूलानि तद्विशिष्टानि सृष्टवान् भूतनायकः ॥ इति । (मा० १९।२-४)

तथा स्वायम्भुवे—तथो(यो)द्वलितसामर्थ्याः सर्वस्य प्रभविष्णवः ।
अनन्तेशादि-विद्येशा बभूवुः कारणेच्छया ॥
तेभ्योऽमितबलाश्चान्ये तेभ्यश्चान्ये नियोगिनः ( ? ) ।
भवन्ति विमलात्मानः सितासितफलप्रदाः (४) ॥
तेभ्योऽपि साञ्जनाश्चान्ये(५) पतीच्छानुविधायिनः ।
येभ्यो निखिलमुत्पन्नं जगत् स्थावरजङ्गमम् ॥ इति ॥ २८ ॥

एवमनन्तक्षोभ्यस्य मायातत्त्वस्य कार्याण्यशुद्ध-स्वरूपाणि मृगेन्द्रसूत्रेण ( १०।१ ) दर्शयति(६)—

**ग्रन्थिजन्य-(७) कला-काल-विद्या-राग-(८)नृमातरः ।**
**गुण-धी-(९)गर्व-चित्ताक्ष-मात्राभूतान्यनुक्रमात् ॥ २९ ॥**

यथायोग्यक्रमाद् ग्रन्थेः मायायाः अनन्तक्षुब्धायाः जन्यानि साक्षात् परम्परया च कार्याणि । श्रीमतङ्गे ( कलातत्त्वपटले २ )—

क्षोभितो(१०)ऽनन्तनाथेन ग्रन्थिर्मायात्मको यदा ।
तदा स्वेन विकारेण तनो(करो)ति विपुलं जगत् ॥

अत्राऽयमुत्पत्तिक्रमः—मायातत्त्वात् प्रथमतः कलाशब्दस्याऽर्थभूतयोः कला-नियति-नाम्नोस्तत्त्वयोः कालतत्त्वस्य च नृशब्देनोक्तस्य च पुंसः(११) पुं(१२)प्रत्ययहेतोस्तत्त्वविशेषस्य चतुर्णां(१३)तत्त्वानां साक्षादभिव्यक्तिः । कलातत्त्वात् तु (१४) विद्या-रागतत्त्वयो-

Or (१) महातेजा (२) प्रवृद्धपर० (३) भवदि० (४) फलप्रदा (५) श्चान्यी (६) दर्शयन्ति (७) जन्यं (८) रागं नृ० (९) गुणधिगर्वचिवा (१०) क्षोभिते (११) पुनः (१२) पुङ् प्र० (१३) चतुर्णा (१४) तु...राग०

र्मातृ(१)शब्दार्थभूतस्य प्रधानतत्त्वस्य(२) त्रयाणां तत्त्वाना(३)मभिव्यक्तिः। श्रीकण्ठ(४)-क्षोभितात् प्रधान-तत्त्वाद् गुणशब्दार्थानां सत्त्वरजस्तमसामभिव्यक्तिः। तेभ्यो धी(५)-शब्दार्थस्य बुद्धि-तत्त्वस्याऽभिव्यक्तिः। बुद्धितत्त्वाच्च(६) गर्वशब्दवाच्यस्य तैजस-वैकारिक-भूतादिरूपेण त्रिविधस्याऽहङ्कार-तत्त्वस्याऽभिव्यक्तिः। तैजसादहङ्कारात् चित्तशब्दवाच्यस्य मनसश्च अक्षशब्द-वाच्यानां ज्ञानेन्द्रियाणां च समुद्भवः। वैकारिकादहङ्कारात् कर्मेन्द्रि-याणामुत्पत्तिः। भूतादिशब्दवाच्या(७)दहङ्कारात् मात्राशब्दोद्दिष्टानां(८) तन्मात्राणां तत्त्वानामुद्भवः। तन्मात्रेभ्यः सकाशाद् भूतानां पञ्चतत्त्वानामुत्पत्तिः। अस्मादनु-क्रमात् एतान्येकत्रिंशत्(९)तत्त्वानि अनन्तेशादिभि र्ग्रन्थितत्त्वतः साक्षात् परम्परया च अभिव्यक्तानीति। अत्र संमतयो बहुलत्वान्न लिखिताः(१०)। अस्याऽशुद्धस्याऽध्वनः परशक्ति-नाद-बिन्दु-सदाशिव-विद्या-रूपः पञ्चस्कन्धः(११)शुद्धो व्यापकत्वेन संस्थितः। तत्र परमकारणं महामायारूपः सूक्ष्मो नादः कलां(१२)व्याप्नोति। इन्धिकादि-पञ्चकलो-पेतः (१३) स्थूलो नादः काल-नियति-(१४) विद्या-राग-पुरुष-रूपाणि तत्त्वानि व्याप्नोति। निवृत्त्यादिकला-चतुष्टय-सहितो बिन्दुश्चतुर्ग्रन्थिरूप-(१५) प्रधान-गुण-बुद्ध्यहङ्कारतत्त्वानि-(१६) व्याप्नोति। एतदन्तर्गतमहङ्कारतत्त्वं मनसा सह ज्ञानेन्द्रिय-कर्मेन्द्रियात्मकं करण-दशकं व्याप्नोति। तद्बिन्द्वन्तर्गतं बुद्धितत्त्वं धर्माधर्मादिभावांस्तदुपादानानि प्रत्ययांश्च व्याप्नोति। सदाशिवनाथः पृथिव्यादि-तन्मात्रपञ्चकाधिष्ठातृ-(१७)सद्योजातादि-(१८)पञ्च-मन्त्रतनुर्भूत्वा तन्मात्रपञ्चकं व्याप्नोति। मन्त्रेशास्तु सूक्ष्म(१९)देहारम्भक-भूतविशेषान् व्याप्नुवन्ति (२०)। मन्त्रास्तु स्थूलपृथिव्यादीनि व्याप्नुवन्ति। तथाच विद्याविद्येश्वरो-भयात्मको विद्यास्कन्ध एकः। सदाशिवस्कन्धो द्वितीयः। बिन्दुस्कन्धस्तृतीयः(२१)। नादस्कन्धश्चतुर्थः। कारणस्कन्धः पञ्चम इति पञ्चस्कन्धः(२२) शुद्धाद्धा इति मन्तव्य-मिति। तथा मृगेन्द्रे ( १३।१९६-१९७-१९८-१९५ )—

नादः(२३)सूक्ष्मः कला(२४)काल-रागयुग्मे सपूरुषे(२५)।<br>
स्थूलः(२६)पञ्चकलो नादः पञ्चतत्त्वाश्रयो मुने !॥<br>
प्रधानादि-चतुर्ग्रन्थि-निधिर्बिन्दु(२७)श्चतुष्कलः(२८)।<br>
गर्वे मनोमुखा देवा(२९) बुद्धौ भावादयः स्थिताः॥

Or (१) र्मातिश० (२) प्रधानत्वस्य (३) तत्वनाम० (४) श्रीकर्ण० (५) तेभ्यः धि० (६) बुद्धिशब्दाच्च (७) शब्दादह० (८) शब्दोद्विष्ठा० (९) न्येकर्त्रिंश० (१०) लिखितः (११) स्कन्धशु० (१२) कलाव्या० (१३) दीपयी लोपत स्थू० (१४) कालनयतिविद्याराग: (१५) ग्रन्थिरू० (१६) धानरूप बुद्ध्याहंकारत्वानि (१७) धिष्ठावस (१८) जातातिपं० (१९) सूक्ष्मे दे० (२०) प्राप्नु० (२१) स्कन्धत्ट० (२२) पञ्चमस्क० (२३) नादसू० (२४) कलां (२५) सपुरुषे (२६) स्थलापञ्च (२७) नीधिविन्दु० (२८) ष्कला: (२९) मुखा बुद्धौ

पञ्चमन्त्रतनुर्देवः (१) स्थितस्तन्मात्रपञ्चके ।
सूक्ष्मभूतेषु मन्त्रेशा मन्त्राः स्थूलेषु संस्थिताः ॥
विद्या पञ्चाणुदेहश्च बिन्दुर्नादोऽथ(२)कारणम् ।
पञ्चस्कन्धः परो मार्गः ॥  इति

अस्य च प्रेरककाण्डत्वेन भोग्य(क)भोजक-काण्डयोर्व्याप्तिर्युज्यते । अचिन्त्ये—

चतुर्विंशतिसंख्यातमशुद्धं (३) भोग्यकाण्डकम् ।
ततो हि मिश्रतत्त्वं (४) च भोक्तृकाण्डं तु सप्तकम् ॥
प्रेरकं शुद्धतत्त्वं च स्वतन्त्रं तच्छिवस्य तु ।

प्रेरककाण्डं शुद्धम्; नादादिपञ्चतत्त्वेन वैखर्यादिप्रेरकत्वाच्च तद्भुवनवासिनां सर्वज्ञत्व-सर्वकर्तृत्वोद्गलनहेतुत्वाच्चिद्रूपतया चिद्रूपकारितया च(ख)। अत्र प्रेरितप्रकारः सूक्ष्मा वृत्तिर्नादः, पश्यन्ती वृत्तिर्बिन्दुः, मध्यमा वृत्तिरक्षरं, वैखरी(५) वृत्तिर्मातृका(६) इत्युच्यते । सा च वैखरी द्विधा—स्वश्रोत्रग्राह्या, परश्रोत्रग्राह्या चेति । एता वृत्तयः(७) क्रमेण शिवादिपञ्चतत्त्वसम्बन्धिन्यः । आसां स्थानानि क्रमेण वस्ति-नाभि-हृद्-ग्रीवास्यानि पञ्च । तदुक्तं सिद्धान्तरहस्यसारे—

विद्यादि-पञ्चतत्त्वानां वागिन्द्रियसहायता ।
वैखर्यादिविभेदश्च(८) भोगकाले(९) नृणां भवेत् ॥
नादः (१०)सूक्ष्मो भवेद् बिन्दुः पश्यन्ती मध्यमाऽक्षरम् ।
मातृका(११)वैखरी ज्ञेया नादाद्यास्तु(१२) शिवादयः ॥
कण्ठोष्ठ्यमीश्वरीतत्त्वे विद्यायां वैखरी स्थिता ।
सूक्ष्मादयो वस्ति-नाभि-हृद्-ग्रीवास्येषु संस्थिताः ॥
वैखर्यन्यश्रोत्रगता कण्ठोष्ठ्यं स्वश्रुतिं गता ।
सविकल्पा मध्यमा स्यात् पश्यन्ती निर्विकल्पयुक् ॥
आसां सूक्ष्मा कारणं स्याद् ब्रह्मघोषं तदुच्यते ।

भोक्तृकाण्डं (१३) शुद्धाशुद्धम् । तद्वासिनां पुं(१४)मलावृतानां किञ्चिज्ज्ञत्वाद्युपोद्वलन-(१५) हेतुत्वात् शुद्धम् । चिद्रूपकारितया अशुद्धं भोग्यकाण्डकम् ।

ततो हि मिश्रतत्त्वं च भोक्तृकाण्डं तु सप्तकम् ।
प्रेरकं शुद्धतत्त्वं च स्वतन्त्रं तु शिवस्य तु ॥

---

Or (१) देवस्थित० (२) नादो ध (क)भोज्यभोजग० (३) तिरात्मानं शुद्धं भोज्य० (४) ततो हि मिश्रमतत्त्वं च भोग० (५) वैखरि (ख)रितयाच्च (६) मातका (७) हत्तय क्र (८) विभदेश्च (९) भोगाकाले (१०) नादसूक्ष्मो (११) मावका (१२) नाद्यदाद्याःसुशि० (१३) भोक्तकाण्डं (१४) पुङ्स्त्वम० (१५) द्यपोद्दलनं है०

तथा—भोक्ता भोग्यं भोजयिता मन्तव्यं त्रिविधं त्विदम्। इति।

अत्र प्रेरककाण्डं शुद्धम्; (१)नादादिपञ्चकेन वैखर्यादिप्रेरकत्वाच्च, तद्भुवनवासिनां सर्वज्ञत्वात् सर्वकर्तृत्वाद् दुःखादि-रहितत्वाच्च। भोक्तृकाण्डं शुद्धाशुद्धम्; तद्वासिनां किञ्चित्-सर्वज्ञत्वेन शुद्धत्वं, दुःखादि-योगेनाऽशुद्धत्वं च। भोग्यकाण्डमशुद्धम्(२)। तद्वासिनां सदा किञ्चिज्ज्ञत्वाद् दुःखादि-युक्तत्वाच्च। तद् यथा—

अशुद्धं (३) तु चतुर्विंशच्छुद्धाशुद्धं च सप्तधा।
नित्यशुद्धं च पञ्चैते षट्त्रिंशत् तत्त्वरूपकम् (४)॥ इति॥ २९॥

एवं माया-पाश-(५)लक्षणानन्तरं कर्मरूपं पञ्चमं पाशं विश्वसारोत्तर-सूत्रेण निरूपयति—

धर्माधर्मात्मकं कर्म तच्च त्रिविधमर्थतः।
जात्यायुर्भोगदं येन नामिश्रं पच्यते क्वचित्॥ ३०॥

कर्म धर्माधर्मात्मकं धर्मश्चाधर्मश्च धर्माधर्मौ, तौ आत्मा स्वरूपं यस्य तद् धर्माधर्मात्मकम्। तच्च कर्म अर्थतः फलतः त्रिविधं त्रिप्रकारम्। तदेवाह—जात्यायुर्भोगदमिति। जाति(६)र्देवत्वादिः। आयुः शतवर्षेष्वपि जीवनादि(७)। भोगः सुखदुःखानुभवः। तानि(८) ददातीति जात्यायुर्भोगदम्। येन हेतुना ततो हेतोः जातिप्रदमायुःप्रदं भोगप्रदमिति त्रिविधं फलद(९)मित्यर्थः। तथा योगपातञ्जल(१०)सूत्र—

"सति मूले तद्-विपाको(११) जात्यायुर्भोगा" इति। एते जात्यादयोऽप्युत्तमादि-क्रमेण त्रिविधा भवन्ति। तथा श्रीमतङ्गे ( धर्माधर्मनिर्णयपटले ६—८ )—

जातिभेदाद् रूपभेदाच्छौर्य(१२)विज्ञानभेदतः।
सौभाग्यभेदत(१३)श्चापि दौर्भाग्येन च लक्ष्यते॥
एवं मध्योत्तमाद्(१४)भोगात् कनिष्ठाच्चैव(१५) भेदतः।
न्यूनं न्यूनतमानि(१६) स्युः श्रेष्ठं श्रेष्ठतमानि च॥
पशूनामुपसर्पन्ति विभागांस्तेष्वथोच्यते॥ इति।

तच्च त्रिविधमपि कर्म अमिश्रं परस्परसम्बन्ध-रहितं(१७) क्वचिदपि स्थले न पच्यते(१८) न पक्वं क्रियते। फलदानं(१९) पाक-शब्दार्थः। जात्यायुर्भोग-प्रदत्वेन तद्देशवर्त्तिना-

---

Or (१) शुद्धं अत्र प्रेरकं ना० (२) काण्डं शुद्धं (३) अशुद्धं चतु० (४) तत्त्वरूपमि० (५) इदं माया पाशल० (६) जातिर्देव० (७) शतवर्षं पि जीविना० (८) तां ददा० (९) फलदस्त्रि० (१०) गपादंज० (११) विपाकात् (१२) च्छौण्डवि० (१३) भाग्यभेदितश्चा० (१४) मध्यमोत्तमाद्द (१५) कन्यसाच्चैव (१६) न्यूनन्युनतमानि (१७) रहितः (१८) पश्यते (१९) फलदा पाक०

मपि विचित्राणां विनश्वराणां प्रत्यात्मनियतानां भवान्तरभाविनां च तत्तज्जातिदेहेन्द्रियार्थानां च कारणतया दृक्-गुण-कर्मसिद्धिरुक्ता ; कारणासंभविनां गुणानां कार्येष्वनुपलब्धेः । यथा मृगेन्द्रे ( ८।२ )—

तस्य प्रदेशवर्त्तित्वाद् वैचित्र्यात(१) क्षणिकत्वतः ।
प्रतिपुंनियतत्वाच्च सन्ततत्वाच्च तद्गुणम् ॥ इति ।

जातिवैचित्र्यं (२) तावत् प्रसिद्धम् । इन्द्रियवैचित्र्यम्—यथा परावृत्त-जिह्वावत्त्वं गजादीनाम्(३), चक्षुःश्रवत्वं भुजङ्गानाम्, अनालोकालोकित्वमुलूकानाम् । पुरुषाणां च केषाञ्चित् विपुलदृशामपि अदर्शनम्, अन्धप्रायाणामपि सूक्ष्मार्थदर्शित्वमिति । विषयवैचित्र्यं तु यथा—जलधरनिपतित-(४) जलकणोपजीवित्वं चातकानां मयूराणां च । अवकराहारत्वं(५) कुक्कुटादीनाम् । अवकरः(६) संकरः, "संकरोऽवकर(७)स्तथा" इत्यमरः । कमलकिञ्जल(८)रसास्वादनं मधुकर-सारसानामित्याद्यूहनीयम् ॥ ३० ॥

अथ मृगेन्द्रसूत्रेण (८।३-४) सार्धश्लोकद्वयेन कर्मणोऽपि विशेषानाह—

## कर्म व्यापारजन्यत्वा(९)ददृष्टं सूक्ष्मभावतः ।
## जनकं धारकं भोग्यमध्यात्मादि-त्रिसाधनम् ॥ ३१ ॥

व्यापार-जन्यत्वात्(१०) व्यापारेण यत् जन्यं तत् व्यापारजन्यं तस्य भावः तत्त्वं, तस्माद्धेतोः, कर्म क्रियत इति कर्म सूक्ष्मभावतः सूक्ष्मस्य भावः तस्मात् सौक्ष्म्याददृष्टं(११) दृष्टं न भवतीत्यदृष्टम्, अतीन्द्रियमित्यर्थः । तथा मतङ्गे ( विद्यातत्त्वपटले ६१।६२ )—

लोकेऽपि सुप्रतीतं स्याद् द्विविधं कर्म कर्मिणाम् ।
क्रियावसानिकं दृष्टमदृष्टं तत्र संक्षये ॥ इति ।

जनकं निमित्ततया देहेन्द्रियभुवनादेः(१२), यतः कर्मफलोपभोगायैव तत्तत्-तनुकरणादियोगोत्पादः । धारकं (१३) च तस्यैव प्रतिनियतकालस्य दातृत्वेन(१४) । भोग्यं च तत्फलद्वारेण । किंच—अध्यात्मादि-त्रिसाधनम् । अध्यात्मादीनि(१५) त्रीणि साधनानि यस्य तत् तथा । तत्राऽध्यात्मशब्देनाऽन्तःकरण-सन्निकर्षेण आत्मानमधिकृत्य यद् वर्त्तते तन्मतिरित्युच्यते । आदिग्रहणात् वाक्-कायक्रिये(१६)च गृह्येते । एवं च मनो वाक् काय-

Or (१) वैचित्त्यात् (२) जातिवैचित्र्यं यथा परा० (३) परावृत्तिं जिह्वात्वं गजातीनां (४) यथा जलकणी० (५) अवकारहा० (६) अवकरस० (७) संकरीपक० (८) किञ्जलकर० (९) व्यापारजन्म० (१०) व्यापारजन्म० (११) ःम्याद दृष्टं (१२) नादे यतः (१३) गोत्पातः धारकत्वं च (१४) कालमात्रकत्वेन भोग्यं च (१५) अध्यात्मा वौषि० (१६) वाक्कायजा

क्रिया च साधनं यस्य तद् यथाक्रमम् इष्टदेवतानुध्यान-नमस्कार-स्तोत्रपाठ-(१)यजनादिरूपं धर्मात्मकं कर्म। परस्वहरणेच्छा-तत्प्रवाद-तदुपघातादयो यथासंख्यं(२) मनो वाक् काय-क्रिया साधनं यस्य तत् अधर्मात्मकं कर्म। यथाऽचिन्त्ये—

जायते पुण्यपापौ तौ मनोवाक्-कायकर्मभिः।
तन्मनः-कर्म चेत्याहुः पुंसश्चित्ता(३)पराधतः ( ? )॥
सत्यज्ञानोपदेशश्च प्रियमप्रियमन्यतः।
अनित्यमज्ञानरतमेतद् वाक्कर्म(४)चोच्यते।
दानाहिंसापरश्चैव हिंसाचर्या-सुरावशः(५)॥
विषये सक्ति-रत्यादि (६) कायिकं(७) समुदाहृतम्। इति।

यद्वा—अध्यात्म-भूत-दैवानि त्रीणि हेतुतया अधिकृत्य अध्यात्ममधिभूतमधिदैवतं च यत् सुख-दुःखमुत्पद्यते तस्य त्रिविधस्यापि साधनम् (८)। कर्मवशाद्धि चेतः-प्रसादाद्युद्वेगादि(९)वा आध्यात्मिकं सुख-दुःखमुत्पद्यत(१०) इति। आधिभौतिकं च अङ्गना-सम्भोग(११)गज-सिंहाद्यभिभवरूपम्(१२)। आधिदैविकं च अभिमतानभिमत-वर्षातपादिकृतम्। तथा सुप्रभेदे—

अध्यात्ममधिभूतं च आधिदैविकमेव च।
त्रिविधं दुःखमाप्नोति तेषामाध्यात्मिकं शृणु॥
अध्यात्मिकं द्विधा प्रोक्तं शारीरं मानसं तथा।
गुल्मोऽर्शम(१३)तिसारं च ज्वरशूलाद्यनेकधा॥
नर-मृग-पिशाचैश्च (१४) गो-यक्ष-चोर-राक्षसैः।
प्रोक्तं शरीरजं दुःखं मानसं शृणु सुव्रत !॥
शोकासूयावमानेर्ष्या-मात्सर्यादिभिरेव च।
एवं मानसमाख्यातमाधिभौतिकमुच्यते॥
शीतोष्णवातवर्षैश्च विद्युदशनिमारुतैः (१५)।
एतैर्भूतैस्तु यद् दुःखमाधिदैविकमुच्यते॥
गर्भजन्मजराऽज्ञानमृत्युनरकजं तथा।
प्रोक्तं दुःख-त्रयं (१६) ह्येवमेषु स्थानेषु भुज्यते॥ इति॥ ३१॥

---

Or (१) स्तोत्रपाये ज० (२) यथासुख्यं (३) पूनश्चेष्टा परा० (४) कर्मणोच्यते (५) साचार्या सुरावधः (६) शक्तिरित्यादि० (७) कायकं (८) साधन कर्म (९) द्युद्वेकादि व (१०) सुत्पद्यतेति (११) जजगसिंहा० (१२) रूपं॥ इति दै० (१३) गुल्मान्वर्शी (१४) पिशाचै गोजक्षिचोर० (१५) विद्युताश० (१६) दुःखं त्रयं

तत् सत्यानृतयोनित्वाद् धर्माधर्मस्वरूपकम् ।
स्वापे विपाकमभ्येति तत् सृष्टावुपयुज्यते ॥ ३२ ॥
मायायां वर्तते चान्ते नाभुक्तं क्षयमेति च ॥ ३३ ॥

तत् कर्म सत्यानृत-योनित्वात् सत्यं च अनृतं च सत्यानृते, ते योनिः प्रकृतिर्ययोस्तयो (१) र्भावस्तत्त्वं तस्माद् धर्माधर्मस्वरूपकम् । सत्य-(२) प्रकृति कर्म धर्मरूपम्, असत्य-प्रकृति कर्म(३)अधर्मरूपमित्यर्थः । तादृशं (४) कर्म स्वापे सर्वभूत-संहारकाले विपाकं परिणतिम् (५) अभितः समन्तात् एति (६) प्राप्नोति । तत् (७) तादृशं कर्म तद्विपाका(८)-नुगुणं पक्वं कर्म सृष्टौ सृष्टिकाले उपयुज्यते उपयोगमेति । सृष्टिसमनन्तरमेवाऽस्य यथायोग्यं कलादि-(९)क्षित्यन्तं भोगः प्रवर्त्तत इत्यर्थः । (१०) तदुक्तमत्रैव—

इति मायादि(११)कालान्त-प्रवर्त्तकमनादि(१२)मद् । ( मृ० ८।६ )

अन्ते (१३) संहारकाले च मायायां मायातत्त्वे वर्त्तते । देहजन्मजनकं ( ? १४ )मनोवाक्कायरूपेण स्थूलकर्मेत्युच्यते । अनेन कर्म-त्रैविध्यमुक्तम् । तथा सिद्धान्तसारावल्यां—

वाग्(१५)धीकायात्मसाध्यं फलजननकरं कर्म धर्मादिभोग्यम् ।
स्वापे चायाति पाकं (१६) स्थितिमति-सहितं भोगदं स्यात् कलान्तम् । इति ॥

शिवधर्मे—अधर्मभेदा विज्ञेया(१७)श्चित्तवृत्ति-प्रभेदतः ।
स्थूलाः सूक्ष्माः सुसूक्ष्माश्च (१८) कोटिभेदैरनेकधा ॥ इति ।

अभुक्तं भुक्तं न भवतीत्यभुक्तं कर्म क्षयं विनाशं नैति (१९) । पौष्करेऽप्येवमुक्तम्—

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि । इति ।

चकाराद् दीक्षाज्ञानादौ नाशकेऽसति (२०) ।

प्रायश्चित्तेऽथवा भोगे युगपद् वा क्रमेण वा ।
विनश्वरं च विज्ञेयम् ॥ इति ।

एवं क्रमेणोक्तानि मल-तिरोधानशक्ति-महामाया-माया-कर्माणि (२१) पञ्चापि पुरुष-बन्धकतया(२२) अस्मिन् शास्त्रे पाशपञ्चकत्वेन प्रसिद्धानि । यथा श्रूयते—

मलः कर्म महामाया-(२३)मायोत्थमखिलं जगत् ।
तिरोधानकरी (२४) शक्तिः पाशत्वेनाऽर्थपञ्चकम् ॥ इति ॥ ३२-३३ ॥

---

Or (१) ययोर्भा० (२) रूपकं अस्मात् प्र० (३) प्रकृतिकं धर्मं (४) तादृशक० (५) परिणति अभीतः (६) ए प्राप्नो० (७) ति तादृशं (८) तद्विशेषपा० (९) कलादौ (१०) न्तं तदुक्तं (११) याति कालं तं (१२) कमनातिम० (१३) नादिमद्भोग···इत्यर्थः । संहार (१४) देवजस्वजनके (१५) वाग्धि० (१६) मायात्यपाकं (१७) ज्ञेया चि० (१८) स्थूला सूक्ष्मा सूक्ष्मा सुसूक्ष्मा च (१९) विनाश नैति (२०) नादौ नाशके सति (२१) कर्मणि (२२) षसंधकत० (२३) महामाइामा (२४) करिश०

इत्थं चतुर्दशश्लोकैः पाशानां स्वरूपमुक्त्वा तदधीनं पशोरवस्थात्रय-(१)स्वरूपं स्वायम्भुव-सूत्रेण दर्शयति—

अथात्माऽ(२)विमलो बद्धः पुनर्मुक्तश्च दीक्षया ।
विज्ञेयः स त्रिधावस्थः केवलः सकलोऽमलः ॥ ३४ ॥

अत्रात्मशब्देन अत सातत्यगमने इति धातुनिष्पन्नेन जीवात्मा उच्यते । स आत्मा केवल इति सकल इति विमल इति च त्र्यवस्थः अवस्थात्रय-युक्तः । अविमलः विमलो न भवतीत्यर्थः, अत्यन्त-मलिन इत्यर्थः । अयं तु केवलावस्थः । बद्धः कर्मानुरक्तः कलादि-बन्धेन बद्धः । अयं तु सकलावस्थः । पुनश्च दीक्षया दीक्षाख्येन साधनेन मुक्तः कलादि-बन्धान्मुक्तः(३) । अयं च अमलः शुद्धावस्थ इति विज्ञेयः बोद्धव्यः । तथा सुप्रभेदे—

त्र्यवस्थः पुरुषः प्रोक्तः (४) शुद्धः सकलः (५) केवलः ।
शुद्धावस्थानमात्मानं शिवरूपमिति स्मृतम् ॥ इति ॥ ३४ ॥

पूर्वत्र 'केवलः सकलोऽमल' इत्युक्तम् (६) । तत्र केवलस्य प्रथममुद्दिष्टत्वात् तदनुसारेण प्रथमं केवलस्य स्वरूपं सूत्रान्तरेण दर्शयति—

अचेतनो विभुर्नित्यो गुणहीनोऽक्रियोऽ(७)प्रभुः ।
व्याघातभागशक्तश्च शोध्यो बोध्योऽ(८)कलः पशुः ॥ ३५ ॥

अत्र अचेतनः चेतनारहितः, अचेतनत्वं केवलस्य प्रकृति-(९) चैतन्यं ज्ञानक्रियारूप-मात्मनो नास्तीति (१०) । अत्र तु ज्ञानमात्रं विवक्षितम्, उत्तरत्र क्रियानिषेधात् । तच्चैतन्यं मलेन सन्निरुद्धत्वात् परार्थेषु न प्रवर्त्तत इत्यचेतन इत्यर्थः । न पुनरयं लोष्टवद् अचेतनः, भोगावस्थायां तस्य चैतन्याभिव्यक्तिश्रुतेः, सत एवाऽभिव्यक्तेरसतोऽभिव्यक्त्यसम्भवात् । चैतन्यमत्र भोग्यार्था-( ?—११) वभासात्मकमेवाऽभिव्यज्यते ; नतु स्वभावात्मकमपि, तस्य मलोपरोधासंभवात् । नित्यव्यापक-स्वयंज्योतिः-(१२) स्वरूपत्वात् । एतच्च प्रपञ्चितं तत्त्वसंग्रहबृहट्टीकायाम् ।

यद्येवं विषय-प्रकाशात् पूर्वमपि कस्मान्न प्रकाशते (१३) ? क एवमाह ? किन्तु परप्रकाश-स्वभावात्मकत्वात् असति परप्रकाशे सुषुप्त्यवस्थायामिवाऽकिञ्चित्करस्वरूपमात्र-निष्ठत्वेन व्यवहर्त्तुमशक्यमसत्कल्पमेव । सर्वज्ञत्वाद्यभिव्यक्तौ (१४) तु संप्राप्त-चित्क्रिया-

Or (१) रूपकं (२) थात्मवि० (३) बन्धा मुक्ताः (४) प्रोक्त शु० (५) सकलके० (६) इति । तव (७) क्रियी प्र० (८) बोध्यी कलः (९) प्रकृतिः चै० (१०) त्मनी नत्वं (११) भाह्यार्थावभाव्यात्मक० (१२) ज्योतिस्व० (१३) प्रकाश्यते (१४) सर्वज्ञत्वादभिव्यक्तौ०

प्रसरं सर्वार्थ-द्योतनात् (१) प्रकाशत एव। यद्येवं स्वप्रकाशात्मनस्तत्स्वरूपस्याऽनावरणात् किमस्य प्रतिबद्धमर्थविषयं ज्ञानं, बहलान्धकार-नेत्रस्यैव पुंस इति चेत्? सत्यम्। तदप्यर्थस्य ज्ञानं तस्य स्वरूपमेव (२) ; तस्य चावृतत्वान्न दोष इति।

विभु(३)र्व्यापकः। यत्र यत्र व्यञ्जकं कार्य-करणादि, तत्र तत्राऽस्य चैतन्याभिव्यक्तेः व्यापकत्वम्। नित्यः उत्पत्ति-(४)रहितः। अवस्थाविशिष्टस्याऽनित्यत्वेऽपि स्वकारणोत्पन्नत्व-रूपस्याऽनित्यत्वस्याऽभावादस्य नित्यत्वम्। गुणहीनः भोगसिद्धर्थमस्याङ्गानि(५)गुणाः कलादयः, तैर्हीनो गुणहीनः। अक्रियः क्रियारहितः। करण-व्यापारः क्रिया, नेयमात्मनः सम्भवति। तस्या अना(तदा)त्मकत्वेन(६) जड़वस्तुधर्मत्वात्, अतस्तत्-क्रियायां शक्तत्वं कर्त्तृत्वमस्य निरुद्ध-(७)क्रियाशक्तित्वात् (८) नास्तीत्यक्रियः। अप्रभुः प्रभुत्वं सकलकारकवशित्वमैश्वर्यम्, तदस्य मलनिरुद्धत्वान्नास्तीत्यप्रभुः। नचाऽक्रियत्वेनाऽस्य पौनरुक्त्यम्; तत्र (क) स्वतन्त्रकर्त्तृत्वस्य निषेधः, अत्र (ख) हेतुकर्त्तृत्वस्य निषेध इति भेद-सम्भवात्। व्याघातभाक् शिवशक्ति-तिरस्कारो व्याघातः तिरोभावः, तं भजत इति व्याघातभाक्। अशक्तः स्वयं मलनिरुद्धत्वात् (९) इन्द्रियमर्थेषु प्रवर्त्तयितुं न शक्नोतीत्यशक्तः। शोध्यः एतस्यामप्यवस्थायां शिवेन मलतः शोध्यः। बोध्यः मलेन मुकुलीकृत-शक्तिजालः सन् विकसित-शक्तिजालः कार्यः। क एवं व्याख्यायत इत्यत्राह—अकलः। कलादिना (१०) ऽपरिभूतत्वादकलः। पशुः पशुत्वयोगात् पाशवत्त्वाच्च पशुः।

ननु व्याघातभाक्त्व-(११)शोध्यत्वादयो विरुद्धाः कथमेकस्मिन्नात्मनि संभवतीति चेत्। न। भावित्वात् शोध्यत्वादीना(१२)मप्यविरोधात्। अत्र विभुत्वादिकं केवलावस्था-वर्णने न विवक्षितम्, विभुत्व-नित्यत्वयो(१३) र्मुक्तस्यापि सम्भवात्। शोध्यत्व-बोध्यत्वयोः सकलावस्थ(१४)स्यापि सम्भवाच्च। तस्मादत्र विशेषणतया विभुत्वादिकमुक्तम्। सुप्रभेदे च—केवलावस्थास्वरूपमे(ग)वमुक्तम्। तद् यथा—

अमूर्त्तः स पशुर्नित्यो निर्गुणो निष्क्रियोऽप्रभुः (१५)।
मायोदरगतो व्यापी (१६) भोगोपायेष्वशक्तितः॥
स केवलस्त्विति प्रोक्तः स्वापवान् (१७) मलबन्धनात्॥ ३५॥

मलाधीनमिदम् अवस्थान्तरम् आत्मनो वाच्यम्, तच्च न सम्भवति। मलस्य शशविषाणप्रायत्वादित्याशङ्क्य सूत्रान्तरात् साधयति—

---

Or (१) द्योतयात् (२) स्वरूपत्वमि० (३) विभुर्व्या० (४) पत्तिः रहि० (५) र्थं स्यांगानि (६) तस्यात्मदात्मकत्वेन (७) विरुद्ध (८) क्तित्वाना० (क) तस्य (ख) अस्य (९) स्वयं मलं विदार्या यं इ० (१०) कलादिना परि० (११) भाक्त्वाच्छोध्यत्वा (१२) भावित्वादोषमप्यवि० (१३) विभुत्वन्नित्यत्व० (१४) लावस्थास्यापि (ग) कैवलावस्थास्वरूपेण एव (१५) यो प्रभुः (१६) व्यापि (१७) क्त स्वापवान् मल

यद्यशुद्धिर्न पुंसोऽस्ति सक्तिर्भोगेषु किं-कृता ।
शुद्धे पुंसि न तद्भोगो (१) जाघटीति विपश्चितः ॥ ३६ ॥

पुंसः पुरुषस्य अशुद्धिः मलः यदि नास्ति तदा अशुद्ध्या विना शुद्धस्य पुंसोऽपि विषयेषु अनित्याशुचि-दुःख(२)स्वभावकेषु भोगेषु या सक्तिः सा किं-कृता केन कारणेन कृता ? नहि शुद्धस्य निरञ्जनस्याऽशुद्धेषु(३) सक्तिर्भवति । अशुद्धिवादिनापि रागाभ्युप(४)-गमात् रागेणैव सक्तिरस्तु किमशुद्ध्येति चेत् ? सत्यम् । रागस्याऽशुद्धि-सहितस्यैव सुख-दुःखादि-भोगासक्ति-कार्यजनकत्वात् (५), सामग्र्या एव कार्यजनकत्वात् । रागमात्रस्य (६) सामग्रीत्वाभावात् । तर्हि भोगाभ्यास एव (७) सक्तिहेतुरस्तु, किमशुद्ध्येति । तदुक्तम्—

न जातु कामः कामानामुप(८)भोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाऽभिवर्द्धते ॥ इति । ( मनुसंहिता २।९४ )

अत आह—शुद्धे पुंसीति । पुंसि पुरुषे शुद्धे सति तद्भोग एव(९) न संजाघटीति युक्त्या न युज्यते, किमु तदभ्यासः । कस्माच्च सक्तिरिति । विपश्चितः विद्वांस इति ऋषीणां सम्बोधनमेतत् । अयं भावः—भोगो (१०) हि संज्ञानरूपा (११) चिच्छक्तिव्यक्ति-रिन्द्रियजन्या च (?-१२) शुद्धगोचरोपरक्तत्वात् अशुद्धाया अस्याः (?-१३) शुद्धत्वाभिव्यक्तेः (?-१४) शुद्धेनैव सम्बन्धो वक्तव्यः । नहि शुद्धस्य निरञ्जनस्य शक्तिव्यक्तिरशुद्धा दृष्टा, शिवेनैकान्तिकत्वात् । तस्माद् भोगासक्ति-कारणतया अशुद्धभोगघटकतया चानाद्यशुद्धे-रावश्यकत्वात् तदधीनमवस्थानिरूपणमात्मनो(१५)नानुपपन्नमिति ॥ ३६ ॥

ननु आत्मनश्चैतन्यमेव नास्ति, यन्निरोधादस्य अवस्थाभेदसिद्धिरित्याशङ्क्य तच्चैतन्य-मात्मन्यस्तीति मृगेन्द्रसूत्रद्वयेन ( २।५ ) साधयति—

चैतन्यं दृक्क्रियारूपं तदस्त्यात्मनि सर्वदा ।
सर्वतश्च यतो मुक्तौ(१६)श्रूयते सर्वतोमुखम् ॥ ३७ ॥
सदप्यभासमानत्वात् तन्निरुद्धं प्रतीयते ।
वश्योऽनावृतवीर्यस्य स्रोत एवा(१७)ऽविमोक्षणात् ॥ ३८ ॥

Or (१) भोगो जाघटिति (२) दुःखास्व० (३) स्याऽशुध्येषु (४) रागादभुग्प० (५) जननत्वात् (६) गमन्तस्य (७) एवं (८) कामकामानानुपभो० (९) एवे न (१०) भोगो हि (११) रूपाचि० (१२) त्तौन्द्रिया च (१३) अशुद्धा अस्या (१४) शुद्धायातिव्यक्तो शु० (१५) नोरनुप० (१६) मुक्तो (१७) एव वि०

विना सम्भवतीत्याह विद्या-दर्शित-गोचरः ।
रागेण रञ्जितस्याऽपि बुद्ध्यादिकरणैर्युतः * ॥ ३९ ॥

विद्यया दर्शितः फलभूतो गोचरो यस्य स विद्यादर्शित-गोचरः, परम्परा-गोचर इति यावत् (१)। अत्र साक्षाद्व्यवधानात् पुरुषस्य शब्दाद्यनुरञ्जिताः (२) सुख-दुःख-मोहरूपा फलभूताः साक्षाद्-गोचराः (३), पारम्पर्येण गोचराः (४) शब्दादयः। अनेनात्मनो विषयावभासकत्वांशे (५) विद्याया उपकारो दर्शितः (६)। मृगेन्द्रे (१०।१०)—

तेन प्रकाशरूपेण ज्ञानशक्ति-(७) प्ररोचिना ।
सर्वकारक-(८)निष्पाद्यमवैति (९) विषयं परम् ॥ इति ।

ननु एवमुपलब्ध-गोचरोऽपि न रागं विना तदुपादानाय प्रवर्त्तत इति। अत आह—रागेण रञ्जितस्याऽपीति। रागेण रागतत्त्वेन रञ्जितः, दुःखमोहात्मकमपि (क) भोग्यं सुखत्वेन प्रपद्यत इत्यर्थः। सक्ति-जनकत्वं च रागतत्त्वस्यैव संभवति। वीतरागस्याऽतिमलीमसे विषये भोगानुपपत्तेः (१०)। तदुक्तं तत्त्वसंग्रहे (१०)—

यज्जनिताभिष्वङ्गे (११) भोग्याय नरिक्रिया स रागोऽत्र (१२)। इति ।

अनेनात्मन सक्तिमत्त्वांशे रागतत्त्वस्योपकारो दर्शितः। एवमनेन तत्त्वत्रयेण जनित-प्रवृत्तिः पुमान् पुनर्बुद्ध्यादिभिः करणैर्भोग्यं निष्पादयतीत्याह—बुद्ध्यादि-करणैर्युत इति। बुद्ध्यादिभिः करणैर्युतः सहितश्च। भवतीति शेषः। अयमर्थः—प्रधानस्य गुणानां चाऽऽपूरकत्वेन बुद्ध्याद्युपकारकत्वम्। तन्मात्राणां भूतानां चाधिष्ठानत्वेन (१३) काल-नियत्योश्च प्रवृत्तिं (१४) प्रति प्रयोजकत्वम्। कालो हि प्रवृत्तमेव पुरुषं त्र्युट्यादिभिः कलयति। नियतिरपि प्रवृत्तमेव (१५) पुरुषं यत्र कर्मफलं तत्र रागं जनयंस्त-(१६) न्नियमयतीति। तदुक्तं तत्त्वसंग्रहे (४)—

अविभुत्वात् करणानि(१७) तु कार्यमधिष्ठाय चेष्टन्ते । इति ॥ ३७-३९ ॥

एवमर्जित-(१८) भोग्यस्याऽऽत्मनो भोगस्थानं सूत्रान्तरेणाऽऽह—

मायाद्यवनि-पर्यन्ते तत्त्वभूतात्म-वर्त्मनि (१९) ।

---

* पूर्वोक्तमृगेन्द्र-सूत्रद्वयस्य व्याख्या मातृकायां नोपलभ्यते। अस्य च सूत्रस्य पादद्वयं नैव दृश्यते। परन्तु व्याख्या-दर्शनेनाऽनुमीयतेऽत्र पादद्वयं लिपिकर-प्रमादात् पतितमिति। अतोऽत्र चिह्नित-पादद्वयं सूत्रत्वेन निवेशितम्।

---

Or (१) इति अत्र (२) रञ्जितः (३) गोचरः (४) गोचरा श० (५) विषया विवहासकत्वांगिंशे वि० (६) दर्शिताः (७) ज्ञानशक्तिः (८) सर्वकारनि० (९) मवेवि० (क) हाद घटमपि भी० (१०) गानुपवर्त्तते (११) भिषङ्गी (१२) सरा गोत्र (१३) अधिष्ठानत्वे काल (१४) प्रवृत्तिं (१५) प्रवृत्तमेव (१६) रागां ज्ञे यतन्नियम० (१७) भुक्तात् करणानी (१८) मार्जितभो० (१९) वर्त्मनि

भुङ्क्ते तत्र स्थितान् भोगान् भोगैकरसिकः पुमान् ॥ ४० ॥

मायादिकं (१) च तत् अवनि-पर्यन्तं (२) च मायाद्यवनिपर्यन्तं तस्मिन्। वर्त्मनो (३) विशेषणमिदम्। माया आदि-(४) र्यस्येति अतद्गुणसंज्ञानो बहुव्रीहिः। तथाच कलादिकस्यैव ग्रहणम्। न तु मायायाः (५) ; तत्र भुवनाभावेन भोगासम्भवात्। तत्त्व-भूतात्म-वर्त्मनि (६) तत्त्वानां भूतानाम् आत्मनां च वर्त्म (७) तत्त्वभूत पञ्चकं (८) तस्मिन्।

अत्र तत्त्वशब्देन तत्त्वस्य भुवनानि लक्षणया उच्यन्ते। कलोच्चलित-(९) चैतन्य इत्यत्रैव तत्त्ववर्त्मनः (१०) प्रोक्तत्वाद् (११) भूतशब्देन स्थूलगुण-योगतो गौण्या वृत्त्याऽत्र कलादि-क्षित्यन्तानि (१२) भुवनजानि भोगसाधनानि भौवन-स्थूलशरीराण्युच्यन्ते। आत्मशब्देन आत्मनः साक्षादुपकारकत्वाद् गङ्गायां घोष इतिवद् (१३) अत्यन्तसन्निकर्ष-लक्षणया भावप्रत्यय-सन्तान उच्यते। भावा अष्टौ (१४) धर्मादयः। प्रत्ययास्तु चत्वारः (१५) सिद्ध्यादयः। भुवन-भौवन-देहभाव-प्रत्ययात्मके त्रिविधेऽपि वर्त्मनीत्यर्थः (१६)। भावप्रत्ययार्थ उक्तः—

भावयन्ति यतो लिङ्गं तेन भावाः (१७) प्रकीर्त्तिताः।
प्रत्याययन्ति क्षेत्रज्ञं तेन ते प्रत्ययाः (१८) स्मृताः॥ इति।

तत्र त्रिविधेऽपि वर्त्मनि (१९) स्थितः भोग्यभोक्तृत्वेन (२०) स्थितो भूत्वाप्यस्मिन् पुमान् पुरुषः भोगान् भुङ्क्ते प्राप्नोतीत्यर्थः। अत एवाऽयमीश्वरेण बलाद् भोगे नियुक्तः सन् अनिछन्नपि कदाचित् पशुभोगं भुङ्क्ते। तथा—

येन यत्र च भोक्तव्यं कृतं कर्म शुभाशुभम्।
स तत्र रज्ज्वा बद्ध्वैव बलाद् दैवेन (२१) नियते॥ इति।

अपि चास्य भोगेच्छाविरह एव नास्तीत्याह—भोगैकरसिक इति। भोगेष्वेकेषु रसस्तन्निष्ठोऽभिलाषो यस्य स तथा। मलिमसमपि भोगं भुञ्जानो न विरज्यति, नच तृप्यतीत्यर्थः। अनेन च रागस्य भोगकालेऽपि व्यापारोऽस्तीति (२२) सूचयति। विद्यायाश्च करणत्वाद् (२३) भोग-निष्पत्तौ व्यापारो लब्ध एव, कर्त्तुः करणं विना कर्मणि व्यापारा-योगात्। विद्या-व्यतिरिक्तस्य विषये व्यापारायोगादिति (२४)। एतत् त्रिविध-वर्त्मन्यपि (२५) भोक्तृत्वं मतङ्गे ( पुंप्रधानेश्वरसाधनपटले १०४ ) ऽप्युक्तम्—

---

Or (१) ते माया० (२) अवनिवपर्य० (३) वत्मनो (४) आदौर्यस्ये० (५) मायाया तव
(६) वत्मनि (७) वत्म (८) तत्त्वभूतपञ्चत० (९) कलोत्चलि० (१०) वत्मन: (११) प्रोक्तत्वा
(१२) चित्यन्ता० (१३) इति अत्यंत (१४) अष्टा (१५) चत्वार सि० (१६) वत्मनीत्यर्थः
(१७) भावा प्र० (१८) प्रत्यया स्म्र० (१९) वत्मनि (२०) भोगभोक्तत्वेन (२१) बलादैवेन नियतः
(२२) रो स्तिति (२३) करणात्वाभो० (२४) व्यापारयोगादि इति (२५) धवत्मन्यपि

तदुद्दलितवीर्येण (१)भुङ्क्ते प्रकृतिजान् गुणान् ॥ इति ।

तत्त्वसंग्रहेऽपि (२५)—पर्यटति (२)कर्मवशतो भुवनज-देहेष्वयं च सर्वेषु । इति ॥ ४० ॥

अथ को (क) भोगः कुतश्च वा भोग इति प्रश्नद्वयस्योत्तरं सूत्रान्तरेणाह—

**भोगोऽस्य वेदना पुंसः सुखदुःखादिलक्षणः(३) ।**
**तां समर्थितचैतन्यः पुमानभ्येति कर्मतः ॥ ४१ ॥**

अस्य पुंसः पुरुषस्य भोगः भोगो नाम वेदना संवित्ति-(४) रनुभवः । स च भोगः सुख-दुःखादि-लक्षणः । आदिशब्देन मोहो गृहीतः । सुखादयो लक्षणानि यस्य स सुख-दुःखादि-लक्षणः, सुखदुःखादिभिर्विषयैरुपरक्तत्वात् । सुख-(५)वेदना दुःख-(६)वेदना मोह-(७)वेदना चेति त्रिप्रकारो भोग इत्यर्थः । भोगस्वरूप-प्रश्नस्योत्तरमुक्त्वा निमित्त-प्रश्नस्योत्तरमाह—तामिति । तां त्रिप्रकारामपि (८) भोगरूपां वेदनां समर्थित-चैतन्यः कलाभिव्यक्त-चैतन्यः पुमान् आत्मा कर्मतः कर्मवशाद् अभ्येति प्राप्नोति, सुख-दुःख-मोहभावेन विपक्वं कर्मैव पुरुषवेदनाया आलम्बनं भवतीत्यर्थः ॥ ४१ ॥

शरीरादीनामपि भावाभावौ कर्म-निमित्तकौ, शरीरादि विना कर्मणो भोगसाधनत्वा-नुपपत्तेरेव तदाक्षेपकतया तत्र तस्य हेतुत्वौ(९) चित्यादिति सूत्रान्तरेणाह—

**कर्मतश्च शरीराणि विषयाः करणानि च ।**
**भोगसंसिद्धये भोक्तुर्भवन्ति न भवन्ति च (१०) ॥ ४२ ॥**

शरीराणि स्थूलरूपाणि, विषयाः शब्दादयः, करणानि बुद्ध्यादीनि—एतानि च सर्वाणि भोक्तुः भुञ्जानस्य पुरुषस्य भोगसंसिद्धये (११) भोगसाधनाय (१२) कर्मतः कर्मनिमित्तात् भवन्ति च उत्पद्यन्ते च तत्-कर्माभावे न भवन्ति च न जायन्ते च । अत्र चकारेण सर्वथा यत् किञ्चिद्-भोगस्य निमित्तं वस्तु तत् सर्वं कर्म इति सूचितम् । अत्रोदाहरणम्—सुखभोग-(१३) निमित्तम् अहिकण्टका(१४)द्यभावः । दुःखभोग-निमित्तं पुत्रान्नाद्यभावः । दुःख-मोह-भोग-(१५)निमित्तं स्रक्चन्दनाद्यभावः । दुःखभोग-(१६) निमित्तम् अहिकण्टकादिभावः । सुखभोगनिमित्तं पुत्राद्यन्नादि-(१७)भावः । सुखमोह-भोगनिमित्तं स्रक्चन्दनादिभाव इति । अत्र (१८)कर्मणां यथा शरीरादि-जनकत्वं तथा

Or (१) तदुद्दलितवीर्येणुं० (२) पर्य-श्रति (क) कुतो (३) लक्षण । तां (४) संवित्तिरनु (५) सुखोवे० (६) दुःखावे० (७) मूढावे० (८) माह तां प्रकारमपि० (९) हेतुत्वाचि० (१०) भोक्तुर्भवन्ति चेति शरीराणि (११) गसिद्धये (१२) साधनया (१३) भोगनि० (१४) हिकण्डका० (१५) भोगं नि० (१६) भोगन्नि० (१७) न्नादिभावः (१८) यत्र

शरीरादीनामपि कर्मजनकत्वात् (क) बीजाङ्कुरसन्तानस्येव कर्म-शरीर-सन्तानस्यापि प्रवाहानादित्वमवसेयम्। तदुक्तं सर्वज्ञानोत्तरे—

कर्मणा तु शरीराणि भावात् कर्मोदयो भवेत् (१)।
पूर्वोपार्जित-कर्मणां (२) भावः संयोगकारकः ॥ इति।

अन्यत्र—नित्यद्वन्द्व-समायुक्तमन्योन्यं वट-(३)बीजवत्। इति ॥ ४२ ॥

एवं बद्धात्मनः (ख)पशुदर्शनमात्रयुक्तां(४)शिवादिदर्शन-रहितां परमावस्थां सूत्रान्तरेणाह—

**एवं मायाञ्जनस्थोऽणुर्निजदोष-तिरस्कृतः।**
**याति तन्मयतां तेषु मायाभोगेषु रञ्जितः ॥ ४३ ॥**

एवम् उक्तक्रमेण कलया प्रवर्त्तितः विद्यया विवेच्य (५) बुद्ध्यादिभिरुपस्कृत्येत्यर्थः। मायाञ्जनस्थः मायाञ्जनपदेन मायायां यानि तत्त्वानि, तानि परिगृह्यन्ते। तानि च कलादीनि (ग) आत्मसंसर्गाद् (६) विशुद्ध-स्फटिक-प्रख्यमप्यणुं जपाकुसुमाद्युपाधिवत् स्वनिर्भासं कुर्वन्ति बुद्ध्या आत्मानमञ्जयन्ती(७)त्यञ्जनान्युच्यन्ते, तेषु तिष्ठति अतिरमणीय-बुद्ध्या च वर्त्तत इति माया-(८)ञ्जनस्थः, तादृशः अणुः आत्मा निजदोष-तिरस्कृतः निजेन सहजेन दोषेण मलेन तिरस्कृतः। अधो (९) नियमितः नोर्ध्वं शिवादिकं पश्यतीत्यर्थः। तादृशः सन् रञ्जितः तैर्मायात्मकैर्भोगक्रिया-विषयै रञ्जितः सन् तेषु मायाभोगेषु तन्मयतां याति। तदव्यतिरिक्तं तदभिन्नमात्मानं मन्यते, तदनुग्रहेणाऽनुगृहीतं तदुपघातेन चोपहतमात्मानं मन्यत इत्यर्थः ॥ ४३ ॥

एवं सकलावस्थस्य बन्धात्मनः उचितार्थकानि नामानि सूत्रान्तरेणाह—

**संसारी विषयी भोक्ता (१०) क्षेत्री(११) क्षेत्रज्ञ एव च।**
**शरीरी चेति बन्धात्मा सकलः सोच्यते बुधैः ॥ ४४ ॥**

बन्धात्मा सकलः बन्ध आत्मा (१२) स्वरूपं यस्य स बन्धात्मा। कलादिभिः सह वर्त्तत इति सकलः। तादृशः सकल एव आत्मैव संसारी (१३)शरीराद्यादान-हानेन संसरतीति संसारी (१४)। विषयी विषयोऽस्य भोग्यत्वेन विद्यत इति विषयी। भोक्ता भोगं भुङ्क्ते इति भोक्ता। क्षेत्री क्षेत्रमस्य स्वशक्ति-व्यक्तिकर-(१५) मधिकरणमस्तीति क्षेत्री (१६)। क्षेत्रज्ञः क्षेत्रं पाशजालं भोग्यत्वेनोपस्थितं जानातीति क्षेत्रज्ञः। शरीरमस्य

---

Or (क) कत्वात् कर्मशरीरयोर्बी० (१) भवन् (२) कर्माणां (३) वश्रबी० (ख) बन्धात्म० (४) मात्रयुक्तं (५) विवच्य (ग) च कानि (६) संसर्गा वि० (७) नमज्जयन्ति त्यञ्ज (८) कायाञ्ज० (९) अथो (१०) भोगी (११) चेत्रि (१२) आत्मनः (१३) संसारि (१४) संसारि (१५) व्यक्तिकं मनोधि० (१६) चेत्रि

भोगायतनत्वेन विद्यत इति शरीरी (१) इति च बुधैरुच्यते। तत्तन्निमित्ताश्रयेण शास्त्र-व्यवहारादेवे (२) ताः संज्ञा इत्यर्थः। सुप्रभेदे तु—

त्रिमलैर्बध्यते चात्मा सकलः परिवारितः (क)।
सकलश्चेति बद्धात्मा संसारी (३) विषयी तथा॥
क्षेत्री (४) क्षेत्रज्ञो (५) भोक्ता च पशुर्ज्ञानी (६) तथैव च।
भोगी चैव शरीरी च आत्मपर्याय-वाचकः॥ इति॥ ४४॥

इत्थं सकलावस्थमात्मानं निरूप्य शुद्धावस्थं (७) निरूपयितुं तदुपादानभूतं प्रथमं शक्तिपातं मृगेन्द्रसूत्र-सार्द्ध-(८) द्वयेन (५।१) दर्शयति—

**तमः-शक्त्यधिकारस्य निवृत्तेस्तत्-परिच्युतौ।**
**व्यनक्ति दृक्-क्रियानन्त्यं जगद्बन्धुरणोः शिवः॥ ४५॥**

तमःशक्त्यधिकारस्य तमश्च शक्तिश्च तमः-शक्ती (९), तयोरधिकारस्तमःशक्त्यधिकारस्तस्य (१०) तमसो मलस्य शक्तेः भगवत्-सम्बन्धिन्यास्तिरोधानशक्तेश्च योऽधिकारः न्यग्भावन-व्यापृतत्वं (११) तस्येत्यर्थः। निवृत्तेः निवृत्तिर्विरामः तस्माद्धेतोः तत्-परिच्युतौ तस्यास्तिरोधानाद् दर्शन-शक्तेः परिच्युतिः कैवल्याभिमुखीभावः, तस्यां सत्यां जगद्-बन्धुः जगतो बन्धुः जगदुद्धरण-प्रवणः (१२) शिवः परमेश्वरः अणोरात्मनः दृक्-क्रियानन्त्यं दृक् च (१३) क्रिया च दृक्-क्रिये दृक्-क्रिययोरानन्त्यं (१४ परिपूर्णत्वं व्यनक्ति प्रकटीकरोति। सत्योरेवाऽनन्तयोर्दृक्-क्रिययोर्मलावच्छिन्नत्वात् आवृतानन्त्ययोर्मलपरिपाकेन आवरणापगमाद् अभिव्यक्तिः क्रियते, नत्वपूर्वतया उत्पाद इत्यर्थः। अनेन कर्मनाशे मलपरिपाके च सति भगवतोऽनुग्राहिका शक्तिः पशुषु पततीत्युक्तं (१५) भवति। तदुक्तं पौष्करे—

कर्मनाशान् मलस्यापि विपाके सहकारिणी।
पतत्युन्मीलनी शक्तिस्तदानुग्रह-रूपिणी॥ इति॥ (पौ० वि० ४।३७)

शक्तिपातस्य दुर्ज्ञेयतया तस्य ज्ञापकानि दर्शयति (मृ० ५।४)—

**येषां शरीरिणां शक्तिः पतत्यविनिवृत्तये।**
**तेषां तल्लिङ्गमौत्सुक्यं(१६)मुक्तौ द्वेषो भव-स्थितौ॥ ४६॥**
**भक्तिश्च शिव-भक्तेषु श्रद्धा तच्छासके विधौ॥ ४७॥**

शरीरिणां (१७) शरीरमस्याऽस्तीति शरीरी (१८) तेषां शरीरिणां (१९) शक्तिः पार-

---

Or (१) शरीरि (२) द्वारा एव (क) परिचारि (३) संसारि (४) चेत्रि (५) चेत्रज्ञ भो० (६) पशुज्ञानि (७) वस्थां (८) सार्धद्व० (९) तमः शक्ति (१०) धिकारस्य (११) न्यद्‌भावनाव्यावृतत्वं (१२) दुद्धरप्र० (१३) दृक् क्रिया (१४) रानन्तव्यं (१५) पतति प्युक्तं (१६) त्सुक्य मुक्तौ (१७) शरीराणां (१८) शरीरिः (१९) शरीराणां

मेश्वरी शक्तिः अविनिवृत्तये (१) पुनर्नाविर्भावः अविनिवृत्तिः (२) अविनिवृत्तये अपुनराविर्भावाय पतति (क)। अत्राऽशरीरिणां तावद् गुरुभिः शक्तिपातस्य दुर्लक्ष्यत्वात् (३) शरीरिणामित्युक्तम्। तेषां शरीरिणां मुक्तौ मोक्षे (४) औत्सुक्यं उत्कण्ठा, भव-स्थितौ भवे संसारे स्थितिर्वर्त्तनं तस्यां द्वेषः वैराग्यं, शिव-भक्तेषु शिवभक्ति-परेषु भक्तिश्च, तच्छासके सः शिवः शासको यस्य तस्मिन् तच्छासके विधौ शास्त्रे शिवागमेष्वित्यर्थः। तत्र श्रद्धा च तल्लिङ्गं (५) शक्तिपातस्य (६) लिङ्गं चिह्नम्। एभिर्लिङ्गैर्मन्द-धियोऽपि शरीरिणां शक्तिपातमनुमिन्वन्तीति (७) भावः। श्रीमत्स्वायम्भुवे—

क्षीणे तस्मिन् प्रियां सो स्यात् परं निःश्रेयसं प्रति (८)॥ इति॥

एतच्छक्तिपातस्य प्रयोजनं मतङ्गसूत्र-(४।४५—४९) चतुष्टयेनाह—

तन्निपाताच्च तस्येत्थमज्ञस्याप्यभिलाषिणः।
बुद्धिरुत्पद्यतेऽकस्माद् विवेकेनात्मवर्त्तिना॥ ४८॥

इत्थम् एवं प्रकारेण अज्ञस्य अनात्मन्यात्माभिमान-युक्तस्य अभिलाषिणः अभिलाष (९) इच्छा यस्य तादृशस्यापि तस्य सकलात्मन (१०) स्तन्निपातात् तस्याः शक्तेः निपातात् निपातनाद्धेतोः आत्मवर्त्तिना आत्म-विषयेण विवेकेन अनित्याशुचि-दुःखानात्मभूतायाः प्रकृतेरन्योऽहं चेतनात्मकः पुरुषः स्वतोऽवभासमानः परमेश्वराधीन (११) इत्येवंविधेन विवेकेनेत्यर्थः। तेन युक्तेति शेषः। बुद्धिर्मतिः अकस्माद् अकारणाद् उत्पद्यते जायते। तत्र शक्तिपात-व्यतिरेकेण हेत्वन्तरं नास्तीत्यर्थः (१२)॥

इत्थं (१३) विवेकानन्तरम् उत्पद्यमानं कार्यमाह—

विवेकिनो विरक्तस्य जिज्ञासा चोपजायते।
जिज्ञासोपेत-चैतन्यं पशुं संसार-सागरात्॥ ४९॥
जिघृक्षया युनक्त्येनं (१४) युक्तं प्रेरयति प्रभुः॥ ५०॥

विवेकिनः पूर्वोक्त-विवेक-बुद्धि-युक्तस्य विरक्तस्य संसार-वैराग्यवतश्च (१५) जिज्ञासा ज्ञातुमिच्छा जिज्ञासा प्रधानात्मक-संसारनिवृत्ति-हेतुरीश्वर-पुरुष-विषय-ज्ञानेच्छेत्यर्थः। सा उपजायते उत्पद्यते। जिज्ञासोपेत-चैतन्यं जिज्ञासया उपेतं सहितं चैतन्यं (१६) यस्य तं

Or (१) ये विनिवृत्तिः पुनरावि० (२) अपिनि० (क) र्भावाय। अत्रा० (३) दर्लक्षत्वात् (४) मौचे (५) तल्लिंगश्च० (६) शक्तिपादस्य (७) पातं अनुमित इति (८) प्रति एतच्छ० (९) षिणः इच्छा (१०) त्मनस्तु विशेषोऽस्ति तन्नि० (११) परमेशाधित (१२) रत्नस्थौत्यर्थः (१३) इत्थवि० (१४) जिघ्रक्षयायुक्तौति विवेकिनः (१५) वैरागतश्च (१६) चैतन्य यस्य

पशुम् आत्मानं संसार-सागरात् संसार एव सागरः समुद्रस्तस्मात् जिघृक्षया (१) गृहीतुम् उद्धर्तुम् इच्छया युनक्ति योजयति। भगवानिति शेषः। पुनः किं करोतीत्यत (२) आह—एनं युक्तं प्रेरयति (३) प्रभुरिति। युक्तम् एनं पशुं प्रभुः परमेश्वरः प्रेरयति (४) आचार्यं प्रति प्रेरयतीत्यर्थः ॥

आचार्य-शिष्ययोरुभयोरपि सम्बन्ध-सम्पादक (५) ईश्वर एवेत्याह—

प्रेरणे प्रेरकः (६) श्रीमान् द्वयोरपि स मन्त्रराट् ।
अनुग्राह्यस्य विनये तथाऽनुग्राहकस्य च ॥ ५१ ॥
कारुण्ये त्वनयो (७) र्यस्मात तयोर्योगः सुदुर्लभः ॥ ५२ ॥

—मा० पा० वि० ४।४८—४९

श्रीमान् सर्वज्ञत्वाद्यैश्वर्य-युक्तः मन्त्राणां राट् मन्त्रनायकः स प्रभुः (८) प्रेरणे प्रेरककर्म-विषये द्वयोरपि शिष्याचार्ययोरुभयोरपि प्रेरकः । तयोः प्रेरणांशे विशेषमाह—अन्वित्यादि। अनयोः शिष्याचार्ययोर्मध्ये अनुग्राह्यस्य अनुग्रह-योग्यस्य विनये विशिष्टो नयो विनयः गुरु-शुश्रूषात्मकः तस्मिन्, प्रेरक इत्यनुषङ्गः । तथैव अनुग्राहकस्य अनुग्रहकर्त्तुराचार्यस्य च कारुण्ये करुणैव कारुण्यं, चातुर्वर्ण्यादित्वात् ष्यन्प्रत्ययः तस्मिन्। तु-शब्दादनुग्रहेच्छायामपि प्रेरक इत्यनुषङ्गः। तथाच प्रेरकः शिव एव अनुग्राह्यानुग्राहकयोः सम्बन्धं करोतीत्यर्थः। तत्र हेतुमाह—यस्मादिति। यस्माद् कारणात् तयोः शिष्याचार्ययोर्योगः सम्बन्धः सुदुर्लभः ईश्वरं विना सुदुर्घटः, तस्मात् ईश्वर एव सम्बन्ध-जनक इत्यर्थः। तथा पौष्करे—

वैराग्यं जायते क्षिप्रं संसाराद् दुःख-सागरात्।
दिदृक्षा जायते शम्भोः पाद-पङ्कजयोरपि ॥
कदा द्रक्ष्यामि देवेशं मोक्ष्येऽहं बन्धतः कदा।
को वा दर्शयिता शम्भोरिति संजायते मतिः ॥
एवं संसारतो भीतमनुगृह्णाति चेश्वरः ॥ इति। (—वि० पा० ४प० ३९।४१)

ननु शक्तेः कथं निपातः ? तस्या व्यापकत्वात्, व्यापकस्य वस्तुनश्च्युति-(९) लक्षण-निपातायोगात्; अग्नेरुष्णत्ववत् शिव-समवायिन्यास्तस्याः शिवात् (१०) च्युत्ययोगाच्च। किञ्च नित्य-व्यापक-शक्तेः (११) सर्वथा सर्वकालं पश्वात्मसु स्थितत्वाद् युगपन्मुक्ति-प्रसङ्गः। नच सा (१२) शक्तिः कस्मिंश्चिद् विशिष्ट-काल एवाऽनुग्रह-कारिणीति वाच्यम्। तर्हि कालस्यैव मोक्षकर्तृत्वापत्तेः, शिवेन प्रयोजनाभाव-प्रसंगात्। अतः कथं शक्तिपात इति

Or (१) जिघ्रक्षया (२) करोतित्यत (३) प्रेरयिता (४) प्रेरितं (५) सम्पादकं (६) प्रेरक श्री० (७) यत्नेन मयो (८) त्तनामकः स प्रभः (९) वस्तुनच्युति (१०) शिवाद्युच्युत्य० (११) व्यापकः शक्ते (१२) सार्वश०

चेत् ? मैवम् । द्विधा शब्द-(१) प्रवृत्तिर्गौणी मुख्येति । अत्र पातशब्द-प्रवृत्तिर्गौणी (२) । यथा लोके अस्य दृष्टिरस्यां कामिन्यां पतिता इत्युक्ते न (३) सा पुरुषाद् विच्युता कामिन्यां पतिता दृश्यते, किन्तु दृश्य-दर्शक-सम्बन्धमात्रेण सम्बन्धाद् दृष्टिः पतिता इत्युपचर्यते । तद्वदिह अस्मिन् पुंस्यपि अनुग्राह्यानुग्राहकत्व-लक्षण-सम्बन्धेन सम्बन्धात् शक्तिः पतिता इत्युपचारेण उक्ता, न मुख्यत इत्यदोषः । अयमेवाऽर्थः शङ्कोत्तरतया किरणागमे स्पष्टं प्रतिपादितः । तद् यथा—

गरुड़ उवाच—शक्तिपाताद् भवेद् दीक्षा निपातो न विभुत्वतः (४) ।
शिवस्य सर्वस्थिता पशोः (?) ॥
स्थितत्वात् सर्वदा शक्तेर्भवोच्छित्तिर्न किं भवेत् (क) ।
कालो वा (ख) सचिवः प्रोक्तो यदि कालः शिवेन किम् ॥

ईश्वर उवाच—उपचारेण शब्दानां (ग) प्रवृत्तिरिति दृश्यते ।
यथा पुमान् विभुर्नित्यो (५) विनष्टः शिवतां गतः ॥
एवं शक्ति-निपातोऽपि प्रोच्यते चोपचारतः (घ) ।

सिद्धान्तेऽपि—यथाऽर्कस्य (६) प्रभाः सद्यो मेघजालेन वारिताः ।
तद्वद् ज्ञानात्मिका शक्तिः पाशजालैः समावृता ॥
पक्व-पाशेषु सुव्यक्ता पतितेत्युपचर्यते (ङ) । इति ।

शक्तिसंविदानं नरमद्रि-(७)पातभीतवत् संसाराद् भीतः शिष्यो देशिकं गच्छति । किरणे—
निपात-भयतो यद्वद् वस्तुनः सहसा भवेत् ।
तस्मादन्यत्र यात्येव तथात्मा देशिकं प्रति ॥ इत्यादि ॥

एवं शक्तिपातमुक्त्वा तदनन्तर-भाविन्या दीक्षया (८) प्राप्तं शुद्धावस्था-स्वरूपलाभं स्वायम्भुवसूत्रेणाह—

## स देशिकमनुप्राप्य दीक्षा-विच्छिन्न-बन्धनः ।
## प्रयाति शिव-सायुज्यं निर्मलो निरुपप्लवः ॥ ५३ ॥

स निःश्रेयस-प्राप्तिकामः (च) शक्तिपातवान् पुरुषः देशिकं शिवेच्छयाऽधिगतमेव गुरुम् अनुप्राप्य अधिगम्य दीक्षा-(९) विच्छिन्न-बन्धनः दीक्षया (१०) विछिन्नानि बन्धनानि यस्य (११) स दीक्षा-विच्छिन्न-बन्धनः, गुरोर्दीक्षामासाद्य दीक्षितस्य (१२) त्रि-मलबन्धनानि विछिन्नानीत्यर्थः । तथा वरुणपद्धत्यां (१३)—

Or (१) शब्दप्र० (२) गौंणि (३) पतिते सुक्तेन (४) विभुत्ववतः (क) शक्तिर्भवोच्छत्तिन्न (ख) वासचः (ग) शिवानां (५) विभुन्नित्यो० (घ) सोपचा० (६) कर्त्तस्य (ङ) प्रतिते (७) शक्तिविदानान्नरमद्रिपात (च) प्राप्तका० (८) दिक्षया (९) दीक्षो वि० (१०) दीक्षाय (११) विच्छिन्नानि स (१२) दिक्षितः (१३) वरुणाप०

क्रियया वाऽथ शक्त्या वा दीक्षा सा सर्वतो मता (१)।
दीक्षया (२) मुच्यते देही (३) त्रिविधाद् भवबन्धनात्॥ इति।

एवम्भूतः सन्। अत एव निर्मलो मल-रहितस्तथाविधो (४) भूत्वा शिवसायुज्यं मोक्षं शिव-तुल्यत्वं तत् प्रयाति प्राप्नोति। तथा (५) चिन्त्य-विश्वे—

दीक्षयित्वा विधानेन षट्त्रिंशत्-तत्त्वकोपरि।
निष्कले निर्मले तत्त्वे योजयत्येव निश्चयः॥ इति।

अत्र 'निर्मल' इत्यनेन शुद्धावस्थाया कैवलावस्थातो भेदो दर्शितः। 'निरुपप्लव' (६) इत्यनेन बन्धावस्थातो विशेष इति।

इत्थम्भूतदीक्षाया एव मोक्षहेतुत्वं, नतु ज्ञानादीनामिति(७) सर्वज्ञानोत्तरसूत्रं दर्शयति—

**तत्त्वैरेभिर्निबद्धात्मा सर्वधर्मैश्च संयुतः।**
**नाऽनेन(८)शक्यते मोक्तुं वर्ज्य दीक्षां शिवात्मिकाम्॥ ५४॥**

एभिः तत्त्वैः कलादिभिः (?-९) सर्वधर्मैः सर्वैश्च तत्तत्तत्त्वधर्मैर्भुवनादिभिश्च संयुतः सहितः निबद्धात्मा अनादि-मलेन प्रवाह-रूपेण कर्मणा च नितरां बद्धो निबद्धः (१०) स चासौ आत्मा च निबद्धात्मा सम्बद्ध (११) आत्मा शिवात्मिकां शिव-स्वरूपां दीक्षां देशिक-व्यापार-रूपां वर्ज्य (१२) वर्जयित्वा अनेन (१३) ज्ञानादिनोपायेन मोक्तुं मोचयितुं न शक्यते। तथा—

ज्ञानादिभिर्न मोक्षोऽस्ति तस्माद् दीक्षैव (१४) मोचनी।
सर्वस्याऽनुग्रहकरः शिवो देवः (१५) स्वभावतः॥
दीक्षया (१६) चात्र मुक्तिः (१७) स्यात् सर्वेषां प्राणिनामिह।
तस्मात् तु शिव-सामर्थ्यान् मुक्तिः सर्वत्र सिध्यति॥

तथा निश्वासे—स्नानेन निर्मलो (१८) मन्त्र-जपात् सिद्धिर्न संशयः।
पूजायां सन्निधानं (क) न होमो नैव फलप्रदः॥
ध्यानेन सर्वगं देवं (१९) योगै योगित्वमाप्नुयात्।
व्रतेन काय-शुद्धिः (२०) स्याद् दीक्षया मुक्तिरिष्यते॥ इति।

तथा पुराणे सौरसंहितायाम्—

कृत्वा तु नैष्ठिकीं दीक्षां विमुक्ता (२१) निवसन्ति ये।

---

Or (१) मताः (२) दीक्षाया (३) देहि (४) रहित तथा (५) अथा (६) निरुद्धपप्लव (क) विशेषत (७) नादिनामिति (८) नान्येन (९) ततैमाधियैः (१०) निबन्धात्मा (११) निबंन्धः सबद्ध (१२) रूपां वर्जयित्वा (१३) अनेन। अनेन ज्ञा० (१४) दीक्षेव (१५) देव स्व (१६) दीक्षाया (१७) मुक्ति स्या (१८) निर्मला (क) सन्निधानेन (१९) देव योग योगि (२०) शुद्धिस्या० (२१) दीक्षापशुविमुक्ते व

तेषां तत् परमं ज्ञानं दद्यादन्ते परं पदम् ॥ इति ।

स्कान्दे भृगुशापे च—नात्राश्रम-कृतः (१) कश्चिदुत्कर्षो विद्यते नृणाम् ।
परां दीक्षां विना शैवीं (२) बन्धत्रय-विमोचनीम् ।
तस्मान्मुक्ति र्दीक्षयैव नाश्रमैर्नान्य-कर्मभिः ॥

तथा ज्ञानतिलके—न दानै र्न तपो-यज्ञै र्नियमै र्न व्रतैः शुभैः (३) ।
न स्नान-तीर्थ-संघातैर्लभ्यते परमं पदम् ॥
नानेकैः (४) तपसां व्रातै (५) र्लभ्यते (६) पुण्यसञ्चयैः ।
बध्नन्ति सर्वथात्मानं कोशकारं कृमिर्यथा ।

अयं मलपाक-वशात् शक्तिपात-क्रमेण (७) दीक्षया मोक्षं याति (८), नतु ज्ञानादिभिरुपायैः; तेषां दीक्षाङ्गत्वेन श्रवणात्, योगादेः शिव-विषयस्य दीक्षया विनाऽनुपपत्तेः, मलस्य च द्रव्यत्वेन चक्षुःपटलादिवत् ज्ञानमात्रेण (९) निवृत्त्यभावात्, चक्षुर्वैद्य-व्यापारेणेव (१०) दीक्षाख्येनेश्वर-व्यापारेणैव निवृत्तिसिद्धेश्च । उक्तं श्रीमत्पौष्करे—

दीक्षैव मोचयेत् पाशान् शिवत्वं च ददात्यणोः । ( पौ० ज्ञा० १७४ )

षट्सहस्रिकायामपि—

दीक्षैव मोक्षदा पुंसां (११) चिदभिव्यक्ति-कारिणी (१२) ॥ इति ॥

दीक्षा-व्यापारेणाऽभिव्यज्यमाना-(क) त्मचैतन्य-स्वरूपं मृगेन्द्र-(१०।३) सूत्रेणाह—

## कर्तृशक्तिरणोर्नित्या विभ्वी (१३) चेश्वर-शक्तिवत् ।
## तम-(१४) श्छन्नतयाऽर्थेषु नाभाति निरनुग्रहा ॥ ५५ ॥

अणोरात्मनः कर्तृशक्तिः ज्ञान-क्रियात्मिका शक्तिः ईश्वर-शक्तिवत् ईश्वरस्य शक्ति-(१५) स्तद्वत् नित्या आद्यन्त-रहिता विभ्वी (१६) व्यापिका च । यद्येवं (१७) नित्यत्वाद् विभुत्वाच्च सर्वदा भान-(१८) प्रसंगः ।

तथा—व्यञ्जिका यत्र यत्राऽस्य शरीरं तत्र तत्र तु ।
भोगार्थं (ख) स्याद् गुणव्यक्तिर्व्यापित्वं तेन गम्यते ॥ (१९) इति ॥

अत आह—अर्थेषु विषयेषु करणीय-स्वरूपेषु (२०) तमश्छन्नतया (२१) तमसाऽ-

Or (१) श्रम: क्रत: (२) शैवं (३) र्न तपो यज्ञै नियमैर्व्रतै: (४) कै: पाप (५) पापसुवाते (६) र्लभ्यते परनेकैः पु० (७) पातकर्मेण (८) मोचं या नतु (९) ज्ञानामा० (१०) रेणैव (११) पुंसाकं चि (१२) कंचिदभिव्यक्ति कारिणी ॥ तु ॥ (क) भिवज्ञामात्म० (१३) विसिचे (१४) तमच्छन्न (१५) शक्तिं त० (१६) विद्वी (१७) यद्येव नि० (१८) ह्यान प्र० (ख) भोग्यार्थं० (१९) गम्यतेति (२०) करणियस्व० (२१) तनुच्छन्न०

नादिमलेन छन्नतया आवृतत्वात् निरनुग्रहा अनुग्रहो व्यञ्जकः तद्रहिता सती (१) नाभाति न भासते। तदुक्तं रत्नत्रये (२५२)—

गलिते सर्वथा (२) बन्धे विमुक्ते चाणवे मले।
सर्वार्थ-द्योतिका (३) शक्तिः शिवस्येव विजृम्भते॥ इति॥

आत्म-शक्तेर्विभुत्वेऽपि तद्-भानस्य व्यञ्जकाधीनत्वात् (४) सर्वज्ञतापि नास्तीति पराख्यसूत्रेण दर्शयति—

विभुः सन् ज्ञान-रूपोऽपि प्रदेशे वेत्ति येन तत्।
किञ्चिज्ज्ञस्तेन सः प्रोक्तो व्यवधानानिदर्शनात्॥ ५६॥

ज्ञान-रूपः (५) ज्ञानमेव रूपं (६) स्वरूपं यस्य सः ज्ञान-रूपः (७) विभुः व्यापकः सन् अपि प्रदेशे कलादि-व्यञ्जक-प्रदेशे येन कारणेन तद् ज्ञेयं वेत्ति जानाति, तेन कारणेन सः आत्मा किञ्चिज्-ज्ञः किञ्चिज् जानातीति किञ्चिज्-ज्ञः प्रोक्तः प्रतिपादितः। तत्र हेतुमाह—व्यवधानानिदर्शनात्। व्यवधाने व्यञ्जक-रहित-स्थले अनिदर्शनात् निदर्शनाभावात्, ज्ञानाभावादित्यर्थः॥

यद्यात्मनो व्यञ्जक-वशात् किञ्चिज्ज्ञत्वं, तर्हि दीक्षारूप-व्यञ्जके सत्यपि सर्वज्ञत्वमात्मनो न स्यात्; व्यञ्जकत्वाविशेषादित्याशङ्कां (८) दृष्टान्तपूर्वं व्यञ्जक-तारतम्य-प्रतिपादकेन सूत्रान्तरेण निरस्यति—

स्वल्पेऽपि व्यञ्जके (९) स्वल्पं महन्महति (१०) तत् स्थितम्।
यादृक् तादृक् भवेत् तस्य प्रदीपस्तिमिरे यथा॥ ५७॥

तत् मल-रुद्धं चैतन्यं स्वल्पे व्यञ्जके स्वल्पे सति स्वल्पं स्वयमभिव्यज्यते। महति व्यञ्जके महति सति महत् अभिव्यज्यते। तत्र दृष्टान्तमाह—यथा तिमिरे अन्धकारे प्रदीपः अर्थ-व्यञ्जक-प्रदीपः यादृक् स्वल्प-(११) व्यञ्जको (क) वा महाव्यञ्जको (ख) वा भवेत्। तथा तस्य चैतन्यस्य व्यञ्जकमित्यध्याहारः (१२)। तादृक् तथाविधम् अल्पं वा महद् वा स्थितं व्यञ्जकतया स्थितमिति। तथाच कलादि-रूपादल्पाद् व्यञ्जकाद् दीक्षा-रूपस्य महाव्यञ्जकत्वम् (१३)। तथाच नात्मनः सर्वज्ञत्वानुपपत्तिरित्यर्थः (१४)।

---

Or (१) सति (२) सर्वदा (३) र्थज्योतिका (४) काधिनत्वात् (५) ज्ञानस्वरूपं (६) मेव स्वरूपं (७) ज्ञानस्वरूपः (८) दित्याशंका दृष्टान्त० (९) व्यंजने (१०) महं महति (११) क् कल्पव्यञ्जके (क) व्यञ्जके (ख) व्यञ्जवे (१२) ध्याहार (१३) व्यंजकतया च नचात्मनः (१४) सर्वज्ञत्वा अनुप०

आत्मनश्चेतनत्वं च (१) स्वशक्ति-योगात् अचेतनत्वं च तदभावादित्येतत् निश्वास-कारिकासूत्रेण दृष्टान्तमुखेन दर्शयति—

स चेतनः (२) स्मृतो जीवो यदा शक्त्या तु युज्यते ।
अन्यथा निष्कलो ह्यात्मा विष-सुप्त्येव लक्ष्यते ॥ ५८ ॥

जीव आत्मा यदा तु यस्मिन् काले शक्त्या अभिव्यक्तया स्व-शक्त्या युज्यते सम्बध्यते, तदा स जीवश्चेतनः चैतन्य-युक्तः इति स्मृतः । आगमज्ञैरिति शेषः । अन्यथा हि अभिव्यक्त-शक्त्यभावे आत्मा जीवः निष्कलः कला चैतन्यं तद्रहितो निष्कलः अचेतन इति । तत्र दृष्टान्तमाह—विष-सुप्त्येव (३) विषेण सुप्तिः मूर्च्छा तयेव तया युक्त इव लक्ष्यते दृश्यते । यथा विष-मूर्च्छावस्थायाम् आत्मनश्चैतन्याभिव्यक्त्यभावादेव अचेतनत्वं, (४) नतु चैतन्य-राहित्यात्; तथाऽस्यापि चैतन्य-व्यक्त्य-(५) भावादेवाऽचेतनत्वं, नतु सर्वथा लोष्ठवत् चैतन्याभावादित्यर्थः ॥

अथाऽतीतावस्थस्यात्मनो (६) ज्ञानशक्त्या प्रबोधनं दृष्टान्त-मुखेन किरणसूत्रेण निरस्यति—

गुरुर्यथाऽग्रतः शिष्यान् सुप्तान् दण्डेन बोधयेत् ।
शिवोऽपि मोह-निद्रायां सुप्तांच्छक्त्या प्रबोधयेत् ॥ ५९ ॥

यथा गुरुः आचार्यः । अत्र गुरु-शब्दार्थः—

गु-शब्दस्त्वन्धकारश्च रु-शब्दस्तन्निरोधकः ।
अन्धकार-निरोधित्वाद् (क) गुरुरित्यभिधीयते ॥

अग्रतः पुरतः सुप्तान् निद्रा-परवशान् शिष्यान् शासनार्हान् दण्डेन वेत्रादिना करणेन बोधयेत् प्रबोधयेत् । अग्रेस्थितत्वाविशेषेऽपि शासनार्हान् मलपरिपाक-योग्यत्वेन गुरुर्दण्डेन (७) बोधयति, न (८) त्वशिष्यानित्यर्थः । तथा शिवोऽपि परमेश्वरोऽपि मोह-निद्रायां मोहः मलः तस्य निद्रा कार्यं प्रत्यसामर्थ्यं परिपाक-विशेषः, तस्यां सत्यामपि सुप्तान् तन्निवृत्युपाय-संविद्-(९) रहितान् पशून् शक्त्या करणभूतया (१०) ज्येष्ठा-शक्त्या बोधयेदिति ॥

---

Or (१) चेतनत्वं च स्वशक्तियोगादचेतनत्वं च (२) चेतन स्मृ० (३) विषसुप्त्या (४) चेत नत्व नतु० (५) व्यक्त्याभावा० (६) तीतावस्थतस्या (क) निरोध० (७) गुरुदण्डेन (८) स त्वशि० (९) संविरहि० (१०) करणाभूत०

आत्मशक्तेरभिव्यक्ति-प्रकारं दृष्टान्तमुखेन सूत्रान्तरेण प्रतिपादयति—

यथा भेषजसामर्थ्या(१)दशक्तानां बलं परम् ।
तेन तच्छक्ति-योगेन सामर्थ्यममितं भवेत् ॥ ६० ॥

अशक्तानां व्याधिना सामर्थ्य-हीनानां भेषज-सामर्थ्याद् भेषजस्य औषधस्य सामर्थ्याद् वीर्याद् यथा येन प्रकारेण परमुत्कृष्टं बलं प्रागविद्यमानरूपं(२) सामर्थ्यं, भवेदिति शेषः । तथा तेन तच्छक्ति-योगेन तस्य शिवस्य (३) शक्तिः रौद्री अनुग्राहक-शक्तिः तस्या योगेन सम्पर्केण मितं न भवत्यमितं देशकाल-परिच्छेद-शून्यं सामर्थ्यं प्राक्सिद्धरूपं ज्ञान-क्रियात्मकं सामर्थ्यं भवेत् अभिव्यक्तं भवेदिति ॥ ६० ॥

पराख्य-सार्ध-(४) सूत्रेण न केवलमस्यात्मनो मोक्ष एव शिवशक्त्यपेक्षा (५) किन्तु देहभोग-योगयोरपीत्याह—

शिवत्वाद् युज्यते मोक्षे पशुत्वाद् युज्यते तनौ ।
भोगेष्वपि च सामर्थ्यात् कर्मणो मुनिसत्तम ! ॥ ६१ ॥
ईश्वराधिष्ठितात्माऽसावस्वतन्त्रो यतस्तु सः ॥ ६२ ॥

यतः यस्मात् कारणात् अस्वतन्त्रः (६) इष्टप्राप्त्य-(७)निष्ट-परिहारयोः स्वातन्त्र्य-रहितः, ततः तस्मात् कारणात् ईश्वराधिष्ठितात्मा ईश्वरेण परमेश्वरेण अधिष्ठितः आत्मा स्वरूपं ज्ञानक्रियात्मकं यस्य असौ आत्मा शिवत्वात् शिवत्वं पशुत्व-निवृत्तिः मलपरिपाकः तस्मान्निमित्तात् मोक्षे युज्यते सम्बध्यते । पशुत्वात् पशुत्वं मलपरिपाकाभावः (८) तस्मात् तनौ देहे युज्यते । कर्मणां सामर्थ्याद् भोगेष्वपि सुखदुःखात्मकेष्वपि युज्यते । मुनि-सत्तमेति श्रोतुः (९) संबोधनम् ॥ ६१—६२ ॥

अथात्मनो भोग-मोक्षयोः परस्पर-भिन्न-कारणमपेक्षितमिति मृगेन्द्रसूत्रेण (७।५) प्रति-पादयति—

नित्य-व्यापक-चिच्छक्ति-निधिरप्यर्थ-सिद्धये ।
पाशवं (१०) शांभवं वापि बलमन्वेष्टि नान्यथा * ॥ ६३ ॥

नित्य-व्यापक-चिच्छक्ति-निधिः नित्या च व्यापिका चेयं चिच्छक्तिः नित्य-व्यापक-चिच्छक्तिः तस्याः निधिः आस्पदमपि (११) अर्थ-सिद्धये अर्थौ भोग-मोक्षौ तयोः सिद्धये

* मुद्रिते मृगेन्द्रे तु अत्रायं पाठः—"नान्विष्यत्यन्यथा बलम्" ।—मृ० ७।५ ।

Or (१) सामर्थ्यदश० (२) प्राक्विद्यामान सामर्थ्यं (३) शिवशक्तिः (४) पराख्य सार्थ (५) शिवः शक्त्यपेक्ष्या (६) स्वतन्त्रं (७) प्राप्यानिष्ट (८) पाकभाव (९) श्रोतुसं० (१०) पाशनं (११) आस्यमपि

भवावस्थायां भोग-लक्षणस्याऽर्थस्य निष्पत्तये. पाशवं पशोरिदं पाशवं पशु-सम्बन्धि बलं सामर्थ्यं पशूचितं (१) कलाद्युत्तेजनम् अन्वेष्टि अपेक्षते। मुक्ति-निमित्तं च शाम्भवं शम्भु-सम्बन्धि दीक्षारूपं बलम् अन्वेष्टीत्यनुषङ्गः। भोग-मोक्षावस्था-द्वयेऽपि अयमात्मा (२) पाशवं वा पारमेश्वरं (३) वा स्वसामर्थ्योत्तेजनमपेक्षत इत्यर्थः। अन्यथा बलोत्तेजनाभावे न अर्थसिद्धिरित्यध्याहारः। भोग-मोक्षौ न सिध्यत इति ॥ ६३ ॥

अथ भोगमोक्षापेक्षणीयस्य ज्ञानस्य (४) स्वरूपं कालोत्तरसूत्रेण दर्शयति—

विश्वस्याऽनेकरूपस्य ज्ञानमेकं(५) शिवात्मकम् ।
व्यापकं विमलं शान्तं भुक्ति-मुक्तीति येन तत् ॥ ६४ ॥

अनेक-रूपस्य चतुर्दश-(चतुर्विध)भूतरूपस्य विश्वस्य जगतः येन ज्ञानेन भुक्तिमुक्ती (६) भुक्तिर्मुक्तिश्च। भवत इति शेषः। तत् शिवात्मकं शिवस्य रूपं ज्ञानं परज्ञानम् एकम् अद्वितीयं व्यापकं सर्वगतं विमलं शान्तं रागद्वेष-रहितमिति ॥ ६४ ॥

तस्या एव ज्ञानशक्तेः शिव-समवायित्वं (७) चात्म-शिव-योजकत्वं च निश्वास-सार्ध-(८) सूत्रेण दर्शयति—

एकैव (९) वस्तुतः शैवी (१०) या शक्तिर्निर्मला परा ।
अविनाभाविनी शम्भोः शुचेरुष्णमिव प्रभोः ॥ ६५ ॥
तयाऽऽत्मशिवयोः सन्धिः शिवबोध-परापरा ॥ ६६ ॥

निर्मला मल-रहिता परा उत्कृष्टा शैवी शिव-सम्बन्धिनी या शक्तिः, सा वस्तुतः परमार्थतः एका भेद-रहितैव। निश्वासोत्तरे—

एक एव शिवः (११) शक्तिस्तथाकार्याणि भेदतः ।
तस्माच्छिवात्मिका शक्ति (१२) र्भोग-मोक्षौ शिवेच्छया ॥ इति ।

पुनः कीदृशी ? अत आह—शुचेः अग्नेः उष्णम् उष्णत्वमिव प्रभोः प्रभवन-शीलस्य शम्भोः शं भवत्यस्मादिति शम्भुः तस्य परमेश्वरस्य अविनाभाविनी अविनाभावः (१३) समवायः सोऽस्याऽस्तीत्यविनाभाविनी समवायिनी। तथा पौष्करे ( वि० १।८ )—

शिवस्य समवेता या शक्ति (१४) र्ज्ञानात्मिकाऽमला ।
सैव (१५) ज्ञानमिति प्रोक्तं शास्त्रं (१६ ) तदनुमापकम् ॥ इति ।

---

Or (१) पशूपचितकलाद्युत्तेजनं (२) अयमात्मपाश० (३) परमे० (४) ज्ञानस्वरूपं (५) ज्ञानमेवं (६) भुक्तिमुक्ति (७) वसमावायित्वं (८) निश्वाससार्ध सू० (९) एकैका व० (१०) शैवि (११) शिवो: शक्ति (१२) शक्तिभागमोक्षा शि० (१३) अविना भावसम० (१४) शक्तिज्ञाना० (१५) शैवज्ञानं (१६) शब्दंतद०

पुनः कीदृशी ? अत आह—शिवबोध-परापरा। शिवस्य बोधः शिवज्ञानं तद्विषये परा च अपरा च, परापरभिन्नेत्यर्थः। तथाच आदावेवोक्तं—"ज्ञानं द्विविध-माख्यात"मिति। एवं-विधया तया ज्ञान-शक्त्या आत्म-शिवयोः आत्मा च शिवश्च आत्म-शिवौ, तयोः सन्धिः (१) सन्धानम् अनुग्राह्यानुग्राहकत्व-लक्षण-सम्बन्धो भवेदिति शेषः॥ ६५—६६॥

इदं शाम्भवं ज्ञानम् अध्यक्षादि-विलक्षणम्, अपरोक्षेण प्रकाशं, सर्वार्थ-विषयं चेति मृगेन्द्र-सूत्रेण (५।१६) दर्शयति—

नाध्यक्षं(२)नापि(३)तल्लैङ्गं न शाब्दमपि(४)शांकरम्।
ज्ञानमाभाति विमलं सर्वदा सर्ववस्तुषु॥ ६७॥

तत् शाङ्करं शङ्कर-सम्बन्धि ज्ञानम् अध्यक्षं न प्रत्यक्षं न भवति। अक्ष-सव्यपेक्षं (५) हि ज्ञानं प्रत्यक्षम्। न चेश्वरस्याऽक्षव्यापारोऽस्ति, अतो न प्रत्यक्षम्। न (६) लैङ्गं लिङ्ग-जन्यम् आनुमानिकमपि न (७) भवति, तस्य प्रत्यक्षाधीन-(८) वृत्तित्वात्। न शाब्दमपि (९) शब्दजन्यं ज्ञानमपि न भवति, तस्याऽत्यन्त-परोक्षार्थ-(१०) विषयत्वात्। नच (११) किञ्चिद् भगवतः परोक्षम्। अतः विमलम् अनाद्यावरण-शून्यं सर्वदा सर्वस्मिन् काले सर्ववस्तुषु समस्त-विषयेषु आभाति प्रकाशते।

ननु "पञ्चवक्त्रस्त्रिपञ्चदृक्" (१२) इत्यादिना श्रूयत (१३) एवागमेष्वपि (१४) ईश्वरस्य शरीरेन्द्रिय-योगः। तत्सद्भावेऽपि कस्मान्न तत्सव्यपेक्षे ईश्वरस्य ज्ञान-क्रिये इति चेत्। न। ईश्वरस्य ज्ञान-क्रियोपयोगि-शरीरेन्द्रिय-योगाभावात्, स्वभावत एव सर्वार्थ-दृक्-(१५)क्रिया-शक्तिमत्त्वात् इच्छामात्रेणैव सर्ग-स्थित्यादि-करणक्षमत्त्वात् (१६)। भक्तानुग्रहाय तनुग्रहणम्, अन्यथा निराकारे ध्यान-पूजयोरयोगात्। उक्तं हि पौष्करे—

साधकस्य तु लक्ष्या(रक्षा)र्थं तस्य रूपमिदं स्मृतम्।
सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्॥ इति।

अत्र तु "विमलं"मित्यावरण-राहित्य-प्रतिपादनेन शिवज्ञानं न व्यञ्जकापेक्षं, नापि संसारि-ज्ञानमिव संशय-विपर्ययानध्यवसाय-(१७) युक्तमित्युक्तं भवति। यानि किल ज्ञानानि मलशक्त्या आवृतानि भोग-निष्पादनाय व्यञ्जकं कलादि अपेक्षन्ते, तानि तु

---

Or (१) सन्धिं स० (२) नाध्यक्षः (३) नातपित० (४) न शब्दमपि (५) अक्षसव्यपेक्षंज्ञा (६) प्रत्यक्षम्। लैङ्गं (७) मपि भवति (८) त्यक्षीधिन (९) न शब्दमपि (१०) परोक्षत्वर्थविष (११) न किंचिद् (१२) पञ्चद्रगि० (१३) श्रयतः (१४) गमेष्वेश्व० (१५) सर्वार्थक्रिया० (१६) करणमत्वाद् (१७) ध्यवसायययु०

व्यञ्जकस्य कलादेः (१) स्वल्प-प्रकाश-करणात् तथाविध-व्यञ्जन-भाञ्जि (२) ज्ञेयविषये (क)व्याघातवन्त्यपि भवन्ति। न चैश्वरं (३) ज्ञानमेवंविधम्, अनाद्यावरण-शून्यत्वात्।

उक्तं किरणे—अनादिमल-मुक्तत्वात् सर्वज्ञोऽसौ ततः शिवः।

मृगेन्द्रे ( ५।१४-१५ ) च—तच्चाऽस्यावृति(४)-शून्यत्वान्न व्यञ्जकमपेक्षते।
तन्न सांशयिकं (५) तस्माद् विपरीतं न जातुचित् (६)॥
यानि व्यञ्जकमीक्षन्ते वृतत्वान्मलशक्तिभिः।
व्यञ्जकस्याऽनुरोधेन तानि स्युर्व्याहतान्यपि॥ इति॥ ६७॥

इदानीं त्रिविधं (७) बन्धमनूद्य तस्य च बन्धत्वम् अस्याऽणोश्च तद्-विमुक्तये शिवत्व-व्यक्तये च शिवात् प्रवृत्तमुपायं (८) स्वायम्भुवसूत्रेणाह—

अस्मात् प्रविततताद् बन्धात् परसंस्था-निरोधकात्।
दीक्षैव मोचयत्युर्ध्वं शैवं धाम नयत्यपि (९)॥ ६८॥

परसंस्था-निरोधकात् परसंस्था कैवल्यं तस्या निरोधकात् (१०) विघातकात् प्रविततात् प्रकर्षेण विततात् विस्तृतात् (११) मल-कर्म-मायारूपेण त्रिविधादित्यर्थः। तदुक्तं तत्रैव—
मायेय-(१२) माणवं कर्म चैतावदणुबन्धनम्।
एतच्चोक्तं मया सर्वं संसारात्मक-काण्डजम् (१३)॥

अस्माद् बन्धात् अमुं दीक्षैव मोचयति। अत्र दीक्षैवेत्यवधारणं (१४) मतान्तरोक्त-बोधादि-निवृत्यर्थम्। तथाहि—ये (१५) तावत् पशुमत-प्रोक्ता बोधाद्युपायास्ते पाश-व्यञ्जकत्वात् पाश-रूपत्वाच्च न पुरुषार्थ-साधका भवन्ति (१६)। यथा तत्रैव—
पाश-ज्ञानान्न (१७) मुक्तिः स्यात् पशु-ज्ञानात् तथैव च।
सर्वतश्च (१८) यतो मुक्तिः पतिज्ञानेन गम्यते (१९)॥ इति।

पाश-ज्ञानादि-स्वरूपं चिन्त्ये प्रतिपादितम्—
शास्त्रजालानि नादान्तं पाशज्ञानं वरानने!।
पशुज्ञानमिति प्रोक्तं (२०) ह्यहं ब्रह्माभिमानतः॥
शिववस्तुपरं तस्मान्मन्त्रातीतो (२१) निरञ्जनः।
सर्वज्ञः सर्वगः शान्तः सर्वात्मा सर्वतोमुखः॥ इति।

---

Or (१) कलादि ख० (२) ञनभाजि (क) विषयेर्व्या (३) चेश्वरं ज्ञान (४) तच्चावृति० (५) सांशमधिकं (६) न जाचित् (७) विधं संधम (८) उपायं प्रवृत्तः तं (९) नयद्यपि (१०) रोधकत्वात् (११) विस्मृतात्यमल० (१२) मायियामा (१३) संसारात्मनकाण्डज (१४) धारणम० (१५) हि एतावत्पशु० (१६) धकं भवति (१७) ज्ञानानमुक्ति स्या० (१८) सर्वंच (१९) गम्यतीति (२०) प्रोक्ती (२१) मन्त्रातितो

ये अस्मिन् शास्त्रे प्रोक्ता (१) विज्ञान-योगादयस्ते (२) दीक्षाङ्गत्वात् (३) तत्सिद्ध्यर्थं प्रतिपाद्यन्त (४) इत्येतावताऽवधारितम्। तथा श्रीमत्पराख्ये—

ज्ञानादीनामुपायानां दीक्षा कारणमिष्यते।
चतुर्णामङ्गता प्रोक्ता तत्स्वरूप-विभागतः॥

कारणं प्रयोजनमित्यर्थः।

यावन्न तद्गतो भावस्तावत् स्यान्न क्रिया-क्रमः।
अतः क्रियापि तस्याङ्गं पूजा-होमादि-लक्षणा।
भस्मचर्या (५) व्रताद्यापि चर्याऽङ्गत्वमुपागता(क)॥
प्रत्याहारादि-योगोऽपि धारणा(६)-ध्यान-संयुतः।
निर्दग्धे प्राकृते देहे कृते सति ततो भवेत्॥
क्रियायोगः शिवे भावः शिवभावोपबृंहितः।
तस्य तेन तदङ्गत्वाद् दीक्षा (७) सा त्वङ्गिनी भवेत्॥

एषा (८) दीक्षा ऊर्ध्वं सर्वोत्कर्षेण वर्त्तमानमभिव्यनक्तीत्यर्थः। शैवं शिवसम्बन्धि (९) धाम प्रभावः। "धाम* देशे शुभे स्थाने जन्म-प्रभावयो (१०) रपी"ति विश्वः। शिवतुल्यं शिवसमानता-रूपमिति यावत्। तदपि नयति प्रापयतीति। अत्र बुभुक्षुश्चेत् (११) शैवं पदं, मुमुक्षुश्चेत् पश्चवर्तीतं शिव-सायुज्यं च देहान्ते प्राप्नोतीत्यर्थः। अत्र बन्ध-तत्त्वस्थ-(१२) निवृत्त्यादि-भुवनचतुष्टयं योग-बलेन प्राप्ता दीक्षया (१३) नियोजिता वा क्रमेण मूर्ति-केवलि-(१४) योग-केवलि-ज्ञानकेवलि-शक्तिकेवलिनो भवन्ति। तथा मतङ्गे—

योग-वीर्य-बलोपेता दीक्षया वा नियोजिताः।
सदाशिव-समाः सर्वे नचैके कारणेश्वराः॥
न शिवत्वमनुप्राप्तास्तेषां कर्मोच्यते (१५) ऽधुना।
सामीपाः शान्ति-निलया ज्ञान-केवलिनो मताः।
सालोक्याश्चैव विद्यायां येऽप्यधः-परिपिण्डिताः (?-१६)।
योगकेवलिनस्तेऽपि तन्त्रेऽस्मिन् परिभाषिताः (१७)॥
सान्निध्यात् तु (१८) प्रतिष्ठायां शक्तिकेवलिनो मताः (१९)।
काम्याश्चैव निवृत्तिस्था मूर्त्तिकेवलिनः (२०) स्मृताः॥

---

* विश्वप्रकाशे त्वेवम्—"धाम देहे गृहे रश्मौ स्थाने जन्म-प्रभावयोः।"—नविके—१२१

Or (१) प्रोक्तो (२) न योगीद० (३) चाङ्गत्वा तत् (४) च प्रतिपाद्यते (५) हस्मचर्यात् क्रुताद्याविचर्या० (क) गतः (६) धारण० (७) दङ्गत्वा दीचा सान्तौगि० (८) भवेदिति दीचेवेति एष दीचा (९) सम्बन्धी (१०) प्राभावयोर (११) बुभुचश्चे (१२) बन्धतत्वस्थनिवृ० (१३) प्राप्तादिच० (१४) मूर्त्तेकेवलियोगि० (१५) धर्मोच्यते (१६) परिपण्डितः (१७) भाषिता० (१८) सान्निध्यास्तु (१९) मता (२०) केवलिन

तद् यथा—नादाख्ये चैव ये तत्त्वे संस्थिताः परमाणवः ।
मूर्त्तिकेवलिनस्तेऽपि शेषा रुद्राः प्रकीर्त्तिताः ।

सर्वज्ञानोत्तरे केवल-शब्दस्य अर्थ उक्तः । तद् यथा—

कलानां (१) निलयो यस्मात् तेनाऽसौ केवलः (२) स्मृतः । इति ।

अत्र षट्सहस्रिकायां विशेषः प्रदर्शितः—

सपर्या (३) पुत्रकाश्चैव साधकाचार्यकास्तथा (?) ।
सर्वेषां योजना कार्या शक्तितत्त्वे तु पुत्रक ! ॥
मायातत्त्वे तु समधि (४) विद्यातत्त्वे तु पुत्रक ! (?) ।
ईश्वरे साधको भोगे आचार्यः सकले स्थितः ॥
एवं ज्ञात्वा प्रयत्नेन लय-भोगौ प्रकल्पयेत् ।
अज्ञात्वा (५) लय-भोगौ तु यो दीक्षां कुरुते गुरुः ॥
आचार्यः सह शिष्यैस्तु नरके रौरवे पचेत् ।
देशिकस्तु प्रयत्नात् तु ज्ञात्वा दीक्षां समाचरेत् ॥ इति ।

ततः परमनिष्कलं शिवतत्त्वमेव परम् ( ?-६ ) ।
मुक्तिस्थानं भवेदेकं विमलं सर्वतोमुखम् ॥
अचलं व्यापकं शान्तं लिङ्गाश्रम-विवर्जितम् । (७) इति ।

एभ्यः एक (८) परः सूक्ष्म-कार्यकारणगोचरः ।
अतीतः परिपूर्णश्च स्वतन्त्रः सर्वतोमुखः (९) ।
एको निरीश्वरः स्वस्थः (१०) षड्न्ये सेश्वरा मताः ॥ ६८ ॥

अथ मतङ्गसूत्रद्वयेन दीक्षाशब्दार्थं निरूपयति—

## अनयोः शासने सिद्धा दीक्षा क्षपण-दानयोः ।

क्षपणं च दानं च क्षपण-दाने तयोः । क्षपण-शब्देन पशुत्वस्य नाशनम् । दान-शब्देन शिवत्वस्य दानं चोच्यते । अनयोरर्थयोः सिद्धा उत्पन्ना शासनेऽस्मिन् शैवशास्त्रे दीक्षा दीक्षेत्युच्यते । पशूनां पशुत्व-क्षयकरी शिवत्व-दायिका शिवशक्तिरेव (११) दीक्षेत्यर्थः । तथा—

दीयते ज्ञानसद्भावः (१२) क्षीयते च मलत्रयम् ।
दीयते क्षीयते चेति दीक्षाशब्दो (१३) द्विधोच्यते ॥ इति ॥

Or (१) लाना नि० (२) वल स्मृतेति (३) समर्यापु० (४) समधि···पुत्रक (५) अज्ञत्वा (६) परमु० (७) र्जित इ (८) एकपरम सू० (९) तो सुखं (१०) रीश्वरस्वस्थः (११) क्तिरेवं (१२) सद्भावं (१३) शब्दद्वि०

ननु शिवस्य स्वशक्ति-दानेन शक्ति-दारिद्र्यमापद्येत। तत्र ( मातङ्ग-पारमेश्वरे विद्या-पादे ४।५९—६० ) आह—

दानं नाम स्वसत्तैव या (१) सा ज्ञान-क्रियात्मिका ॥ ६९ ॥
सा शक्तिस्तस्य संस्पर्शाद् व्यक्तीभूता (२) सुनिर्मला ।
पत्युर्दानं तदेवोक्तं (३) न स्वयं व्यज्यते पशोः ॥ ७० ॥

ज्ञानक्रियात्मिका ज्ञान-क्रिया-स्वरूपा या स्वस्य सत्ता स्वसत्ता सामर्थ्यं सद्रूपकं सैव दानं देयवस्त्विति (४) नाम प्रसिद्धम्। तथाच आत्मनो विद्यमानायाः (५) सत्ताया एव देयत्वात् स्वशक्ति-व्ययाभावेन (६) न शक्ति-दारिद्र्यं शिवस्येति भावः। तर्हि दानशब्दार्थानुपपत्तिरित्यत आह—सा शक्तिरित्यादि। सा स्वसत्ता-(७) रूपा शक्तिः तस्य परमेश्वरस्य संस्पर्शात् अनुग्राहक-(८) शक्त्या स्पर्शनात् सुनिर्मला अर्ककिरण-योगात् पक्वं पद्ममिव (९) तथा च तत्रैव—

यथार्क-रश्मिसंस्पर्शात् पद्मं (१०) पक्वं भवेत् तथा।

व्यक्तीभूता (११)। तत् अभिव्यञ्जनमेव पत्युः परमेश्वरस्य दानमित्युक्तम्। सकलावरण-निवृत्त्या स्वसत्ताया सर्वज्ञत्वादि-रूपाया एवाऽभिव्यक्तिः। पुंसां परमेश्वरात् शिवत्वस्य अभिव्यक्तिः (क) दानमुपचारादुच्यते, न मुख्यत इत्यर्थः। ननु नर्ते प्रयोजनादिष्टं मुख्यशब्दार्थ-लङ्घनमिति। तत्राह—नेत्यादि। पशोः स्वसत्ता स्वयं स्वात्मना न (१२) व्यज्यते व्यक्ता न भवति। अयं भावः—नहि सत्ता सार्था (१३) सर्वदात्मना स्वयमेव व्यज्यते, आवृतत्वात् कालिकावृत-ताम्रवत्; न तु पुरुषो ज्ञानात् तन्निवर्त्तकः सिद्धः, अपितु सातिशयः; चक्षुर्वैद्य (१४) इवेति। इहापि ईश्वर एव मोक्षकर्त्ता नतु स्वयमेव पुरुष इति। तथा पौष्करे ( वि० १।९४ )—

न मोक्षं (१५) याति पुरुषः स्वसामर्थ्यात् कदाचन।
मुक्त्वा प्रसादं देवस्य शिवस्याऽशिवहारिणः॥ इति॥ ६९—७०॥

शिव-दीक्षया शुद्धावस्थस्यात्मनो दर्शन-प्रकारं देव्यामतसूत्रेण दर्शयति—

अशरीरं यदात्मानं पश्यति ज्ञानचक्षुषा ।
तदा भवति शान्तात्मा सर्वतो विगतस्पृहः ॥ ७१ ॥

यदा यस्मिन् काले ज्ञान-चक्षुषा ज्ञानम् उन्मीलनशक्त्यभिव्यक्त-चैतन्यमेव चक्षुर्नेत्रं (१६)

---

Or (१) स्वसत्तेया (२) व्यक्तिभूता (३) तदेवोक्त (४) न मदेयस्त्विति (५) विद्यामानायाः (६) भावेन शक्ति० (७) स्वसत्तारू० (८) अनुग्राहक (९) पक्वपद्ममिव व्यक्तिभूता। तथा (१०) पद्मं (११) व्यक्तिभूता (क)त्वस्य दानं (१२) स्वात्मना व्य० (१३) सार्थ स (१४) चुवैद्य इवेति (१५) मोक्षेया (१६) चक्षुरने

तेन। अशरीरं शरीरादन्यं शरीरेतरं (१) स्थूलसूक्ष्म-देहान्यम् आत्मानं परप्रकाश-संविन्मात्ररूप-स्वप्रकाशं पश्यति अपरोक्षीकरोति। तदा तस्मिन् काले सर्वतः पृथिव्यादि-शिवान्त-षट्त्रिंशत्-तत्त्वरूप-समस्त-हेयपदार्थेभ्यः विगतस्पृहः विगता निवृत्ता स्पृहा इच्छा यस्य सः तादृशः सन् शान्तात्मा शान्तः अधोमुखत्वादि-कालुष्य-रहित आत्मा (२)तादृशो भवतीति। रागद्वेषादिरहित इत्यर्थः ॥ ७१ ॥

आत्मैक्य-प्रसन्नस्य दर्शनान्तर-मुक्तवत् पुनरावृत्तिर्नास्तीति श्रीन्मतङ्ग-सूत्रेणाह—

दीक्षानलप्लुष्टमलस्य जन्तोः स्वाक्यं बलं व्यक्तिमुपैति योगात्।
शक्त्या विभोश्चुम्बितहृत्प्रदेशो नान्येन पुंसो विनिवृत्तिमेति ॥७२॥

दीक्षानल-(३) प्लुष्टमलस्य दीक्षैव अनलः दीक्षानलः दीक्षारूपेण वह्निना प्लुष्ट दग्धः आत्यन्तिक-निवृत्तिं प्रापितो मलश्चैतन्यावरको यस्य स दीक्षानल-(४) प्लुष्टमलः तादृशस्य जन्तोः आत्मनः स्वाक्यं स्वकीयं बलं (५) दृक्क्रियारूप-सामर्थ्यं योगात् शिवशक्ति-सम्पर्कात्। तदुक्तं मतङ्गे (४।५)—

योगोऽस्य शक्तयः स्वाक्या (६) विस्फुरन्ति समन्ततः। इति।

व्यक्तिं पुनर्व्यक्त्यन्तर-(७) शून्याभिव्यक्तिम् उपैति, विभोः परमेश्वरस्य अनु-ग्राहिकया शक्त्या पुंसः पुरुषस्य (८) चुम्बित-हृत्प्रदेशः (९) स्पर्शितो हृत्प्रदेशः मुक्तचैतन्यम् अन्येन बन्धविशेषेण पुनर्व्यक्तिं पुनरागमनं न· (१०) एति न गच्छति। यथा रसविद्धं ताम्रं हेमत्वमापद्य पुनस्ताम्रतां न याति, तद्वत् अयमात्मापि शिवत्व-(११) मापद्य भूयः पशुत्वं (१२) न प्राप्नोतीत्यर्थः। तदुक्तं स्वच्छन्दे—

रसवह्नि-समायोगात् ताम्रं कालिकया युतम्।
विशोधितं तु तत्त्वज्ञैर्हेमत्वं प्रतिपद्यते ॥
न भूयस्ताम्रतां याति तथात्मा तु कथञ्चन।
गुरुणा तन्त्रविदुषा यस्माद् वै निर्मलः कृतः।
न भूयो मलतां याति शिवत्वं याति निर्मलः ॥

दर्शनान्तरेषु मुक्तानां पुनरावृत्तिरस्त्येव (१३) तत्तत्-प्राप्यस्य तत्त्वातीतत्वाभावात्। तदुक्तं वातुलोत्तरे—

Or (१) शरीरतरं (२) रहितादृशां (३) दीक्षानलाप्लुष्ट० (४) क्षानलाप्लुष्ट
(५) स्वकीयमबलं (६) स्वक्या (७) व्यक्तिवन्तरशून्या० (८) षस्य हृत्प्र०
(९) हृत्प्रदेशः चुम्बित स्प० (१०) ननु ए० (११) शिवतमापद्य (१२) पशुत्वन (१३) वृत्तिरस्येव

त(चि ?)न्मयो(क)ऽन्तर्बहिश्चैव षट्त्रिंशत्-तत्त्वमुक्तियुक् ।
यथार्थतः स देवो हि तत्त्वातीतः परः शिवः ॥

तथा मृगेन्द्रे च—यत् कैवल्यं पुंप्रकृत्योर्विवेकाद् यो वा सर्वं ब्रह्म मत्त्वा (१) विरामः ।
या वा काश्चिन् मुक्तयः (२) पाशजन्या
स्तास्ताः सर्वा भेदमायान्ति सृष्टौ ॥—मृ० २।२८

शैवे सिद्धे (३) भाति मूर्द्धीतरेषां (४) मुक्तः (५) सृष्टौ पुंवरोऽभ्येति नाथः (६) ।
विश्वानर्थान् स्वेन विष्टभ्य धाम्ना
सर्वेशानानीरिताः (७) सर्वदास्ते ॥ इति ॥—मृ० २।२९ ॥ ७२ ॥

इह शास्त्रे पुनरावृत्ति-रहित-मुक्तिरूपं निरूप्य तत्क्रमोपसंहार-पूर्वकं मुक्तात्मनः कारण-पूर्वकापुनर्भवं स्वायम्भुवसूत्रेण निरूपयति। अथवा मुक्तिक्रमोप-(८)संहारपूर्वकं मुक्तस्याऽपुनर्भवं (९) कारणपूर्वं स्वायम्भुवसूत्रेण दर्शयति—

**अनेन क्रम-योगेन परां केवलतां गतः ।**
**अनाद्यशुद्धि-शून्यत्वात् प्राप्नोति न भवान्तरम् ॥ ७३ ॥**

अनेन क्रमयोगेन क्रमेण योगः तेन पूर्वं शिवस्य शक्त्या सह योगः। ततो मल-क्षरणेन फलेन सह योगः। ततो निःश्रेयसादिकमिषधा (१०) योगः। ततो देशिकेन योगः। पुनर्दीक्षया योगः। ततो बन्धविच्छेदेन फलेन योग इति। एवंविधेन क्रमयोगेन पराम् उत्कृष्टां केवलताम् एकाकितां शिवसायुज्य-लक्षणां, पूर्वं केवलावस्थितः (११), केवलता हि एकाकिता, नासौ परा (१२) यतस्तस्यामप्यवस्थायाम आत्मनो द्वितीयो मलोऽस्ति(१३)। शिवसायुज्य-लक्षणा तु परा केवलता। यतस्तस्यां न किञ्चिदपि द्वितीयमस्ति। तां गतः प्राप्तः सन् अनाद्यशुद्धि-शून्यत्वात् अनाद्य-शुद्धिराणवमलः तच्छून्यत्वात् (१४) तद्रहितत्वाद् भवान्तरं जन्मान्तरं न प्राप्नोति। नहि कारणं विना कार्यमुत्पद्यते, सत्यपि कर्मणि पुनर्भवबीजमशुद्धिः (१५) तच्छून्यत्वात् कुतो भवान्तर-प्राप्तिरित्यर्थः।

मायीय(१६)-मलस्यादिमतः प्रलयेऽपि नाशेऽपि पुनर्भवान्तर-हेतुत्वं दृष्टमिति तन्निषेधाय अनादिग्रहणं कृतमिति। रौरवे—

Or (क) समयो (१) ब्रह्ममत्वं वि (२) वा कश्चंडमु० (३) सिद्धा भाति (४) मूर्ध्नि तरे (५) मुक्तिः (६) ऽभ्योति नाथः (७) शानानिशिताः (८) क्रमोपरिसं (९) मुक्तिस्या पुन (१०) यसादिकमिषधा यो० (११) वस्थितकैव० (१२) पराः (१३) यो मन्वोस्ति (१४) तच्छून्यत्वात् (१५) बीजंशुद्धिः (१६) मायेय

यथा प्रदीप्त-ज्वलने तुलराशिः (१) समर्पितः ।
दग्धो निर्वाति स तत्र (२) न भूयः स्थूलतां व्रजेत् ॥
एवं वै मण्डलं प्राप्य दीक्षामन्त्र-समुद्भवम् ।
न पुनर्जन्मतां याति दीक्षितो (३) मनुजोत्तमः ॥ ७३ ॥

इदानीमभिव्यक्तात्म-(४)स्वरूपस्य पुंसः ज्ञानपर्याप्त्यवस्था निश्वासकारिका-सूत्रेण दर्शयति—

**यस्य जाग्रे प्रलीयन्ते सर्वे भावाः सुषुप्तवत् ।**
**पर्याप्तं तस्य विज्ञानं त्रिपदं तेन लङ्घितम् ॥ ७४ ॥**

यस्य पुरुषस्य सर्वे समस्ता (क) भावाः चित्तवृत्तयः सुषुप्तवत् सुषुप्तं सुषुप्तिः भावे क्तप्रत्ययः सुषुप्त्यवस्थायामिव जाग्रे जाग्रदवस्थायां प्रलीयन्ते प्रकर्षेण लयं गच्छन्ति, तस्य पुरुषस्य विज्ञानं विकल्पज्ञानं पर्याप्तं समाप्तं निर्विकल्पक-ज्ञानमुदेतीत्यर्थः (ख)। तेन निर्विकल्पज्ञानयुक्तेन पुंसा त्रिपदमधिकार-भोग-लयाख्यं पदत्रयमपि लङ्घितमतिक्रान्तमिति। तथा सर्वज्ञानोत्तरे—

यस्तु जाग्रदवस्थायां नियम्य सकलेन्द्रियान् ।
तुर्यावस्था-गुणोपेत (५) स्तां विना भावयेत् पुनः (६) ॥
स जीवन्मुक्त इत्युक्तो देहान्ते मुक्त उच्यते । इति ।
तथा—न हृष्यत्युपकारेण नापकारेण तप्यति ।
यः समः (७) सर्वभूतेषु जीवन्मुक्तः स कथ्यते ॥ ७४ ॥

अथ सूत्रान्तरेणाऽसौ शुद्धात्मा शिवसमर्थितया (८) स्वशक्त्यात्मकया दृष्ट्या शिवं ध्यायति पश्यतीत्याह (९)—

**शिवार्क-शक्ति-दीधित्या (१०) समर्थीकृत-चिद्दृशा ।**
**शिवं शक्त्यादिभिः सार्द्धं पश्यत्यात्मा गतावृतिः (११) ॥ ७५ ॥**

गता आवृतिः आविद्यावरणं (१२) यस्य स आत्मा शिवार्क-शक्ति-दीधित्या (१३) शिव एवाऽर्कः तस्य शक्ति-दीधितिः (१४) शक्तिरविद्यातमो-निवर्त्तिका संविच्छक्तिः, सैव दीधितिः (१५) किरणः तया समर्थीकृत-चिद्दृशा समर्थीकृता (१६) शिवदर्शने समर्थतया कृता या

---

Or (१) राशिसम (२) निर्वाति स व न (३, दीचिते (४) व्यक्तात्म। स्वरू० (क) समवस्था (ख) मुदयतौ (५) गुणोपेत तां विना (६) पुनः ॥ यः स (७) यः समसर्वं (८) शिवसमर्थित० (९) तौल्यत श्रा (१०) दिधौत्य। समर्थिक्त० (११) गतावृति (१२) श्राविद्या० (१३) दिधौत्या (१४) दिधितिश० (१५) दिधितिः (१६) समर्थिक्त

चित् सैव दृक् नेत्रं (१) तया, करणे तृतीया। शक्त्यादिभिः शक्तिः इच्छाद्यनेक-शक्ति समष्टि-रूपिणी (२) शिवसमवायि-शक्तिः आदिर्येषां तैः सार्धं सह शिवं परमेश्वरं पश्यति। अपरोक्षीकरोति (३)। तथा ( तत्त्वसंग्रहे—२९ )—

पश्यति शिवं स्वशक्त्या ध्यायति (४) चासौ शिवो(वेद्ध)स्थया (५) दृष्ट्या। इति।

आदि शब्देन शिवशक्त्याऽधिष्ठीयमान(६)चिदचिद्रूपसमूह-तत्तत्-(७) कृत्यपञ्चक-तत्साध्य-भोग-मोक्षादयो गृह्यन्ते। अत एव पातञ्जलाद्युक्तवद् (८) बुद्ध्यादि-विषयत्वं शिवस्य न सम्भवति, तस्य (९) पाशागोचरत्वात्। तदुक्तं तत्त्वसंग्रहे *—

अन्तःकरणवृत्तिर्या बोधाख्या सा (१०) महेश्वरम्।
न प्रकाशयितुं शक्ता पाशत्वान्निगलादिवत् (११)॥

तत्र शिवस्य चिदभिन्न-स्वरूपस्य घटादिवत् कर्मतया न दृश्यत्वं द्रष्टृ-द्रष्टव्ययो-(१२) रात्म-शिवयो विशुद्धचित्-स्वरूपत्वेन (१३) व्यापकत्वेन तथादर्शनासंभवात्। मोक्षकारिका-वृत्तावप्येवमुक्तम् (१४)॥ ७५॥

अथ सूत्रान्तरेण (१५) शिवापरोक्ष-ज्ञानानन्तरं साधनीभूत-परोक्षज्ञान-हेतुभूतं कामिकादि-शिवज्ञानमनपेक्षणीयमित्येतत् सदृष्टान्तमाह—

उल्काहस्तो यथा कश्चिद् द्रव्यमालोक्य तां त्यजेत्।
ज्ञानेन ज्ञेयमालोक्य पश्चाज् ज्ञानं परित्यजेत्॥ ७६॥

उल्का प्रज्वालिताग्र-काष्ठविशेषः। "उल्का(१६) स्यान् निर्गत-ज्वाला" इत्यमरः। स हस्ते यस्य सः कश्चित् पुरुषः यथा द्रव्यं स्वापेक्षित-(१७) पदार्थमालोक्य दृष्ट्वा तामुल्कां (१८) त्यजेत्। तथा ज्ञानेन ज्ञायतेऽनेनेति ज्ञानं कामिकादि-शिवज्ञानं तेन ज्ञेयं स्वपर-प्रकाश-सम्विद्रूपं परशिवरूपं ज्ञेयमालोक्य अपरोक्षीकृत्य पश्चात् अनन्तरं ज्ञानं परोक्ष-ज्ञानसाधनं शास्त्रं परित्यजेत्। सम्भावनायां लिङ्॥ ७६॥

अथ निश्वाससूत्रद्वयेन ज्ञेयस्वरूप-निमग्नतावस्थामाह—

यदा मनः परे तत्त्वे लब्धलक्ष्यं (१९) निलीयते।
तदा ह्यशेष-विज्ञानं विनाशमुपगच्छति॥ ७७॥

* मुद्रिते तत्त्वसंग्रहे श्लोकोऽयं नोपलभ्यते, नैव सम्भाव्यते च। परन्तु मोक्षकारिकायां षड्धिकशत-संख्यकत्वेन श्लोकोऽयमुपलभ्यते।

Or (१) नेत्रमतया (२) समष्टिरू' (३) अपरोक्षिक० (४) ज्ञायति (५) शिवोज्ञया दृ० (६) धिष्ठियमान (७) तत्तित्कृत्य० (८) पादंजला० (९) तस्या पा० (१०) वा महेश्वरम् (११) न्निगलायति (१२) द्रष्टद्रष्टव्य० (१३) रूपं तेन (१४) वप्येत्वमु० (१५) सूत्रेणान्तरेण शिवपरो (१६) उद्गता स्या नि० (१७) व्यं स्वापे० (१८) तामुज्ज्वलाकां (१९) लब्धन्निली०

यदा यस्मिन् काले मनः लब्धलक्ष्यं (१) लब्धं पुनः पुनश्चिन्तनेन स्फुटीकृतं लक्ष्यम् अनाद्युपाधि-रहित-परशिव-तत्त्वं यस्य तत् तादृशं सत् परे (२) सर्वतत्त्वातीते (३) तत्त्वे लयातीत इत्यर्थः। तथा निश्वासे—

लयातीतः परो देवो निरूपाख्यो निरामयः।
ज्ञात्वैवमुच्यते ज्ञानी (४) भुञ्जानो विषयानपि ॥ इति ॥

तस्मिन् निलीयते लयं गच्छति। तदा तस्मिन् काले अशेष-विज्ञानम् अशेषं समस्तं विज्ञानं विकल्पज्ञानं विनाशं लयम् उपगच्छति प्राप्नोति। अत्र (५) मनः-शब्देन चतुर्विध-मनोमध्ये स्वलीनावस्थं (६) मन उच्यते। तथा निश्वासे—

संसृष्टश्च स्वलीनश्च (७) विक्षिप्तो गतिरागतिः।
मनश्चतुर्विधं (८) प्रोक्तं तस्य भेदमिमं (९) शृणु ॥
न मनो नापि मन्तव्यो न मन्ता (१०) च विभाव्यते।
स्वलीनो (११)विषयैर्मुक्त (१२) एकीभूतः सुषुप्तिवत् ॥
विषयान् (१३) गृह्यमाणोऽपि ज्ञेयत्वमधिगच्छति।
न च तैर्युज्यते ज्ञाने (क) संश्लिष्टः स तु उच्यते ॥
अज्ञानाद् गच्छति ज्ञानं ज्ञानादज्ञानमेव च।
चलते यस्य दौर्बल्यात् तस्याऽसौ गतिरागतिः ॥
ज्ञानेन श्लिष्यते (१४) यस्मादिन्द्रियार्थ-परायणः।
त्रिकालमाकुलो (१५) नित्यं स तु विक्षिप्त उच्यते ॥
स्वलीनश्चोत्तमस्तत्र गुणातीतो (१६) निरामयः।
मध्यमः स तु विज्ञेयः संश्लिष्टः सात्त्विकः (१७) स्मृतः ॥
अधमश्चपलः (१८) क्षुद्रो राजसो गतिरागतिः।
तामसः स तु विक्षिप्तश्चतुर्थो ह्यधमाधमः ॥
गुणात्मकः समुद्दिष्टो मलप्रायश्च देहिनाम् (१९)।
निर्गुणं त्वधिकत्वेन यत्र लीनो भविष्यति ॥
मनसश्च स्वलीनस्य (२०) यत् सुखं ह्यात्म-(२१)सात्तिकम्।
योगावस्था परा ह्येषा प्राहुर्योगविदो जनाः ॥

एतद्विषयो (२२) निश्वासकारिकायां प्रपञ्चितः (२३), तत्रावधार्यताम् ॥७७॥

---

Or (१) लक्ष्यं सत् ल० (२) वरं (३) र्वतत्वाते (४) ज्ञानि (५) तवा मनश० (६) स्वलिना-वस्थ मन (७) स्वलिन० (८) तुर्विध प्रो० (९) भेदमिदं (१०) नमन्वा (११) स्वलिनो (१२) येर्मुक्तो (१३) विषयाग्टह्ममानोपि (क) ज्ञानं (१४) श्लिष्यते (१५) माकुले (१६) गुणातीते (१७) सात्त्विकस्स्मृ० (१८) पलश्च० (१९) मन्वप्रायश्चदेसुनां (२०) सुनीलस्य (२१) भ्यात्मसा० (२२) विषयनि० (२३) प्रपञ्चितं

अनेन शिवसायुज्यं प्राप्नोतीति सूत्रान्तरेण कथयति—

**अनाख्ये तु निरालम्बे अग्राह्ये मानवर्जिते ।**
**निस्तत्त्वे योजितो (१) मुक्त इति शास्त्रस्य (२) निश्चयः ॥७८॥**

अनाख्ये आख्याः शक्त्योद्युक्तादि-नामानि (३) तद्रहिते निरालम्बे नाद-बिन्दु(४)-व्योम-मन्त्राद्याधार-रहिते अग्राह्ये बुद्ध्यादिकरणै(५)-रशक्य-ग्रहणे। निरालम्बे अग्राह्ये इति प्रकृतिभावश्छान्दसः। मानवर्जिते संश्लिष्टादिरहिते गुणत्रयानात्मके (६) निस्तत्त्वे सर्वतत्त्वातीते परतत्त्वे योजितः। अत्र योगार्थो युजिधातु र्गृह्यते (७), न तु युजि समाधाविति समाध्यर्थः। तथाच प्रसिद्धं साजुज्यमात्मलाभरूपं प्रापित इत्यर्थः। यथा सुप्रभेदे—

शिवे संयोजितं रूपं सायुज्यमिति कथ्यते ।

एवम्भूतसायुज्यं प्राप्तः (८) मुक्त इति शास्त्रस्य शिवागमस्य निश्चयः सिद्धान्तः। अत्र सायुज्य-शब्देन शिव-सादृश्यमुच्यते। नतु तादात्म्यादि-सम्बन्धः। तदुक्तं चिन्त्ये—

अन्यथा बहुमुक्त्युक्तिः (९) शास्त्रे चैव (१०) वरानने ! ।
शिवत्वसुलभा (११) मुक्तिरिदानीं कथ्यते मया ॥ इति ।

तथोक्तमभियुक्तैरपि—नात्मच्छेदोऽपवर्गो न च पशु-शिवयोरैक्यमत्राऽपवर्गो
नाविद्या-ग्रास-हानिर्नच गुणविलयो नापि पाषाणमुक्तिः (१२) ।
यद् बोधानन्दरूपं त्रिमलविगमने व्यक्तमात्मस्वरूपं
तत् सायुज्येन वाच्यं शिवसदृशविभोश्चैष (क) तन्त्रापवर्गः ॥

देवीकालोत्तरे—निद्राया बोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः ।
पक्षद्वय-परित्यागे संप्राप्ते नैव चालयेत् ॥
निराश्रयं सदा चित्तं सर्वालम्बन-वर्जितम् ।
मनोऽवस्था-विनिर्मुक्तं विज्ञानं मुक्तिलक्षणम् ॥ इति ॥ ७८ ॥

इदानीमात्मलाभरूपं प्राप्तस्याऽस्य अवस्थानं स्वायम्भुवसूत्रेण दर्शयति—

**भवोद्भव-पदातीतो निष्कम्पार्चिरिव स्थितः ।**
**मुक्तो व्यक्त-शिवत्वोऽसौ कृतकृत्यो यतस्ततः (१३) ॥ ७९ ॥**

[ यतः यस्मात् कारणात् असौ कृतकृत्यः शिवसायुज्यं प्राप्तस्ततः ] तस्मात् कारणाद् भवोद्भव-पदातीतः सन् भवः संसारः तस्मिन् उद्भवपदानि जन्म-

---

Or (१) विस्तत्वे योज्यता: (२) शास्त्रस्य नि० (३) ख्याशक्त्युक्तादिना (४) नादबन्धुर्थ्यो० (५) दिकारणै (६) दिगुणत्रयात्मक नि० (७) धातुग्र० (८) प्राप्तं (९) मुक्तोक्तिश्च (१०) स्त्रे चव (११) त्वतुलभे मुक्तिमिदानीं (१२) पाषाणु (क) विभुश्चैव (१३) यतस्तत: तस्मात

स्थानानि यद्वा भवपदं भवतीति भवोऽहं-(१) पदं सकल-प्रलयाकल-विज्ञानाकलानां पदम्, उद्भवपदं तस्मादूर्ध्वं भवतीति उद्भवपदम् अनन्तादिपदं तदतीतः (२) अतिक्रम्य वर्त्तमानः सन् निष्कम्पार्चिरिव निष्कम्पः (३) कम्परहित (४) अर्चिरिव ज्वालेव स्थितः। अथवा अपरमोत्तस्य षट् पदानि सन्ति भवोद्भवपदं शान्त्यतीतं शान्तितत्त्वं नादाख्यमैशं विद्याख्यमिति। तत्र सर्वोत्तरं षष्ठं भवोद्भवपदम् अतिक्रम्य वर्त्तमानो यः (५), सः प्रदीपार्चिरिव तिष्ठतीत्यर्थः। तदुक्तं शिवतत्त्व-विलासे—

भवोद्भवपदं (६) त्वेकं शान्त्यातीत (७) मतःपरम्।
शान्तितत्त्वं च नादाख्यमैशं विद्याख्यमेव च॥
उदाहृतानि (८) मुक्तानां पदान्येवं क्रमेण षट्।

एतत् सर्वं (९) सद्योज्योतिष्टीकायां (क) प्रपञ्चितम्, तत्राऽवधार्यताम्॥ ७९॥

अथ देवीकालोत्तरसूत्रेण कृतकृत्यस्य नित्यादि(१०)-कृत्यान्तरं नास्तीति निरूपयति—

नात्र पूजा नमस्कारो न जपो ध्यानमेव च।
केवलं ज्ञेयमित्युक्तं वेदितव्यं न किञ्चन॥ ८०॥

अत्र जीवन्मुक्त-दशायां पूजा अर्चना न, नमस्कारः सत्कारश्च न (११), जपोऽपि न, ध्यानं (क) चिन्तनं न। अतः (१२) किमस्ति नित्य-नैमित्तिकादि, अत आह—केवलं ज्ञेयमिति उक्तम्। ज्ञेयमिति (१३) ज्ञेयभावमात्रावस्था नेति (१४) सूचितम्। वेदितव्यं ज्ञातव्यं किंचन किमपि न नास्तीति (१५)। तथा न बाह्येषु (१६) कर्मसु प्रीतिं बध्नातीत्यर्थः। तथा—

नियमोऽपि न तस्याऽस्ति नोपवासो विधीयते।
प्रवृत्तिश्च निवृत्तिश्च ब्रह्मचर्य-व्रतानि च॥

तत्रैवाचारप्रकरणे—न ध्यानं न जपः (१७) पूजा न होमो नैव साधनम्।
अग्निकार्याधिकारश्च (१८) नैतस्याऽस्ति महेश्वर!॥ इति॥ ८०॥

एवं जीवन्मुक्तो (१९) वासनावशेन (२०) विषयज्ञानयुक्तोऽपि शिवशक्त्या स्वरूप-ज्ञाननिष्ठ एव भवतीति निश्वासकारिकासूत्रेणाह—

यथा वायुः सुशीघ्रोऽपि मुक्त्वाकाशं न गच्छति।
ज्ञेये निक्षिप्तचित्तस्तु विषयस्थो न मुञ्चति॥ ८१॥

---

Or (१) भवानहं पदं (२) तदितः (३) निष्कम्प कंप (४) रहितमर्चि० (५) वर्त्तमाना य सः (६) पदत्वेकं (७) शान्त्यादितम० (८) दाहृतादिमु० (९) सर्वं सद्यो० (क) तिष्टिका (१०) नित्यत्वादि (११) र्चना न सत्काराश्च (क) न, चिन्तनं (१२) न्तनं न। अन। कि० (१३) ज्ञेयमिति उक्तांशे (१४) नमिति (१५) न्नास्तीति (१६) बह्येषु (१७) न जपं (१८) धिकारं च (१९) एव शिवन्मुक्तो (२०) वासनावशेवि०

वायुः सुशीघ्रः अत्यन्तशीघ्र-गमनोऽपि यथा आकाशं परिपूर्णं व्योम मुक्त्वा विसृज्य न गच्छति न सञ्चरति। तथा (१) ज्ञेये शिवे निक्षिप्तचित्तः (२) निक्षिप्तम् अवस्थापितं चित्तं चैतन्यं (३) यस्य सः तादृशस्तु पुमान् विषयस्थः विषये तिष्ठतीति (४) विषयस्थः (५) तादृशोऽपि न मुञ्चति ज्ञेयं न त्यजति। तत्रैव—

भुङ्क्ते तु विषयान् सर्वानसौ लेप्यस्यालेपकः (६)।
यस्य सर्वगतो भावो शंभावस्थो (७) निरन्तरः॥ इति।

अयं साक्षात्कृत-शिवस्वरूपतया तज्ज्ञानात्मकम् (८) अमृतं सर्वदाऽनुभवतीत्यर्थः। तथा सर्वज्ञानोत्तरे—

शिवज्ञानामृतं पीत्वा विचरस्व यथासुखम्॥ इति॥ ८१॥

अथ (९)सूत्रान्तरेण अस्याध्व-(१०) दर्शितत्वमेव स्वभाव इति दृष्टान्तपूर्वमाह *—

इन्द्रियार्थे यथा चित्तं (११) नित्यं गच्छति देहिनाम्।
तथा चैवेन्द्रियातीते तस्य नैराकृते (१२) पदे॥ ८२॥

देहिनां शरीरिणां (१३) चित्तं मनः इन्द्रियार्थे (१४) इन्द्रियविषये यथा नित्यं शश्वत् गच्छति प्रवर्त्तते, तथा तस्य जीवन्मुक्तस्य चिच्छक्तिश्च (१५) इन्द्रियातीते इन्द्रियागोचरे नैराकृते पदे स्थान एव गच्छति। अयं भावः—पुरुषस्य चित्तम् इन्द्रियार्थे विषये यथा निराबाधं प्रतिक्षणं वर्त्तते, मनसो (१६) निश्चलत्वं तु सर्वज्ञेयाभ्यासे (१७) न भवति (क) तद्वद् जीवन्मुक्तचित्तमपि अतीन्द्रिये निर्मले केवले सदा प्राप्नोतीत्यर्थः॥ ८२॥

क्षीरक्षयाद् यथा वत्सः स्तनान्मातुर्निवर्त्तते।
रागक्षयात् तथा पुंसां मनः शीघ्रं निवर्त्तते॥ ८३॥

मातुः स्तन्यं यावत् तावत् वत्सस्तत्-(१८) स्तन्यं स्वीकरोति तत्क्षये सति यथा निवर्त्तते(१९), तद्वन्मनोऽपि निवर्तत (२०) इति। तथा तत्रैव—

---

* अत्र 'दृष्टान्तपूर्वमाहे'त्यनन्तरं—'इन्द्रियार्थ' इत्यादि-'न भवत्य'न्तः पाठस्ततः 'मातुः स्तन्य' मित्यादि-'किं करिष्यत्य'न्तः पाठस्ततः 'चौरचयादि'त्यादि-नैराकृते पदे इत्यन्तः पाठस्ततो देहिनां विरागीणमिति पाठो दृश्यते। टीकानुरोधेन प्रकृतोपयोगित्वेन चात्र परिवर्त्तनं कृतमिति मन्तव्यम्।

---

Or (१) यथा (२) शिवे चिप्त (३) तच्चित्तचैत० (४) तिष्ठति (५) यस्थता० (६) न्सर्वान्नसौलिप्या-स्यालेप० (७) वो जैभावस्थी (८) नात्मकमृतं (९) अत्र (१०) रेणास्याध्यदर्शि (११) चित्र (१२) निराकृते (१३) विरागीणां (१४) नः इन्द्रि (१५) चिच्छक्तिश्च (क) वर्त्तते तद्वत् (१६) मनसा (१७) सर्वज्ञेयाभ्यासो (१८) मातुस्तन्ययवत्तावत् यस्तत् स्तन्यं स्वीकृत्यं (१९) निवर्त्तिते त (२०) निवर्त्त इति

कायानुबन्ध-चलने (१) नासौ चलति निश्चलः ।
यस्य ज्ञेयमिदं सर्वं मनस्तस्य (२) सुनिश्चलम् ॥
एवं यो निर्जितो (३) धीरैः स त्वा (४) किं करिष्यति ॥ ८३ ॥

तादृक्-पदावस्थितस्य पुरुषस्य काल-महिमानौ निरूपयति । अथवा सूत्रान्तरेण-(तीत) सर्वाध्वस्थानस्थानस्य (५) कालं च महिमानं च दर्शयति—

**गोदोहमिषुपातं वा नयनोन्मीलनमात्रकम् ।**
**सकृत् परपदे युक्तो (६) न पुनर्भवमाप्नुयात् ॥ ८४ ॥**

गोदोहः गौर्यावता कालेन दुह्यते, सोऽयं कालो गोदोहः तन्मात्रं (७) वा ; नयनोन्मीलनमात्रकं नयनस्य चक्षुषः उन्मीलन-कालमात्रकं वा । "कालाध्वनोरत्यन्त-(८) संयोगे द्वितीये"ति द्वितीया विभक्तिर्भवति । सकृत् कदाचित् परपदे सर्वाध्वातीते (९) निरुपाधिके शिवपदे युक्तः योजितः कृत-समाधिकः पुनर्भवं(१०) पुनर्जन्म नाप्नुयात् (११) न प्रयायादिति ॥ ८४ ॥

अथ सूत्रान्तरेण तस्य शिवत्वसदृश-(१२) स्वकीय-शिवत्वावाप्तिरेव प्राप्तिः । न चाद्वैतवादवत् तदैक्यम्, इन्द्रादि-प्राप्तिवत् तद्देश-गमनं वेति प्रतिपादयति—

**पशुभावाद् (१३) यदातीत्य पतिभावेन तिष्ठति ।**
**तत् तस्य गमनं नाम सर्वगे गमनं कुतः ॥ ८५ ॥**

यदा यस्मिन् काले पशुभावात् पशुत्वात् अतीत्य अतिक्रम्य पतिभावेन शिवभावेन तिष्ठति वर्त्तते । तदा तस्य मुक्तस्य तत्पतित्वेन वर्तनं गमनं नाम प्रसिद्धम् । तदुक्तं स्वायम्भुवे— दग्ध-संसार-बीजस्य या पुंसः पश्चिमार्थतः ।
सा गतिस्तस्य विज्ञेया न देशान्तर-संस्थितिः ॥
पूर्वावस्थान्तरव्यक्तौ (१४) सत्यां लोके गतं यथा ।
प्रोच्यते पटवर्णादि वस्तु तद्वत् पुमानपि ॥ इति ।

अत्र गमन-शब्दस्य मुख्यार्थो न घटत इत्याह—सर्वगे व्यापके वस्तुनि गमनं कुतः ? आत्म-शिवयोरुभयोरपि व्यापकत्वात् अनयोः प्राप्य-प्रापकभावो न घटत इत्यर्थः । अयं भावः—आत्मनः शिवत्वप्राप्तिः (१५) शिवेन संयोगो वा तादात्म्यं वा ॥ ८५ ॥

---

Or (१) चलते (२) मनस्त्वस्यंस्य (३) योनिर्जितो धी (४) सत्वा (५) रणासमाध्वस्थानस्थानस्य (६) युक्ते (७) दोहः तं मात्रं नयनोन्मीलनमात्रकं सकृत् परपदे युक्तो न पुनर्भव-माप्नुयादिति ॥ गोदोहः गौर्यावता कालेन दुह्यते सोऽयं कालो गोदोहः तन्मात्रं (८) ध्वनोर्यत्यन्त (९) सर्वध्वातीते निरूपा (१०) नर्भवः (११) माप्नुयात् (१२) शिवस० (१३) शुभावादा (१४) धर्वा धवन्तिख्यक्तौ सत्यां (१५) त्वप्राप्त;

अथ स्वायम्भुवसूत्रेण भोक्तृत्वादिकमपि (क) तस्य नास्तीत्याह (ख)—

**शिवधामार्पितस्याऽस्य (१) भोगभोक्तुर्न जातुचित् ।**

**भोक्तृत्वमधिकारित्वं (२) पतिकृत्यानुकारिता ॥ ८६ ॥**

शिवधामार्पितस्य शिवस्य धाम तत्समत्वम् अर्पितम् अभिव्यञ्जितम् (३) अस्येति शिवधामार्पितः तादृशस्य भोगभोक्तुः अस्य पुरुषस्य जातुचित् कदाचिदपि न भोक्तृत्वं भोगक्रियाकर्त्तृत्वं यत् सकलस्य दृष्टं तद् नास्ति। अधिकारित्वं मायागर्भाधिकारित्वं यत् प्रलयाकलस्य दृष्टं, तदपि नास्ति, पतिकृत्यानुकारिता पतिकृत्यात् अनु पश्चात् कारित्वम् अनुकारिता। इदं कुर्विति (४) पत्युरिच्छामात्र-प्रवृत्ते सति ये प्रवर्त्तन्ते, ते पतिकृत्यानुकारिणः तेषां भावः पतिकृत्यानुकारिता, पतीच्छा-प्रणिहित-व्यवहारित्वमिति यावत्। साऽपि सकल-प्रलयाकल-विज्ञानकलेषु त्रिष्वपि दृष्टा पतिकृत्यानुकारिता (५) तस्य नास्ति। तस्य स्वतन्त्रत्वेन परप्रेर्यत्वं (६) नास्तीत्यर्थः। एवं सर्वज्ञानोत्तरे—

शिववच्छाश्वतः शुद्धः (७) सृष्टिधर्म-विवर्जितः ॥
सत्यं सत्यं पुनः सत्यं त्रिसत्यं समयः कृतः ।
अतः परतरं नास्ति विज्ञेयं कुत्रचिद् गुह ! ॥ ८६ ॥

अथ किरणसूत्रेण तदवस्थायामपि मलस्यावस्थानमानुमानिकं (८) सदृष्टान्तमाह—

**विषसम्बन्धिनी शक्तिर्यथा मन्त्रैर्निरुध्यते ।**

**तदा (९) न तद्विषं (१०) क्षीणमेवं पुंसो मलक्षयः ॥८७॥**

विषसम्बन्धिनी विषस्य सम्बन्धिनी या (११) शक्तिः मोहमरणादि-कार्यजनिका शक्तिः, सा (१२) यथा मन्त्रैः गारुडादिभिर्मन्त्रैर्निरुध्यते (क) निरोधं तत्कार्य-प्रवृत्तिविघातं (१३) नीयते। तद्विषं च तदा तस्मिन् काले न क्षीणं वर्णाकृत्यादि-स्वरूप-निरोधरूपं क्षयं न प्राप्तम्, एवं एतेन प्रकारेण पुंसः दीक्षया शुद्धस्यात्मनः मलक्षयः स्वसहभाविनो मलस्य क्षयः तदा कारकत्व-शक्तेः कार्य-प्रवृत्ति-विघात एव क्षयः। न स्वरूपतो मलस्य क्षय इत्यर्थः।

अत्रेदं विचार्यते—दीक्षादिभिरुपायैः (१४) किं मलस्य विश्लेषः क्रियते? अथ (१५) विनाशः? अथ तिरोभावो वा? नाद्यः। तयोर्मलात्मनोः सम्बन्धस्याऽनादित्वेन विश्लेषायोगात्। अपि च प्राप्ति-पूर्वको विभागः। नच प्राप्तिर्मलात्मनोरस्ति, द्वयोरपि

---

Or (क) भोक्तत्वा (ख) कीत्यत आ (१) र्पिततस्यास्य (२) धिकारित्वपति॰ (३) व्यञ्जतम (४) इदं कुर्वति (५) कारितां त (६) प्रेर्यं च (७) शुद्ध स्र (८) मानुमानिकः (९) तथा (१०) विषः (११) साश॰ (१२) शक्तिः यथा (क) ध्यते। तत्कार्यं॰ (१३) तं निरौधं नौ॰ (१४) दीक्षाभौरु (१५) मत वि॰

विभुत्वेन तदयोगात्। नहि यद् व्यापकं वस्तु तद् विविच्यमानं दृष्टम् (१), विभागोऽपि वा जायमानोऽन्यतरादि-कर्मनिमित्ताद् भवति। कर्म चोपजायमानं परिमित-परिमाण-सम्बन्धवति (२) द्रव्ये भवति। विभुद्रव्ये तदभावान्न तयोर्विश्लेष इति।

अथ विनाशः ? सोऽप्यनुपपन्नः, सहजस्य मलस्य (क) प्रक्षये आत्मनोऽपि तद्धर्मिणो विनाश-प्रसंगात्। धर्मधर्मिणोरनन्यत्वात्। अपिच सकल-पुद्गल-(३) बलावरोधको मलोऽयमभ्युपगम्यते। यद्यस्योच्छेदः (४) स्यात्, तदाऽस्य सकल-पुद्गल-साधारणत्वादेकस्य (ख) पुरुषस्याऽनुग्रहे सर्वप्राणिव्रातो (५) विमलः स्यात्। तस्माद् विनाशोऽपि न युज्यते।

अथ तिरोभावः ? सोऽपि न युज्यते। यस्याऽर्थस्य तिरोभावो भवति, तस्याऽवश्यं पुनराविर्भावोऽपि (६) कालान्तरेऽभ्युपगन्तव्यः, अन्यथाऽसौ तिरोहित इत्येव न शक्यते वक्तुम्। ततः को दोष इति चेत् ? अत्यन्तमुक्तः संसारीति (७) च व्यवहारसिद्धि-(८) प्रसंगात्। तस्मात् तिरोभावोऽपि न युज्यते। नचान्या गतिरस्ति। तस्मात् अनेक-दोषापत्तेः कथमस्य मलस्याऽपायभाव (९) इति।

अत्रोच्यते—सत्यम्, अस्मिन् शास्त्रे दीक्षादिभिरुपायैर्व्यापकस्य (१०) मलस्य विभागो वा विनाशो वा तिरोभावो वा नाभ्युपगम्यते। अपि तु यथा अग्नेरुष्णस्पर्शस्य दाहिका-शक्तिर्मन्त्रेण निरुध्यते। तथा मलस्यापि व्यापारिका शक्तिरुपायैर्निरुध्यते। यथा च लोके स्तम्भितशक्ति(११)रग्निः स्तम्भितो निगद्यते। तद्वत् मल-शक्तिवियोगात् स मलो वियुक्त इति उपचारेणाऽभिधीयते। तदुक्तमत्रैव—विभुरपि यथाग्निर्दाहकार्ये (१२) सकल-पुद्गल-साधारणस्तथापि तच्छक्त्योऽनन्ता इत्युक्तम्। तथाच यस्य पुरुषस्य प्रसन्नो गुरुः तस्याग्नेर्दाहिकां शक्तिं सन्निरुद्ध्य (१३) हिमशीतलमग्निं करोति। इतरेषां च स (१४) वह्निर-प्रतिबन्धत्वाद् दाहलक्षणं कार्यं करोत्येव। तथा मलोऽपि, यस्य तच्छक्तिः प्रतिबद्धा (ग) तस्य संसारं न (१५) प्रतनोति ; अन्येषां भवो भवत्येव प्रतिबन्धाभावात्। तस्मान्नायं दोषः।

यदन्यत् सहज(घ)मलक्षये आत्मनो विनाशः (१६) स्यादिति दूषणमुक्तम्। तदपि न। धर्म-विनाशेऽपि धर्मिणो (१७) विनाशाभावात्। कुत्रैतद् दृष्टमिति चेत् ? उच्यते। यथा ताम्र-(१८) सहभाविनी कालिका अम्लसंस्पर्शात् क्षयमुपयाति, न ताम्रं क्षीयते ; किन्तु अवस्थितस्य तस्यैव गुणान्तरं प्रादुर्भवति। (१९) स्थितस्यैव धर्मान्तरं भवति।

---

Or (१) विविच्यमान पुष्टं (२) मायासम्बन्धानि (क) मलप्र० (३) कलदुद्गला (४) स्योच्छेद स्यात् तदस्य (ख) त्वादिकस्य (५) प्राणिभूतो वि० (६) विर्भवोऽपि (७) मुक्तसंसारिति (८) सिधिप्र० (९) स्य पायभाव (१०) पकस्यमलस्याः भागी वि० (११) लोकेशक्तिरग्निस्त० (१२) दाहका दर्थ्ये की या मलसक० (१३) सन्निरुद्धां (१४) स्ववह्नि० (ग) प्रतिबन्धाः (१५) सारं प्र (१६) विनाशस्यादि० (घ) सहम० (१७) धर्मिणा (१८) ताम्र० (१९) ति। ननु स्थि०

नतु विनष्टस्य। तस्मात् ताम्रकालिका-क्षयवद् अस्यापि पुंसो मलक्षय इत्यत्रापि नानुपपत्तिः। उक्तमत्रैव—

सहजा कालिका ताम्रे तत्क्षये (१) न च तत्क्षयः।
जायते तद्वदस्य स्यात् पुरुषस्य मलक्षयः॥ इति॥ ८७॥

सहजमलक्षयमुक्त्वा कर्मक्षयं सूत्रान्तरेण दर्शयति—

## अनेकभविकं कर्म दग्धं (क) बीजमिवाऽणुभिः।
## भविष्यदपि संरुद्धं (२) येनेदं तद्धि भोगतः॥ ८८॥

अनेकेषु भवेषु जन्मसु अर्जितं (३) सञ्चितमनेकभविकं तत् संचितं कर्म (ख) अणुभिर्मन्त्रैर्बीजमिव दग्धं, यथा वह्निदग्धं बीजमुपहत-सामर्थ्यं सत् अङ्कुरदानाय न भवति। यथा सुप्रभेदे—

अग्निदग्धानि बीजानि न प्ररोहन्ति भूतले। इति।

तथा मन्त्रोपहत-शक्तिकं कर्म फलदानाय न भवतीत्यर्थः। भविष्यत् आगामि कर्माऽपि संरुद्धं सम्यक् मन्त्रशक्त्या रुद्धं प्रतिबद्धम्। ननु तस्याऽनुत्पन्नत्वात् कथं प्रतिबन्ध इति। नैतत् सत्यम्। अनुत्पाद (४) एवाऽस्य प्रतिबन्धः। यत् तस्योत्पादकं सहकारि कर्मान्तरं, तद् (५) दग्धबीजमिवेत्युक्तम् (ग)। अतः प्रतिबद्धत्वादागामि-कर्मणोऽनुत्पाद इत्यर्थः। येन कर्मणा पुनः इदं शरीरं निष्पादितमिति शेषः। तत् प्रारब्ध-कर्म भोगतः उपभोगादेवोपरममुपयाति (६), नान्यथा। सुप्रभेदे—

शरीरारब्ध-कर्माणि भुज्यन्ते स्वयमेव तु। इति।

तथा प्रारब्धकर्म-व्यतिरिक्त-कर्मणामेव दीक्षया निरोधः इत्यर्थः। एतच्च प्रारब्धं त्रिविधम्—इच्छाप्रारब्धम् अनिच्छाप्ररब्धं परेच्छाप्रारब्धमिति। तथा—

इच्छाऽनिच्छा परेच्छा च प्रारब्धं त्रिविधं स्मृतम्।
अपथ्यसेविनश्चौरा राज-(७) दार-रता अपि।
जानन्त एव स्वानर्थ(८) मिच्छन्त्यारब्धकर्मतः। (पञ्चदशी ७-१५२।१५३)

इदमिच्छाप्रारब्धम्।

स्वभावजेन कौन्तेय! निबद्धः स्वेन कर्मणा।
कर्तुं नेच्छसि यन्मोहात् (९) करिष्यस्यवशोऽपि तत्॥ (भगवद्गीता—१८।६०)

इदमनिच्छाप्रारब्धम्।

---

Or (१) तत्क्षया नच (क) दग्धबीज (२) संरुद्ध येने (३) आर्जितं (ख) तम् अणु (४) अनुत्पाद (५) तदग्ध० (ग) बीजमित्यु (६) वोपरमुप० (७) जारां दाररता (८) जानंत्यविस्वानर्थ (९) तं मोहात् करिष्यसि वशोऽपि तत्।

नानिच्छन्तो न चेच्छन्तः (१) परदाक्षिण्य-संयुताः (२) ।
सुखदुःखे भजन्त्येतत् परेच्छापूर्वकर्म हि (३) ॥ ( पञ्चदशी—७।१६२ )

इदं परेच्छाप्रारब्धम् ॥८८॥

ननु अशेषपाश-विनाशिका दीक्षा अभ्युपगता, तया च स्वसत्ताभिव्यक्तौ (४) जातायां तस्मिन्नेव काले शरीरस्य पातः प्राप्नोति । तदुक्तमत्रैव—

अशेषपाश-विश्लेषो (५) यदि देवस्य (६) दीक्षया ।
जातायामर्थनिष्पत्तौ कथं स्याद् वपुषः (७) स्थितिः ॥

इत्याशङ्क्य तां सूत्रान्तरेण निरस्यति—

**जातायां घटनिष्पत्तौ यथा चक्रं (८) भ्रमत्यपि ।**
**पूर्वसंस्कार-संसिद्धं तथा वपुरिदं स्मृतम् ॥ ८९ ॥**

घटस्य निष्पत्तिरभिव्यक्तिः, तस्यां (९) जातायाम् उत्पन्नायामपि यथा चक्रं भ्रमति भ्रमणं भजते । तथा इदं दृश्यमानं वपुः आत्मनः (१०) शरीरं पूर्वसंस्कार-संसिद्धं पूर्व-संस्कारेण धर्माधर्मलक्षण-कारणजन्य-संस्कार-विशेषेण संसिद्धं धृतं सत् स्थितं तिष्ठति ।

अयमर्थः—घटफलाभिव्यक्तये तावत् कुम्भकारश्चक्रं भ्रामयेत्, घट-निष्पत्तौ जातायामपि पूर्ववद् यथा तच्चक्रं भ्रमत्येव । पूर्वसंस्कारानुविद्धमिदं शरीरम् अर्थनिष्पत्तौ जातायामात्मवदवतिष्ठते (११) ।

ननु वेगात् तत्र चक्रे भ्रमणक्रिया भवति, (१२) तच्च निष्पन्नेऽपि फले युज्यते । एवं शरीरे पुनर्न किंचिदन्यनिमित्तं विद्यते । येन तस्याऽवस्थानं स्यादिति । मैवम् । अशेष-कर्म-प्रक्षयोऽत्र मया नाऽभ्युपगम्यते । यथा अवस्थित-वेगाख्य-संस्काराद् भ्रमणं कार्यं च भवति । तथा धर्माधर्म-लक्षणात् कारणात् साधारण-लक्षण-संस्कारविशेषो भवति । तस्मात् संस्कार-विशेषादिदं शरीरमवतिष्ठत इति । तथा सुप्रभेदे—

हिङ्ग-त्यक्ते तु तत्पात्रे गन्ध (१३) स्तत्र न नश्यति ।
कुलालचक्रं कर्मान्ते यथा भ्रमति वै तथा ॥ इति ॥ ८९ ॥

अथ देव्या (१४) मतसूत्रेण जीवन्मुक्तस्य देहावसानस्थितिं दर्शयति—

**भग्ने घटे यथा दीपः सर्वतः (१५) संप्रकाशते ।**
**देहपाते तथा चात्मा भाति सर्वत्र सर्वदा ॥ ९० ॥**

---

Or (१) नवेच्छ० (२) स्वसंमतः (३) पूर्वकं तु तत् (४) भिव्यक्ता (५) निश्लेषो (६) देवस्य दीक्षाया (७) वपुषस्थिति० (८) चक्रभ्रम० (९) तस्या जा० (१०) आत्मानं (११) त्मवदतिष्ठ० (१२) भ्रमन्ति तच्च (१३) गन्धं तत्र (१४) देव्या मतङ्ग (१५) पः अन्तरं संप्र

यथा दीपः भग्ने घटे सति भिन्ने (१) सति सर्वतः सर्वासु दिक्षु संप्रकाशते सम्यक् प्रकाशते, संकोचं विहाय सर्वत्र स्वतः-(२) प्रकाशो भवतीत्यर्थः। (३) तथा आत्मा मुक्तात्मा च (४) देहपाते देहान्ते देहस्य चैतन्य-संकोचक-शरीरस्य नाशे सति सर्वत्र सर्वदेशे सर्वदा सर्वकाले भाति प्रकाशते। देशतश्च कालतश्च अपरिच्छिन्न-प्रकाशो भवतीत्यर्थः। तथा सुप्रभेदे—

घटगुप्तो यथा दीपो घटनाशे तु दीप्यते।
घटागुप्तो (५) यथा भानु (६) र्मुक्तौ चापि तथा भवेत्॥
स्वभावज्ञानतो मुक्तिः (७) स जीवन्मुक्त एव हि।
देहनाशे परा व्याप्तिर्घटनाशे तु दीपवत्॥ इति॥ ९०॥

इत्थं (८) पति-पशु-पाश-स्वरूप-निरूपण-द्वारेण आत्मनः केवलशुद्धावस्थात्रयं प्रतिपाद्य (क) अस्य ज्ञानशास्त्रस्याऽधिकार्यनधिकारि-विवेकं निश्वासकारिकया (ख) प्रदर्शयति—

**प्रकटयस्वेदं ज्ञानं मद्भक्तानां वरानने!।**
**रक्षणीयं प्रयत्नेन तस्करेभ्यो धनं (९) यथा॥ ९१॥**

## इति उमापतिशिवाचार्य-संगृहीत-
## शतरत्नसंग्रहः समाप्तः

हे वरानने! देवीसंबोधनमेतत्। इदं ज्ञानं ज्ञायन्ते पत्यादयोऽनेनेति ज्ञानं शास्त्रम्। तथाच वायव्ये—

ज्ञानं वस्तु (१०) परिच्छेदो वस्तु च त्रिविधं स्मृतम् (११)। इति।

मद्भक्तानां मद्भजनवतां प्रकटयस्व प्रकाशय। दया-शान्ति-युक्तानां देवाग्नि-गुरु-भक्तानाम् अस्मिन् ज्ञान-शास्त्रे अधिकार (१२) इत्यर्थः। तथाच तन्त्रे (ग)—

देयं शान्ताय दान्ताय शिवभक्ति-रताय च।
शिववन्मन्यते यस्तु आचार्यं तत्त्वपारगम्॥
शिवाद् गुरुतरा (१३) भक्तिर्यस्य (१४) नित्यं गुरौ (१५) सदा।
तस्य देयमिदं ज्ञानमन्यथा न कदाचन॥

---

Or (१) भिन्न सति (२) वंव स तत् प्र० (३) त्यर्थः। निपाते सति तथा (४) च देहान्ते देहपाते देहस्य (५) घटगुप्तो (६) भानु मुक्तौ चापि यथा (७) मुक्ति स (८) इत्यप (क) पाद्य कस्यास्य (ख) कारिकायां (९) यन्नं (१०) ज्ञानवस्तुप (११) स्मृत इति (१२) अधिकारि इ (ग) तत्तन्त्रे (१३) कुतरो (१४) यथा (१५) गुरौ

कालोत्तरे—यस्य देवे परा भक्ति र्यथा देवे तथा गुरौ ।
नान्यशास्त्रे यदासक्ति (१) र्ज्ञानं तस्मिन्नु दापयेत् ॥
तथा सर्वज्ञानोत्तरे—गुरु-देवाग्नि-भक्ताय नित्यं भक्तियुताय च ।
प्रदातव्यमिदं शास्त्रं नेतरेभ्यः प्रदापयेत् ॥ इति ।

अस्य ज्ञानस्याऽनधिकारिलक्षणमाह—रक्षणीयमित्यादि । यथा—लोके जनाः तस्करेभ्यः चोरेभ्यः सकाशात् धनं निक्षेपादीन् प्रयत्नेन प्रयासेन पालयन्ति, तथा ज्ञानसाधनं चोरेभ्यः अभक्तादिभ्यः सकाशादिति । प्रयासेन गोपनीयमित्यर्थः । तथाच तन्त्रे—

इदं देवि ! न दातव्यं ज्ञानसद्भावमुत्तमम् ।
दुर्विदग्धे शठे क्रूरे अन्याय-पथवर्त्तिने (२) इति ॥

सर्वज्ञानोत्तरे—

एतत्ते शिवसद्भावं (३) शिववक्त्राद् विनिर्गतम् ।
गुह्याद् गुह्यतमं गुह्यमूहनीयं प्रयत्नतः ॥
नाशिष्याय प्रदातव्यं नापुत्राय कदाचन ॥ ९१ ॥

इति उमापतिशिवाचार्य-संगृहीत-शतरत्नोल्लेखनी समाप्ता ।

॥ ॐ ॥

॥ विनायकाय नमः ॥

॥ चिदम्बरेश्वरशिव-कामसुन्दरीभ्यां नमः ॥

---

Or (१) यदाशक्ति ज्ञानं (२) वर्त्तिनेति (३) सद्भवं

## शतरत्न-संग्रहोल्लेखनी-धृत-ग्रन्थकार-नामानि


| | | | |
|---|---|---|---|
| आचार्यः | ३ | वार्त्तिककारः | २९ |
| सर्वात्मशम्भुः | ९ | आचार्यः | ५० |


## शतरत्न-संग्रहोल्लेखनी-धृत-ग्रन्थ-नामानि


| | | | |
|---|---|---|---|
| स्वायम्भुवम् | १ | शान्तिशतकम् (?) | ३३ |
| निश्वासम् | १ | तत्त्वत्रयनिर्णयः | ३८ |
| मातङ्ग-पारमेश्वरम् | १ | नादकारिका ( वृत्तिः ) | ४० |
| देव्यामतम् | १ | स्वतन्त्रतन्त्रम् | ४१ |
| मृगेन्द्रतन्त्रम् | १ | सर्वज्ञानोत्तरम् | ४१ |
| किरणागमः | १ | कालोत्तरम् | ४२ |
| पराख्यम् | १ | स्वच्छन्दतन्त्रम् | ४३ |
| देवीकालोत्तरम् | १ | तत्त्वप्रकाशवृत्तिः | ४४ |
| विश्वसारः | १ | नादकारिका | ४६ |
| ज्ञानोत्तरम् | १ | कैलाससंहिता | ५० |
| रत्नत्रयम् | १ | सिद्धान्तरहस्यसारः | ५३ |
| कामिकम् | ३ | चिन्त्यम् | ५६ |
| सुप्रभेदम् | ६ | शिवधर्मः | ५७ |
| शिवज्ञानबोधसंग्रहः | ६ | मनुसंहिता | ६० |
| क्रियाकारकमण्डनम् | ६ | तत्त्वसंग्रहः | ६१ |
| सात्त्वतसंहिता | ७ | सिद्धान्तम् | ६८ |
| पौष्करागमः | ७ | वरुणपद्धतिः | ६८ |
| सोमसिद्धान्तः | ८ | सौरसंहिता ( पुराणम् ) | ६९ |
| सिद्धान्तदीपिका | ९ | स्कन्दपुराणम् | ७० |
| मुकुटतन्त्रम् | १० | ज्ञानतिलकम् | ७० |
| शिवधर्मोत्तरम् | १३ | षट्सहस्रिका | ७० |
| विश्वसारोत्तरम् | १५ | निश्वासकारिका | ७२ |
| वायवीयसंहिता | १५ | निश्वासोत्तरम् | ७४ |
| तत्त्वप्रकाशः | २० | वातुलोत्तरम् | ८० |
| सर्वज्ञोतः-संग्रहसारः | २० | पञ्चदशी | ९१ |
| सिद्धान्तसारावली | २२ | भगवद्गीता | ९१ |
| रौरवम् | २९ | वायव्यम् | ९३ |

# AGAMĀNUSANDHĀNA SAMITI.

**7A, Chaltabagan Lane, Calcutta.**

## LIST OF PUBLICATIONS

1. तन्त्राभिधानम् ( *Tantrābhidhāna with Bijanighantu and Mudrānighantu.* )—A Tantrik Dictionary. Revised and enlarged 2nd Ed.
2. षट्चक्रनिरूपणम् ( *Shatchakranirūpana* )—A work on Kundaliniyoga with two lucid Commentaries. *Pādukapānchaka*—with Commentary. 3rd. Ed.
3. प्रपञ्चसार-तन्त्रम् ( *Prapanchasāra Tantra* )—Part I. & II. With the Commentary of Padmapāda and a gloss thereon.
4. कुलचूड़ामणिनिगमः ( *Kulachudāmaninigama* )—Introduction by Akshayakumar Maitra, C.I.E.
5. कुलार्णवतन्त्रम् ( *Kulārnava Tantra* )—The most authoritative work on Kula Dharma.
6. कालीविलास-तन्त्रम् ( *Kāliāvilāsa Tantra* )—Introduction by Arthur Avalon.
7. तन्त्रराजः ( *Tantrarāja* )—Part I. & II. Commentary by Subhagānanda-nātha. Full Summary ( 37 Pages ) in English by Arthur Avalon.
8. कर्पूरादि-स्तोत्रम् ( *Karpūrādi-stotra* )—With Introduction and Commentary containing the esoteric interpretation of the hymn by Vimalānanda-Swāmī.
9. कामकलाविलासः ( *Kāmakalāvilāsa* )—Commentary by Natanānandanātha. Translation and notes by Arthur Avalon.
10. कौलोपनिषत्, त्रिपुरामहोपनिषत्, ब्रह्मभावनोपनिषत् (*Kaulopanishad, Tripurāmahopanishad, Bhāvanopanishad*)—Commentaries on these and the Prayoga on the Bhāvana by Bhāskararāya. *Bahvrichopanishad, Arunopanishad,* with Commentary ; *Kālikopanishad.* Introduction by Arthur Avalon.
11. महानिर्वाणतन्त्रम् ( *Mahānirvāna Tantra* )—With the Commentary of Hariharānanda Bhāratī.
12. कौलावलीनिर्णयः ( *Kaulāvalinirnaya* )—By Jnānānanda Paramahamsa.
13. ब्रह्मसंहिता ( *Brahmasamhitā* ) with the commentary of Jīva Gosvāmī and *Bishnusahasranāma* with the commentary of Shamkarāchārya. Both these are highly venerated by Vaishnavas.
14. शारदातिलकम् ( *Shāradātilaka Tantra* ) Part I. & II. By Lakshmanadeshikendra. Commentary by Rāghavabhatta named *Padārthāddarsha*—with a Summary ( 72 pages ) in English.
15. चिद्गगन-चन्द्रिका ( *Chidgagana-Chandrikā* )—by Kālidāsa : An authoritative treatise on Shaiva and Shakta philosophy with English and Sanskrit Introduction.
16. ताराभक्तिसुधार्णवः ( *Tārāvakti-Sudharnava* )—by Narasimgha Thakkur with English Introduction.
17. शाक्तानन्दतरङ्गिणी ( *Sāktānandatarangini* )—By Brahmānanda Giri. In Bengali Script with Bengali Translation.